विद्यामन्दिरपत्रिका

# सारस्वती

संस्कृतविभागीयगवेषणापत्रिका

VOL. I ISSN 2321 - 9072

VIDYĀMANDIRAPATRIKĀ

# SĀRASVATĪ

## RESEARCH JOURNAL OF THE DEPARTMENT OF SANSKRIT

(PEER-REVIEW JOURNAL)

RAMAKRISHNA MISSION VIDYAMANDIRA

BELUR MATH, HOWRAH – 711202

**Publisher :**

Swami Shastrajnananda

Principal, Ramakrishna Mission Vidyamandira

Belur Math, Howrah — 711202

Website : www.vidyamandira.ac.in

Email : vidyamandira@gmail.com

Tel. : 033 2654 - 9181

**Distributor :**

Sales Counter

Ramakrishna Mission Vidyamandira

Belur Math, Howrah : 711202

First Edition : July, 2015

ISSN 2321 - 9072

Price : Rs. 200.00 Only

**Printers :**

Soumen Traders Syndicate, 9/3, K. P. Kumar Street

Bali, Howrah

Tel. : 033 2654 - 3536

Cover Design by **Dr. Tapas Saha**

**EDITORIAL BOARD**

PROFESSOR MRINAL KANTI GANGOPADHYAY

DR. SATYABRATA PAHARI

PROF. AMAR KUMAR CHATTOPADHYAY

DR. DEBKUMAR DAS

DR. HAREKRISHNA PATTAJOSHI

PROF. ANJAN DAS (Coordinator)

विद्यामन्दिरपत्रिका

# सारस्वती

संस्कृतविभागीयगवेषणापत्रिका


**रामकृष्णमिशन्विद्यामन्दिरे**

बेलुडमठे, हावडामण्डले

**प्रकाशकः –**

स्वामी शास्त्रज्ञानन्दः

अध्यक्षः, रामकृष्णमिशन्विद्यामन्दिरम्

बेलुडमठः, हावडा – ७११२०२

जालपूटः – www.vidyamandira.ac.in

इ-पत्रसंकेतः – vidyamandira@gmail.com

दूरभाषः – ०३३ २६५४-९१८१

**प्रातिस्थानम् –**

विक्रय-विभागः,

रामकृष्णमिशन्विद्यामन्दिरम्, बेलुडमठः

**प्रथमसंस्करणम्** – जुलाइ, २०१५

ISSN 2321-9072

विनिमयः – **२००** रूप्यकाणि

**मुद्रकः –**

सौमेन ट्रेडार्स् सिण्डिकेट, ९/३, के. पि. कुमार ष्ट्रीट

बालि, हावडा - ७११२०२

दूरभाषः - ०३३ २६५४-३५३६

प्रच्छदभावना - **ड. तापससाहा**

## सम्पादकमण्डली

अध्यापको मृणालकान्तिगङ्गोपाध्यायः

ड. सत्यव्रतपाहाडी

अध्यापकः अमरकुमारचट्टोपाध्यायः

ड. देवकुमारदासः

ड. हरेकृष्णपट्टजोशी

अध्यापकः अञ्जनदासः (**समन्वयसाधकः**)

# कुलपतिसन्देशः

महान् अयमानन्दस्य विषयो यत् संस्कृतविभागेन 'विद्यामन्दिरपत्रिका सारस्वती' इति गवेषणापत्रिका प्रकाश्यते। अस्याः पत्रिकाया भावोऽतीव गम्भीरः, परन्तु भाषा सुखपाठ्या। लेखकाश्च स्वस्वक्षेत्रे सुप्रसिद्धाः। अत एव इयम् पत्रिका अवश्यं पाठकैः गवेषकैश्च आदृता भविष्यतीति मे दृढो विश्वास इति भगवतः समीपे प्रार्थये।

शास्त्रज्ञानन्दः

(स्वामी शास्त्रज्ञानन्दः)

कुलपतिः

# सूचीपत्रम्


| | | |
|---|---|---|
| १. योगसमन्वये स्वामिविवेकानन्दः | ड. शेख-साविर-आलिः | १५ |
| २. तादात्म्यस्य शक्तिसम्बन्धत्वविचारः | ड. तपनशंकर-भट्टाचार्यः | २७ |
| ३. कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम् | स्वरूप-सिंहः | ३५ |
| ४. शाब्दिक-नैयायिक-मीमांसकदिशा लिङर्थविमर्शः | सन्तु-सिंहः | ६५ |
| ५. वैयाकरणनिकाये स्फोटवादः | सुमन्त-चौधुरी | ८१ |
| ६. व्याकरणमुख्यप्रयोजनखण्डनखण्डनम् | अभिजित् मण्डलः | ९६ |
| ७. शाब्दिकनिकाये जातिस्वरूपम् | श्रीमन्त-भद्रः | १०५ |
| ८. श्रीमद्भागवतमहापुराणे परमाणुवादः | प्रलय-ब्यानार्जी | १२० |
| ९. शाकुन्तले 'आलेख्याश्चर्ययोश्चित्रम्' – एका समीक्षा | भक्तिलता-दासः | १२८ |
| १०. लेखकपरिचितिः | | १४१ |

# योगसमन्वये स्वामिविवेकानन्दमतम्

ड. शेख-साविर-आलिः

समनुसंघातपूर्वादिणोऽचि निष्पन्नः समन्वयशब्दः सङ्गत्यर्थकस्य वाचकः, "समन्वित - त्रि0 सम्-अनु-इण्-क्त सङ्गतम्" वाचस्पत्येऽभिहितत्वात्। सङ्गतिश्च मेलनैकत्वप्राप्तिप्रभृतिपरा। "शर्करा जलेन सङ्गता" इत्यत्र तथैव विवक्षितत्वात्।

ननु मिथोविरुद्धानामविरुद्धानां वाऽत्र सङ्गतिरिष्यते? नाद्यः मिथो विरुद्धानां भिन्नानां मेलनैकत्वप्राप्त्यसम्भवात्, न हि द्वयमेकं भवति। नान्त्यः अविरुद्धानामपि भिन्नानामेकत्वप्राप्त्यसम्भवात्, अविरुद्धानामपि भिन्नानां समन्वयस्य मेलनस्य इष्यमाणत्वे पिष्टपेषणाच्च सिद्धसाधनदोषः। अत्रोच्यते मिथो भिन्नानामपि यत्किञ्चिद्दृष्ट्या अविरोधांशे सङ्गतिः शक्यसम्पादा स्यात्। तथाहि नदीनां मिथो भेदेऽपि उपेयदृष्ट्या यथा सङ्गतिः सम्भवति एवमेवात्रापि योगमार्गाणां स्वरूपतो भेदेऽपि तत्तद्योगोपायानामुपेयगतमैक्यं सम्भवतीति कथंकारं शास्त्रतः सा घटते इत्येव प्रतिपिपादयिषितम्। नाना हि साधनानि। केचन तत्त्वं ज्ञानेन बुभूत्सन्ते, केचन कर्मणा, केचन भक्त्या केचन च योगेन। तेषां समवायपद्धतिज्ञानं तत्तत्स्वरूपज्ञानाधीनमिति सामान्यतः तत्स्वरूपमत्र उपन्यस्यते। निर्गुणब्रह्मण उपास्तिः ज्ञानयोगः। श्रीमद्भगवद्गीतायामावेदितं यत्-

"ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम्।।
संनियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः।।" (12/3,4) इति।

न हि पुमान् क्षणमपि कर्माकुर्वन्नास्ते। उक्तं च "न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्" इति। कर्मापि सकामनिष्कामभेदेन द्वैविध्यं भजते। सकामस्य फलं लब्धुं शक्यते नापि वा। किन्तूभयथापि सकामकर्मद्वारा पुरुषो बद्धतां गच्छति। अतः

निष्कामकर्मैव श्रेय इति गीतासूपदिष्टम्-

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि।।" (2/ 47) इति।

ननु कश्च भक्तियोगः? ईशतोषाय श्रवणादीनामनुष्ठानमेव भक्तिः। तथा च भागवते आवेदितम् -

"श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्ये धीतमुत्तमम्।।" (7/5/23-24) इति।

एतदनुष्ठानसकलं यदि प्रयोजनान्तरापेक्षिततया क्रियते तदा सा भक्तिः सगुणा इति उच्यते। तदेव यदि ईशैकसमर्पणबुद्ध्या अनुष्ठीयते सा भक्तिस्तु निर्गुणा इति निर्गुणा भक्तिरेव भक्तियोग इति।

श्रीमद्भगवद्गीतायां योगप्रक्रियाऽपि साधनत्वेनावेदिता -

"स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ।।
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः।।" (5/27,28) इति।

एवं सति कर्मिणः कर्ममार्गस्यैव भक्ताः भक्तियोगस्यैव मोक्षसाधनतां प्रतिपादयन्ति। तथाहि भक्तिसन्दर्भे श्रीजीवगोस्वामिभिरुदितम् -

"शृण्वन्ति गायन्ति गृणन्त्यभिक्ष्णषः स्मरन्ति नन्दन्ति तवेहितं जनाः।
त एव पश्यन्त्यचिरेण तावकं भवप्रवाहोपरमं पदाम्बुजम्।।" (383) इति।

अत्र च "त एव पश्यन्ति" इति वाचा एवकारेण भक्तिभिन्नमार्गाणां निषेध उक्तः। ज्ञानिनश्चामनन्ति ज्ञानमार्गैकवेद्यः स परमपुरुषः। तथा च---

"भक्त्या मामभिजानाति यावन्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्।।" (18/55) इति

श्रीमद्भगवद्वाणीव्याख्यायां भक्तिवादिभिः केशवकाश्मीरिभट्टाचार्यैः तत्त्वप्रकाशिकायां प्रकाशितम् -

"तत्त्वतश्च 'भक्तिरेवैनं वर्धयति, भक्तिरेवैनं दर्शयति, भक्तिवशः पुरुषः

भक्तिरेव भूयसी' इति श्रुत्युक्तं भक्तेर्भगवद्दर्शनासाधारणकारणत्वं तद्वशीकरणत्वं चाह - भक्त्या इति" इति। किन्तु अयमेव श्लोकः शङ्करानन्दाचार्यैः ज्ञानपक्षे व्याख्याकृद्भिः अन्यथा व्याख्यातम् -

"एवं चिरकालं नित्यनिरन्तरसमभ्यस्तज्ञानयोगेन विपरीतप्रत्ययहेतूना - मानाद्यविद्यावासनानां तत्कार्याणाञ्च विपरीतप्रत्ययानां निःशेषसंक्षये सति विकल्पं सर्वं परित्यज्य सर्वत्र समदर्शनलक्षणं ज्ञानं प्राप्तवतो ब्रह्मविद्यतेस्तज्ज्ञानोत्पन्नं वस्तुतत्त्वनिश्चयं प्रतिपादयंस्तादृङ्निश्चयवतो ब्रह्मप्राप्तिं दर्शयति – भक्त्येति। भक्त्या बहिरन्तः सर्वत्र वस्तुमात्रावगाहिन्या निर्विकल्पया प्रत्यग्दृष्ट्या सम्यगधिष्ठानसंदर्शनजन्यज्ञानेन ब्रह्मविद्यतिर्मां परं ब्रह्माभिजानात्यभितः सर्वत आभिमुख्येन विकल्पराहित्यं यथा तथा साक्षात्कृतस्य वस्तुनस्तत्त्वं विनिश्चिनोति, सामान्यतो विशेषतश्चाधिगतस्य वस्तुतत्त्वनिर्धारणं करोतीत्यर्थः। ...'ज्ञानादेव तु कैवल्यं' 'नान्यः पन्था विद्यते अयनाय' इत्युक्तरीत्या ज्ञानादेव मुक्तिर्नान्यथा इति श्रुत्यनुगतं स्वनिश्चयमाह तदनन्तरं..." इति।

अत्र च भक्तिशब्दं वस्तुमात्रावगाहिनिर्विकल्पकप्रत्यगात्मदृष्टिबोधकः। अतश्चेदं स्पष्टं यदेतन्मते ज्ञानत एव मुक्तिः सेत्स्यतीति। किञ्च -

"पुरुषः स परः पार्थ भक्त्या लभ्यस्तदन्यया।
यस्यान्तःस्थानि भूतानि येन सर्वमिदं ततम्।। " (4/22)

इत्यत्र श्रीमद्भगवद्गीतायाम् अयं श्लोको भक्तिपक्षे एव व्याख्यातः। "भक्त्या लभ्यस्तदन्यया" इत्यत्र भक्तिशब्दस्य उल्लेखात् यथाश्रुतार्थतयैव अनन्यभक्तिगम्यत्वं परमपुरुषस्य इति गम्यते, तथा च गूढार्थदीपिकाटीकायामाटीकितम् -

"स परो निरतिशयः पुरुषः परमात्माऽहमेव अनन्यया न विद्यते अन्यो विषयो यस्यां तया प्रेमलक्षणया भक्त्यैव लभ्यो नान्यथा" इति। अत्र च नान्यथा इति वाचा भक्तीतरनिष्ठसाधनत्वं निराकृतम्।

शङ्करानन्दकृतायां तात्पर्यवेदिन्यां तु भक्तिशब्दः ज्ञानार्थकत्वेन विवेचितः। तथाहि तैरगादि -"परः 'अव्यक्तात्तु परः पुरुषः' इति श्रवणात् सर्वोत्तमः पुरुषः बहिरन्तः सर्वत्रैकरसेन पूर्णत्वात् पुरुषः सः अक्षरः परमात्मा अनन्यया न विद्यते अन्यः परमात्मातिरिक्तो विषयो यस्याः सा अनन्या सर्वत्र ब्रह्ममात्रग्राहिणी अहमिदंप्रत्ययनिर्मुक्ता तया अनन्यया भक्त्या सर्वमिदं च ब्रह्मैवेति भजति वेत्ति

विद्वाननयेति भक्तिर्ज्ञानं भजतिरत्र ज्ञानार्थः। तुशब्दः अवधारणार्थः। भक्त्या ज्ञानेनैवाचार्यप्रसादलब्धेन समाधिनिष्ठया शुद्धेन लभ्यः प्राप्तव्यः परमात्मा न तु कर्मणा योगेन सांख्येन च ब्रह्म प्राप्तुं शक्यत्वादित्यर्थः" इति। अत्र च "भजति वेत्ति विद्वाननयेति भक्तिर्ज्ञानम् इति। भजतिरत्र ज्ञानार्थकः" इत्यंशेन भक्तिशब्दः ज्ञानवाचीति दर्शितम्। किन्तु श्लोकस्थेन तुना अवधारणार्थेन च ज्ञानयोगस्यैव परमपुरुषप्रापकत्वमावेदितमिति तैर्वेदितम्।

अतश्चेदानीं चोदनीयं सुतरामेव यत्, परमपुरषप्राप्तिसाधनत्वं शास्त्रेषु शासितेषु एषु श्रेयस्सु एकैकत्रवैव पर्याप्तं, न तु सर्वत्र इति तत्तच्छास्त्रिणां मतमिति विरोध एषां विस्पष्टः। अयं च विरोधः उपायगतोऽपि उपेयगततया नास्ति इति कथामृतादिषु अपि एतत्समाहितम्। तथाहि कथामृते समुदितम् -

"अनन्ता हि पन्थानः। तेषु ज्ञानं वा कर्म वा भक्तिर्वा - येनैव पथा उपेयते, आन्तरिकत्वे सति ईश्वरः लभ्य एव।" इति। एतत्सत्यं यदुपायभूतानाम् एतेषां स्वरूपतः भेदोऽस्त्येव। तथाहि भक्तिकर्मज्ञानमार्गाणामुत्तरोत्तरं दुर्गमत्वमस्ति। तथापि लक्ष्यदृष्ट्या तु समन्वयः सम्भवत्येव। तथा चावेदितं कथामृते -

"अत एतस्मिन् युगे भक्तियोगः (उपायः)। उपायान्तरादप्यपेक्षया अनेनैव ईश्वरः सुगमः। ज्ञानयोगेन कर्मयोगेन योगान्तरेण वापि ईश्वरं प्रति उपैतुं शक्यते किन्तु एतदखिलं दुःशकमेव" इति। अपि चैतदुदितम् -

"ये च संसारिणः सन्ति, येषां च देहाभिमानः अस्ति, तेषां कृते सोऽहमिति भावः न रम्यः। संसारिणां कृते योगवाशिष्ठवेदान्तादिकं नोपयोगि, अपि च अवरमेव। संसारिणा सेव्यसेवकभावेन भाव्यम्।" इति।

न च श्रीरामकृष्णदेवैः मीमांसितमेतत् न शास्त्रीयमिति शङ्क्यम्, "ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम्" (4/11) इति श्रीमद्भगवद्गीतायां,

"रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषाम्।

नृणामेको गम्यस्त्वमसि पयसामर्णव इव ।।" इति शिवमहिम्नःस्तोत्रे चैतस्य प्रतिपादितत्वात्।

अपि चैतद् ध्येयं यत्, श्रीमद्भगवद्गीतायाः प्रथमे षट्के कर्मयोगः,

द्वितीये भक्तियोगः, तृतीये च षट्के ज्ञानयोग उपदिष्टः। ततश्चावसाने यथेच्छमनुष्ठानमुपदिष्टम्। तथा चाख्यातम् -

"इति ते ज्ञानमाख्यातं गुह्याद्गुह्यतरं मया।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु।।" (18/63) इति।

वस्तुतस्तु यथेच्छं पदमपि सतन्त्रम्। न हि यस्य कस्यापि यस्मिन् कस्मिन् प्रवेशायायमुपदेशः, किन्तु अधिकारानुसारमेतेषां यथेच्छमनुष्ठानमिति एव विवक्षितम्। तथाहि तद्व्याख्यायां व्याख्यातम् -

"स्वतृप्तिवत् स्वाधिकारस्य स्वज्ञेयत्वात् परबुद्धेरप्रत्ययत्वाच्च स्वाधिकारं स्वयमेव निश्चित्य कर्मणि ज्ञाने वा यत्राधिकारस्तत्र तिष्ठ इत्यर्थः" इति।

अत एतेषां योगमार्गाणामन्योन्यनिरपेक्षतयैव एकोपेयमात्राभिगमनमेव अत्राविरोधः।

ननु श्रीरामकृष्णदेवैरुपदिष्टानामुपायानाम् अन्योन्यनिरपेक्षतया उपेयैक्येन च समन्वयः सम्भवति इति तदेतत् शास्त्रविरोधि, शास्त्रेषु उपेयानामपि भिन्नत्वेन प्रतिपादनात्। तथाहि, अद्वैतिनां विशिष्टाद्वैतिनां द्वैतिनां नये तत्त्वं न समानम्। तत्र अद्वैतिनां ब्रह्मातिरिक्तस्य कस्यापि पारमार्थिकसत्त्वाभावात् एकमेव तत्त्वमिति मतम्। यथाहि मूढचेतसा वर्षासु आदित्यः जलदाच्छादित इति व्यपदिश्यते, तस्य वस्तुतः तथात्वाभावादपि स्थानान्तरतः तस्मिन्नपि क्षणे पुरुषान्तरैः आदित्यस्य द्रष्टुं शक्यत्वात्, अपसृते तु जलदे स एव मूढ आदित्यमवलोकयितुं शक्नुयादिति मूढदृष्टिरेव आच्छादिता इति वाच्यम्। एवमेव ब्रह्मण्येव जगदखिलमध्यस्तम्, अविद्यावशात् तद्ग्रहीतुं न शक्यते अस्माभिरिति अविद्यातत्कार्ये च निर्वृत्ते ब्रह्मात्मनावस्थितिरेव मुक्तिरिति अद्वैतमतम्। छान्दोग्योपनिषद्यपि तत्त्वमस्यादिश्रुतिवाक्येन जीवब्रह्मणोरैक्यमेव प्रतिपादितम्। अभ्यासादिलिङ्गषट्केन तथैवावधारणात्।

विशिष्टाद्वैतिनां रामानुजाचार्याणां मते ब्रह्मैव तत्त्वं किन्तु जीवजगदादिविशिष्टं ब्रह्म तादृशम्, जीवजगदादेः ब्रह्मशरीररूपत्वात्। एतन्मते ब्रह्म सगुणमेव न तु निर्गुणम्। अतः सर्वदर्शनसंग्रहान्तःपातिरामानुजदर्शने समग्राहि -

"वासुदेवः परं ब्रह्म कल्याणगुणसंयुतम्।
भुवनानामुपादानं कर्ता जीवनियामकः।।" इति।

अपि च तत्रैव "भक्तवत्सलः परमकारुणिकः पुरुषोत्तमः स्वयाथात्म्यानुभवानुगुणनिरवधिकानन्दरूपं पुनरावृत्तिरहितं स्वपदं गच्छति" इत्यत्र यन्मुमुक्षूणामुपेयस्वरूपं कीर्तितं तत्र परमात्मनः सगुणत्वमेवावेदितमिति अद्वैतिमतिभेदः दृश्यते।

द्वैतिनां माध्वाचार्याणां नये तत्त्वं द्विविधं स्वतन्त्रपरतन्त्रभेदात्। स्वतन्त्रः विष्णुः। परतन्त्रः जीवः। एतेषां मते सेव्य-सेवक-भाव एव साधनत्वेनोररीकरणीयः। तथाहि भृत्यः यदि ब्रूयात् 'अहमेव राजे'ति, तदा राजा हन्ति तम्, प्रत्युत, राजनिष्ठगुणानां निरन्तराभिधानाद् राजा सन्तोषितः तस्मै ददाति अखिलमैश्वर्यम्। तदुक्तम् -

"घातयन्ति हि राजानो राजाहमिति वादिनः।
ददत्यखिलमिष्टञ्च स्वगुणोत्कर्षवादिनाम्।" इति। अत ईशप्रीतिवन्दनमेव प्रार्थनीयं तदीयम्। विष्णुतत्त्वनिर्णये विवेदितम् -

"सदागमैकविज्ञेयं समतीतक्षराक्षरम्।
नारायणं सदा वन्दे निर्दोषोऽशेषसद्गुणम्।।" इति।

षट्सन्दर्भेषु अन्यतमे प्रीतिसन्दर्भे भक्तिसाधनफलमुपवर्णितम्, मुक्तिश्च सालोक्यादिभेदेन पञ्चविधा। आदिशब्देन सार्ष्टिसारूप्यसामीप्यसायुज्याः परिगृह्यन्ते। प्रीतिसन्दर्भे तु प्रीतिरेवाधिक्येन वर्णिता। तथाहि उक्तं श्रीजीव-गोस्वामिना "तत्र यद्यपि तत्प्रीतिं विना ता अपि न सन्त्येव, तथापि केषाञ्चित् तेषां स्वस्य दुःखहानौ सामीप्यादिलक्षणसम्पत्तावपि तात्पर्यं, न तु श्रीभगवत्येवेति तेषु न्यूनता।" किञ्च "यास्यामेव कवय आत्मानमविरतं नानावृजिनसंसार - परितापोपतप्यमानमनुसवनं स्नापयन्तस्तयैव परया निर्वृत्या ह्यपवर्गमात्यन्तिकं परमपुरुषार्थमपि स्वयमासादितं नो एवाद्रियन्ते भगवदीयत्वेनैव परिसमाप्तसर्वार्था।" इति।

न्यायवैशेषिकाणां मते आत्यन्तिकी दुःखनिवृत्तिः निःश्रेयसमम्। तथा च न्यायसूत्रम् - 'तदत्यन्तविमोक्षोऽपवर्गः' (1/1/22) इति। वैशेषिकसूत्रोपस्कारे चावेदितं शङ्करमिश्रेण - "निःश्रेयसमात्यन्तिकी दुःखनिवृत्तिः " इति। कर्मप्रधानानां मीमांसकानां नये नित्यसुखमभिव्यज्यते मोक्षे इति।

तेनेदं स्पष्टं यद् दार्शनिकानां शास्त्रीयाणां च नये उपेयभूतं निःश्रेयसं

भिन्नभिन्नस्वरूपम्। यच्चाद्वैतिनामभिमतं न तत् माध्वानाम्। यच्च माध्वानां न तत् विशिष्टाद्वैतवादिनामिति उपेयगतमपि भिन्नत्वं शास्त्रेषु दृष्टम्, तदेतत् किं न उपेयगतैक्यात् उपायाः शक्यसमन्वयाः इति रामकृष्णमतं न विरुद्धतामेति? अत्रोच्यते सत्यमेतद् भिन्नमिति उपेयानां नैकत्वं, तथापि दुःखलेशशून्यत्वेन ऐक्यत्वमत्र विवक्षितमिति न दोषः। न च तथापि तेन सादृश्यमात्रं दार्शनिकाभिसम्मतानां मोक्षाणां प्रतिपादितं, न तु ऐक्यमपि उपपादितम्, रामकृष्णदेवानां तु उपेयगतमेकत्वमेवाभिप्रेतमिति "ज्ञानिनस्तथा ब्रूवते - यथा वेदान्तवादिनः। भक्तास्तु अशेषदशावलम्बनाः। जागरितदशापि सती, न च जगत्स्वप्नायमानम्। भक्ता ब्रूवाणाः सन्ति - एतद् जगद् भगवत ऐश्वर्यम्। नभोनक्षत्रचन्द्रमःप्रभाकरपर्वतोदधिजीवसत्त्वानि समानि ईशकृतानि। तेषामेव एतदैश्वर्यम्। स चान्तर्बहिः अपि वर्तते। उत्तमभक्तो न गदति, स स्वयम् एतच्चतुर्विंशतितत्त्वात्मकजगद्रूपेण विवर्तितः। भक्तस्य एवमेव वाञ्छा यत्स यथा शर्करां भुञ्जीयात्, न तु शर्करात्मत्वकामः" इति किं नात्र विरोधस्य तादवस्थ्यमिति चेन्न, एकमेव वस्तु। नामभेदमात्रम्। यो ब्रह्म, य आत्मा, स एव भगवान्। ब्रह्मज्ञस्य ब्रह्म, योगिनः परमात्मा, भक्तस्य च भगवान् एक एव। दार्शनिकैस्तटस्थलक्षणस्य वर्णितत्वात्।

अत्रायमाशयः यत्, वस्तुतः उपेयमेकमेवेति रामकृष्णमतमेव सम्यक्। दार्शनिकैस्तदेव भिन्नभिन्नतया आख्यातम्। तैर्हि तत्त्वस्य तटस्थलक्षणमुक्तम्, न हि स्वरूपलक्षणम्। न हि ब्रह्मस्वरूपं तेनापि वर्णयितुं शक्यते तस्य अनिर्वचनीयत्वात्। यथाहि, क्वचित् तरौ कश्चित् कमपि कपिविशेषं रक्तं दृष्ट्वा तथैव वर्णयति, अन्येद्युस्तत्रैव हरिदाभः कपिविशेषो दृष्टस्तथैव वर्णितश्च, एवमेव अपरेद्युः पुनरन्येन तत्रैव पीतकपिविशेषो दृष्ट इति परस्परं विवादः कपिस्वरूपविषये दृश्यते। किन्तु तद्वृक्षतलवासिना पुरुषेण तु तादृशविवादं श्रुत्वा उदितं यत् प्रागुक्तप्रत्येकवच एव यथायथम्, वस्तुतः स न कपिविशेषः अपि तु बहुरूपी मनुजनुविशेष इति। एवमेव ब्रह्म सगुणमपि निर्गुणमपि। तत्सर्वं तटस्थलक्षणमात्ररम्, ब्रह्मस्वरूपं तु अनिर्वचनीयम्। यावन्न साक्षात्कारः तावदेव विचारः। कथामृते तथाहि उदितम् - "वेदान्तः यथा शङ्करेणावेदितः, तदपि अस्ति, रामानुजीयं विशिष्टाद्वैतमतमपि सत्यम्। ...विचारः कियान्? यावन्न स

लभ्यते, तावदेव। केवलं मौखिकवचनेन किम्? यदेतत् अहं पश्यामि यत् स एव सर्वं भवति" इति।

किञ्च तैरुदीरितम् - "यावन्न मधुपः पुष्पमुपविशति, तावदेव भन्भनायते। पुष्पेषु उपविशन् मधु पिबन् तु स तूष्णीं गच्छति। पीतमधुः मधुपः पुनः प्रमत्तः सन् क्वचित् गुञ्जति वा" इति।

ननु स्यादेतद् योगसमन्वयप्रकारप्रदर्शनम्, किन्तु स्वामिमते किमेतत् सङ्गच्छते न वेत्येव वाच्यम्, योगसमन्वये स्वामिमतस्यैव प्रतिज्ञातत्वात् अतथाकरणे तु प्रतिज्ञानसन्न्यासपाताद् इति चेन्न, श्रीरामकृष्णस्यैतस्य मतस्य स्वामिनापि उररीकृतत्वात्, तथाहि 'वाणी ओ रचना' इत्याख्ये ग्रन्थे स्वामिनावेदितं यत् - "एवम्भावेन कर्मणा यदा चेतश्शुद्धिः सम्पद्येत, तदा तवैव आत्मा सर्वजीवे सर्वस्मिन् च घटे विराजमान इति तत्त्वं साक्षात्क्रियेत, अतः परहितसाधनम् आत्मविकाशोपाय इत्यपि पन्थाः कश्चन। एतदपि जानीहि, अयमपि कश्चन ईशप्रापोपाय इति, अस्यापि उद्देश्यमात्मविकाशः। ज्ञानभक्त्याद्यन्यतमेन यथा आत्मविकाशः भवति, परार्थपरकर्मणापि तथा भवति" (नवमखण्डे) इति।

स्वामिना किञ्चिदन्यथापि समन्वयः प्रदर्शितः। तथाहि यद्यपि ज्ञानादीनाम् अन्योन्यनिरपेक्षत्वेन उपेयगतमेकत्वमङ्गीकृत्य समन्वयः प्रदर्शितपूर्वः, तथापि ज्ञानादीनाम् अन्योन्यसापेक्षतयापि तादृशः समन्वयः सम्भवतीति तदेव स्वामिना दर्शितम्।

तथा च रामकृष्णमिशन्सङ्घस्य प्रतीकगतशिल्पकलातात्पर्यं प्रकाशयद्भिः स्वामिभिः अगादि - "चित्रगतः तरङ्गायितः तोयराशिः कर्मणाम्, कमलानि भक्तेः, उदीयमान आदित्यः च ज्ञानस्य प्रकाशकानि। चित्रगतम् उरगपरिवेष्टनं योगस्य जागरितकुण्डलिनीशक्तेश्च परिचायकम्। मध्येचित्रं हंसप्रतिकृतिः परमात्मपरा। स च हंसः (परमात्मा) नः तत् प्रचोदयात्। अयं हृदयसरोवरः। अतः कर्म, भक्तिः, ज्ञानञ्चेति त्रितये मिलिते सत्येव परमात्मसन्दर्शनं सम्पद्यते। एतदेव चित्रतात्पर्यम्। " (वाणी ओ रचना इत्याख्ये ग्रन्थे नवमखण्डे तृतीयसंस्करणविशिष्टे 190पृष्ठायाम्।)

वस्तुतस्तु इत्थमपि अविरोधः एतद्विषये शक्यप्रदर्शनः,

सहानवस्थानवध्यघातकविरोधान्यतरस्य ज्ञानकर्मादिषु साधनेषु अभावात्। किञ्च सहानवस्थानविरोधस्य अभावात् ज्ञानकर्मादीनां युगपदनुष्ठानं पुंसा कर्तुं शक्यते। वध्यघातकविरोधस्य चाभावात् ज्ञानादीनां परस्परोपकारकत्वं नास्तीति वक्तुं न युज्यते। अत एषामविरोधः सुवचः।

किञ्च शास्त्रतोऽपि एवमविरोधः सुप्रतिपादो भवति। तथा हि नैयायिकैः वेदान्तिभिरपि भक्तिः अङ्गीक्रियते।

"प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः" (1/1/1) इत्यत्र नैयायिकैः, "धर्मविशेषप्रसूताद्द्रव्यगुणकर्मसामान्य - विशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" (1/1/4) इत्यत्र वैशेषिकैः, वेदान्तिभिश्च तत्त्वज्ञानाद् अपवर्गः समाधीयते। किन्तु तत्र ज्ञानमेव निश्रेयसप्रयोजकं कैवल्येन न भवति। भक्तिरपि तत्र विद्वद्भिः अङ्गीकृता। तथा च न्यायसूत्रम् "तदर्थं यमनियमाभ्यामात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः" (4.2.46) इति। एतत्सूत्रव्याख्यायाञ्च विश्वनाथन्यायपञ्चाननमहाभागैःन्यायसूत्रवृत्तौ उदितम् -'अहिंसा-सत्यास्तेय-ब्रह्मचर्यापरिग्रहा यमाः "नियमानाह – शौच-सन्तोष-तपःस्वाध्यायेश्वरप्रणि - धानानि नियमाः" (साधनपादे सूत्रं 30-32)। तत्र च नियमान्तःपाति ईश्वरप्रणिधानपदं भक्तिविशेषावेदकम्। तथा च भोजवृत्तौ अभाणि- "ईश्वरः वक्ष्यमाणलक्षणः तत्र प्रणिधानं भक्तिविशेषो विशिष्टमुपासनं सर्वक्रियाणां तत्रार्पणं विषयसुखादिकं फलमनिच्छन् सर्वाः क्रियास्तस्मिन् परमगुरावर्पयति तत्प्रणिधानं समाधेस्तेत्फललाभस्य च प्रकृष्ट उपायः" इति।

अत एतत् स्पष्टं भक्तिरपि ज्ञानसहकारित्वं सम्पद्यते निःश्रेयससम्पादने। न च यमनियमाभ्यामेव मुक्तौ योग्यता उत्पद्यते, किन्तु योगाङ्गान्यपि समनुष्ठेयानि। तथा च न्यायपञ्चाननमहाभागैः न्यायसूत्रवृत्तौ विषयोऽयम् अभ्यधायि "आत्मसंस्कार आत्मनः अपवर्गाधिगमयोग्यता। ननु यमनियमावेव साधने उताहो अन्यदस्तीत्यत आह – योगादिति। अध्यात्मविधि आत्मसाक्षात्कारविधायकवा - क्यम्, आत्मा वा अरे द्रष्टव्यः, आत्मानं चेद्विजानीयात्" इत्यादि। योगादिति प्रतिपाद्यत्वं पञ्चम्यर्थः। - तथा च योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिर्वा

विवेकख्यातेः।" (साधनपादे सूत्रम् 28) । तदर्थश्च योगाङ्गानां यमनियमादीनाम् अनुष्ठानाच्चित्तस्याशुद्धेरविद्यारूपस्य क्षये सति ज्ञानस्य दीप्तिः प्रकर्षः, स च विवेकख्यातिपर्यन्तो जायते।" अतः योगसुधाकरटीकायामपि आटीकितम् - "अथ नियमानाह शौचेति। जन्महेतून् काम्यधर्मान्निर्वर्त्य मोक्षहेतौ निष्कामे धर्मे नियमयन्ति प्रेरयन्तीति नियमाः। ईश्वरप्रणिधानं नाम अभिहितानामनभिहितानाञ्च सर्वासां क्रियाणां परमेश्वरे फलानपेक्षतया समर्पणम्। तदुक्तम् –

कामतोऽकामतो वापि यत्करोमि शुभाशुभम्।
तत् सर्वं त्वयि विन्यस्य त्वत्प्रयुक्तः करोम्यहम्।।" इति। अतः अत्र मोक्षकारणीभूते निष्कामकर्मणि प्रवृत्तिसिद्धये नियमोपदेशात् निष्कामकर्मात्मककर्मयोगोऽपि नैयायिकैः आदर्तव्य इति केन अपलपितुं शक्यम्।

ये च पातञ्जलाः योगानुयायिनः तेऽपि कर्मभक्तिप्रभृतिकं निःश्रेयससम्पादनसहकारित्वेन स्वीकुर्वन्ति इति प्राक्तनयोगसूत्रव्याख्याने एव प्रतीयते। किञ्च सत्त्वपुरुषान्यताख्यातो मुक्तिः सेत्स्यतीति वदद्भिः तैरपि मुक्तौ ज्ञानप्रयोज्यत्वं अङ्गीरणीयमेव। ये च कर्मधर्मवादिनः मीमांसकाः तेऽपि भक्तिं मोक्षमाध्वीकोपायत्वेन उपयन्ति। तथा चोक्तमर्थसंग्रहे लौगाक्षिभास्करेण – "सः अयं धर्मः यदुद्दिश्य विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः। ईश्वरार्पणबुद्ध्या क्रियमाणस्तु निःश्रेयसहेतुः।" इति। तथा च मीमांसान्यायप्रकाशे आपोदेवेनोक्तं -"सोऽयं धर्मो यदुद्देशेन विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुः। श्रीगोविन्दार्पणबुद्ध्या क्रियमाणस्तु निःश्रेयसहेतुः" इति।

'ब्रह्मविद् ब्रह्मैव भवति' इति वदतां वेदान्तिनामपि नये भक्तिः मुक्तिसम्पादिका इति। तथा च "अपि च संराधने प्रत्यक्षानुमानाभ्याम्" इति ब्रह्मसूत्रभाष्ये शंकराचार्येण भाषितम् "अपि च एनमात्मानं निरस्तसमस्तप्रपञ्चमव्यक्तं संराधनकाले पश्यन्ति योगिनः। संराधनञ्च भक्तिध्यानप्रणिधानाद्यनुष्ठानम्।" इति। किञ्च "इति ते ज्ञानमाख्यातम्" इति गीतागीतिव्याख्यायां श्रीमधुसूदनसरस्वतीभिः उपपादितम् "अत्र चैतावदुक्तम् – अशुद्धान्तःकरणस्य मुमुक्षोर्मोक्षसाधनज्ञानोत्पत्तियोग्यताप्रतिबन्धकपापक्षयार्थं फलाभिसन्धिपरित्यागेन भगवदर्पणबुद्ध्या वर्णाश्रमधर्मानुष्ठानं ततः शुद्धान्तःकरणस्य विविदिषोत्पत्तौ गुरुमुपसृत्य ज्ञानसाधनवेदान्तवाक्यविचाराय

ब्राह्मणस्य सर्वकर्मसन्न्यासः ततो भगवदेकशरणतया विविक्तदेशसेवादिज्ञानसाधनाभ्यासात् श्रवणमनननिदिध्यासनैरात्मसाक्षात्कारो - त्पत्त्या मोक्षः।" इति। अत आदौ चेतःशुद्धिसम्पत्तये कर्मयोगानुष्ठानं कर्तव्यम्। ततः भक्तिज्ञानयोगाभ्यां मुक्तिः उपपद्यते। निष्कामकर्म कुर्वतां चेतसि भक्तिः उदेति। ततः क्रमात् परमात्मसाक्षात्कारः सम्पद्यते इति एकार्थकारित्वरूपं सहकारित्वमप्यस्ति इति स्वामिमतं रामकृष्णदेवैरप्यन्यत्र प्रदर्शितम्। तथा हि कथामृते उदितम् - "किन्तु यावती तस्मिन् भक्तिः उदेति तावदेव तावकं कर्म ह्रासतामेति। गृहस्थस्य भार्या यदा अन्तःसत्त्वा सम्पद्यते तथा श्वश्रूमाता तस्याः कर्मसकलं ह्रासीकरोति। यावदेव मासः एधते तावदेव श्वश्रूमाता ह्रासयति कर्म। दशसु मासेषु सम्पन्नेषु पुनः कर्म न कारयति। येन सन्तानस्य वंशदीपकस्य हानिर्न स्यात्, प्रसवश्च न व्याहन्येत। (हास्यम्) त्वं यादृशं कर्म करोषि तेन तवैव उपकारः। निष्कामे कर्मणि तु कृते चेतःशुद्धिः घटते। त्वयि भगवतः प्रीतिः उदेति। प्रीतौ च प्रपन्नायां स च परमगुरुः प्रतिपद्यते।" (प्रथमखण्डे)

लोकेऽपि दृश्यते चैत्रस्य गृहे पूजायाम् आयोजितायां तन्मित्राभ्यां मैत्रदेवदत्ताभ्यां पूजानुकूलकार्यं कृतमपि इयं पूजा चैत्रेण क्रियते इति व्यपदेशो भवतीति। पुनश्च चैत्रमैत्रदेवदत्तैः मैत्रगृहे पूजान्तरमनुष्ठितमपि सा पूजा मैत्रेण क्रियते इति व्यपदेशो दृश्यते। एवमेव देवदत्तगृहे अनुष्ठिते तु देवदत्तेन क्रियते सपर्या इति व्यवहारो दृश्यते। वस्तुतस्तु सर्वेषामेव पूजायामुपयोगे सत्यपि एकैकस्य प्राधान्येन चैत्रस्य मैत्रस्य देवदत्तस्य वा पूजा इति व्यपदेशभेदः दृश्यते। एवमेव मुक्तौ ज्ञानकर्मभक्तीनां समासामेव सहकारित्वे सत्यपि ज्ञानादिवादिभिः एकैकस्य मार्गस्य प्राधान्यमवलम्ब्य ज्ञानस्यैव कर्मण एव भक्तेरेव वा निःश्रेयसजनकत्वमस्तीति उच्यते। अतः प्रागुक्तानि ज्ञानादीनि मिथः सापेक्षाणि सन्त्येव निःश्रेयसकारकाणि भवन्ति इति तात्पर्यम्। स्वामिना अपि एतदभिप्रायेण आवेदितम् - "मनुजनुषु केचन ज्ञानिनः केचन भक्तिमन्तः केचन योगिनः केचन कर्मिणः। धरायां धर्मभेदसकलं ज्ञानभक्तियोगकर्मणाम् एकैकम् अनुसरति। किन्तु एकस्मिन्नेव जीविते मार्गचतुष्टयस्यैव अनुशीलनं कर्तुं शक्यम्। आगामिनि च काले मनुजसमाजः एवमेव समन्वयं प्रति एति" इत्येव श्रीरामकृष्णदेवादर्शः (प्रबुद्धभारतम्) इति शम्।

## सहायकग्रन्थपञ्जी—


१. आत्मविकाश:. सम्पा. स्वामिप्रेमानन्द. कलिकाता : सारदापीठ, १९९८।

२. कथामृतम्. सम्पा. स्वामिमुमुक्षानन्द. कलिकाता : उद्बोधनकार्यालय, २०११।

३. गोस्वामी, श्रीजीव. परमात्मसन्दर्भ:. सम्पा. श्रीपञ्चाननचक्रवर्ती. कलिकाता : संस्कृतपुस्तकभाण्डार, १४०५(ब.)।

४.भागवतपुराणम्. सम्पा. ड: पुष्पेन्द्रकुमार. देहली : इस्टार्नवुकलिङ्कार्स्, २००९।

५. भास्कर, लौगाक्षी. अर्थसंग्रह:. सम्पा. आर्-डिकार्मार्किर एवं गजेन्द्रगद्कर. कलिकाता : मोतीलालवेनारसीदास।

६. माधवाचार्य. सर्वदर्शनसंग्रह. सम्पा. टि.जि.मेनकर. पुनेनगरी : भाण्डारकर-ओरियेन्टालरिसर्च-इन्स्टिटिउट् १९७८।

७. मीमांसान्यायप्रकाश:. सम्पा. वासुदेवाभ्यङ्करशास्त्री. पुनेनगरी : भाण्डारकर-ओरियेन्टालरिसर्च-इन्स्टिटिउट्, १९७८।

८. वाचस्पत्यम्. संकलक एवं सम्पा. तारानाथविद्यावाचस्पतिभट्टाचार्य. वाराणसी : चौखम्बासंस्कृतसिरीज्-अफिस्, १९६२।

९. वेदान्तदर्शनम्. सम्पा. स्वामिचिद्घनानन्दपुरी. कलिकाता : उद्बोधनकार्यालय, २००९।

१०.वैशेषिकसूत्रोपस्कार:. सम्पा. पञ्चाननतर्करत्न. कलिकाता, १३१३ वङ्गाब्द।

११. स्वामी विवेकानन्द. 'वाणी ओ रचना(नवमखण्ड) कलिकाता : उद्बोधनकार्यालय, २०१२(तृतीयसंस्करण)।

१२. शङ्कराचार्य. 'शिवमहिम्न:स्तोत्रम्' (स्तवकुसुमाञ्जलि). सम्पा. स्वामिगम्भीरानन्द. कलिकाता : उद्बोधनकार्यालयेन १९९२।

१३. श्रीमद्भगवद्गीता. सम्पा. शास्त्रिगजाननशम्भुसाधले. देहली : परिमलपावलिकेशन् , २०००।

# तादात्म्यस्य शक्तिसम्बन्धत्वविचारः

ड. तपनशंकरभट्टाचार्यः

पदपदार्थयोः सम्बन्धः खलु वृत्तिः। वृत्तेः प्रकारविषये पण्डितानां मध्ये मतभेदो दृश्यते। वृतु वर्तते इति वृत्-धातोः क्तिन्-प्रत्यये वृत्तिशब्दो निष्पन्नो भवति। बौद्धशब्दो बौद्धश्चार्थ एवं स्थिते कीदृशस्तयोः सम्बन्धः इति जिज्ञासायां शब्दार्थसम्बन्धस्तावन्निरूपनीयः। शब्दविशेषेणार्थविशेषः प्रत्याय्यते न सर्वैः शब्दैः सर्वेऽर्था अनियमेन बोद्धव्याः। गौरित्युक्ते सास्नादिमत्त्वं सामान्याकारेण बुद्ध्यारूढं प्रतीयते, प्रतीयते च घट इत्युक्ते कम्बुग्रीवादिमत्त्वम्। शाब्दबोधे वृत्तिज्ञानं सहकारिकारणं भवति। तदुक्तं कारिकावल्यां विश्वनाथेन-

"पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः।
शाब्दबोधः फलं तत्र शक्तिधिः सहकारिणी।।"

शाब्दबोधे पदज्ञानं करणं पदजन्यपदार्थस्मरणं व्यापारः, वृत्तिज्ञानं च सहकारिकारणं भवति। पदपदार्थयोर्यः खलु सम्बन्धः स वृत्तिरिति सर्वैः स्वीक्रियते। सम्बन्धस्तावत् सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धौ विषयत्रयं भासते विशेष्यं विशेषणं सम्बन्धश्च। घट इति विशिष्टबुद्धिः, तत्र विशेष्यो घटः, विशेषणं घटत्वम्, सम्बन्धश्च समवायः, यतो घट-घटत्वयोः सम्बन्धः समवायः। अत एव सम्बन्धलक्षणं भवति – विशिष्टबुद्धौ विशेष्यविशेषणातिरिक्त-विषयत्वं सम्बन्धत्वमिति। 'घटवद् भूतलम्' इत्यादौ संयोगरूपः सम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्टो घटनिरूपितसंयोगाश्रयो भूतलमिति

विशिष्टबुद्धिनियामकसम्बन्धः। अत एव गौरित्युक्ते सास्नादिमत्त्वं सामान्यकारेण बुद्ध्यारूढं प्रतीयते। तथैव घट इत्युक्ते कम्बुग्रीवादिमत्त्वम्। गौरित्युक्ते न प्रतीयते कोऽपि कम्बुग्रीवादिमत्पदार्थः, घट इत्युक्ते न कोऽपि सास्नादिमत्पदार्थो बुद्धिमवगाहते। अत एवात्र सिद्धं भवत्यस्ति कश्चच्छब्दविशेषेणार्थविशेष्यस्य सम्बन्धः, यथा गौरिति शब्दविशेषेण सास्नादिमत्त्वस्यार्थविशेषस्य। एतद्विषयेऽस्ति च न्याय एकसम्बन्धिज्ञानमपरसम्बन्धिनं स्मारयति। अत एकस्य सम्बन्धिनः शब्दविशेषस्य गौरित्यादेर्ज्ञानमपरं सम्बन्धिनमर्थविशेषात्मकं स्मारयति इत्यविरोधः। एतदेव मनसि निधाय वाक्यपदीयसम्बन्धसमुद्देशस्य अवतरनिकामेवं रचयति हेलराजः 'शब्दे नार्थस्याभिधाने सम्बन्धो हेतुः, अन्यथा सर्वं सर्वेण प्रत्याय्यतेति'। सम्बन्धज्ञानस्य शाब्दबोधे हेतुत्वमन्यैः सर्वैरपि तदङ्गीकृतम्। अत एव शाब्दबोधे सम्बन्धरूपशक्तिज्ञानस्य सहकारिकारणत्वं नैयायिकैरपि समुद्घोषितम्। अत एव पदार्थस्मरणे सम्बन्धज्ञानस्य महान् उपयोगो वर्तते। शब्दार्थसम्बन्ध एव शक्तिरित्यातिष्ठन्ते नैयायिकाः। पदार्थस्मरणञ्च शाब्दबोधं प्रति द्वारं व्यापारः। व्यापारश्च तज्जन्यत्वे सति तज्जन्यजनकत्वमिति। अर्थात् कारणजन्यत्वे सति कारणजन्यकार्यजनकत्वं व्यापारत्वम्, यथा दण्डजन्यत्वे सति दण्डजन्यघटजनकत्वं दण्डव्यापारत्वम्। अतः शक्तिज्ञानं शाब्दबोधार्थं व्यापाररूपेण कारणतया परम्परयापेक्षते। किन्तु शब्दार्थयोर्यः सम्बन्धोऽपेक्षितः स कीदृशो भवितुमर्हतीत्यत्र सन्ति बहुधा विप्रतिपत्तयः।

अथ गौरित्यत्र कः शब्द इति भाष्यकारेण पस्पशाह्निके प्रश्न उत्थापितः। तत्र गौः, अयं शुक्ल इति शब्दार्थयोरभेदेन लोके व्यवहारदर्शनाच्छब्दस्वरूपनिर्धारणाय पृच्छतीति। एवं तर्हि शब्दार्थयोस्तादात्म्यमेव सम्बन्धो भवतु इति उत्तरमायाति। सिद्धे शब्दार्थसम्बन्धे इति वार्तिकव्याख्यानप्रसङ्गेऽपि शब्दस्य, अर्थस्य, तयोः सम्बन्धस्य च

नित्यत्वप्रतिपादनमुखेन कीदृशं तत् सम्बन्धसरूपमित्यालोचितवन्तः पतञ्जलिकैयटादयः। शब्दार्थयोः सम्बन्धः खलु अनादिः, स्वाभाविकः, नित्यश्च। अस्य शब्दस्यायमर्थो वाच्योऽस्यार्थस्यायं शब्दो वाचक इत्यत्र या षष्ठी सा स्वाभाविकं किमपि शब्दार्थयोः सम्बन्धं सूचयति। अन्यत्र षष्ठ्यत्र नोपपद्यते। तस्याः सम्बन्धपरत्वमविसंवादितमेव। अस्य सम्बन्धस्य सद्भावे प्रमाणं भर्तृहरिणा प्रदर्शितम् –

"अस्यायं वाचको वाच्य इति षष्ठ्या प्रतीयते।
योगः शब्दार्थयोस्तत्त्वमात्यतो व्यपदिश्यते।।"

शब्दार्थयोः अभेदेन व्यवहारः प्रवर्तते। कीदृशो गौरिति पुत्रेण पृष्टः पिता यदायं गौरिति निर्दिशति तदायं अभेदसम्बन्धः स्पष्टं प्रतीयते। अत एव शब्दार्थयोः तादात्म्यमेव नैसर्गिकः सम्बन्ध इति वैयाकरणसिद्धान्तः। नैयायिकमते तादात्म्यसम्बन्धोऽभेदरूपः। किन्तु वैयाकरणमते भेदाभेदसमनियतरूपः। तदभिन्नत्वे सति तदभेदेन प्रतीयमानत्वं तादात्म्यम्।

न हि सर्वे शब्दाः सर्वत्र प्रयुज्यन्ते। शब्दविशेषादुच्चारितादर्थविशेषस्य प्रतीतिरुत्पाद्यते। अतो हि शब्दविशेषनिष्ठार्थविशेषप्रत्यायनयोग्यताकृत्रिमा - वसीयते। बहुप्रयत्नेनापि घटरूपेऽर्थे गोशब्दस्य प्रयोगः कर्तुं शक्यते तादृशः प्रयोगः असाधुः भवति। अत एव सरूपसूत्रभाष्ये पतञ्जलिनोक्तं – यो हि गामश्व इति ब्रूयात् अश्वं वा गौरिति न जातुचित् सम्प्रत्ययः स्यात्। एकस्मिन्नेवार्थे एकः शब्दः प्रयुज्यते, न सर्वेष्वर्थेषु सर्वेषां शब्दानां प्रयोगः। लोके ह्येकस्मिन् वृक्षः इति प्रयुज्यते, द्वयोः वृक्षौ इति, बहुषु वृक्षाः इति च। एवंविधस्य लौकिकस्य व्यवहारस्य दर्शनाद् एकशेषप्रत्याख्यानमेव युक्तमित्याक्षेपो भवति, यदि लोकः प्रमाणपदवीं गाहते। शब्दविशेषनिष्ठाया योग्यतायाः शक्तित्वं सम्बन्धत्वं चाधिकृत्य विरचितेयं हरिकारिका-

**तादात्मस्य शक्तिसम्बन्धत्वविचारः**

"इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।

अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।।"

न हि सर्वैरिन्द्रियैः सर्वे विषया गृह्यन्ते, अपि तु इन्द्रियविशेषेण विषयविशेषः। तथैव शब्दविशेषस्यार्थविशेषप्रत्यायननियमदर्शनात् तत्तच्छब्दविशेषनिष्ठा तत्तदर्थप्रत्यायनयोग्यता निश्चिता भवति। शक्तेर्नियामकतया कोऽपि सम्बन्धोऽभ्युपगन्तव्यो येन शक्तेः कार्यजनकत्वं नियमितमवस्थापितं वा भवति। शब्दार्थयोः कार्यकारणभावात्मकोऽपि सम्बन्धः सम्भवतीत्यपरः पक्षः। तदुक्तं भर्तृहरिणा –

"शब्दः कारणमर्थस्य स हि तेनोपजन्यते।

तथा च बुद्धिविषयादर्थाच्छब्दः प्रतीयते।।"

शब्दार्थयोः कार्यकारणभावोऽत्र उभयथा वर्णयितुं शक्यः। शब्दोऽर्थस्य कारणं भवति, अर्थोऽपि शब्दस्य। उच्चारितशब्दात् श्रोतुः विषयत्रयस्य ज्ञानं भवति। ते खलु शब्दस्य स्वरूपम्, बाह्यार्थः, ज्ञानञ्च। तथा चोक्तं भर्तृहरिणा-

"ज्ञानं प्रयोक्तुर्वाह्योऽर्थः स्वरूपञ्च प्रतीयते।

शब्दैरुच्चारितैस्तेषां सम्बन्धः समवस्थितः।।"

कार्यकारणभाव एव वाच्यवाचक-प्रत्याय्यप्रत्यायकसम्बन्धरूपेण कथितो भवति। तादात्म्यसम्बन्धवादिनः खलु वैयाकरणाः। वैयाकरणाः शब्दार्थयोस्तादात्म्यसम्बन्धं स्वीकुर्वन्ति। स च तदभिन्नत्वे सति तदभेदेन प्रतीयमानरूपः। स एव इतरेतराध्यासमूलकः। यः शब्दः स एवार्थः, योऽर्थः स एव शब्दः। स शब्दोऽध्यासमूलकः। न वास्तवः। अत एव लघुमञ्जूषाग्रन्थे तादात्म्यसम्बन्धस्य आलोचनावसरे नागेशेनोक्तम् – सङ्केतस्तु पदपदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थः योऽर्थः स शब्दः।

अध्यासवादिनां मते शब्दस्यार्थस्य चास्तित्वं वर्तते। किन्तु तयोरभेदज्ञानं न वास्तविकम्। शब्दार्थसम्बन्धस्य प्रवाहनित्यता वर्तते। अर्थाद् अनादिकालादारभ्य अयं वाच्यवाचकभावसम्बन्धः शब्दे अर्थे च वर्तते। अत एव वाक्यपदीयस्य स्वोपज्ञटीकायां व्याडिमतमुद्धृतम् –

"शब्दस्य न कर्तास्ति शब्दानां लोकवेदयोः।

शब्दैरेव हि शब्दानां सम्बन्धः स्यात् कृतः कथम्।।"

सिद्धे शब्दार्थसम्बन्धे इति वार्तिकेन सम्बन्धस्य नित्यत्वमभिहितम्। तत्रापि पस्पशाह्निके महाभाष्यकारेणोक्तं – सम्बन्धस्यापि व्यवहारपरम्परया अनादित्वान्नित्यता इति। न्यायमते पदपदार्थयोः सम्बन्धः खलु शक्तिः। किन्तु नागेशमते शक्तिर्न पदपदार्थयोः सम्बन्धः। अत एव लघुमञ्जूषाग्रन्थे तेनोक्तं - पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकभावापरपर्य्याया। अध्यासमूलकस्तादात्म्यसम्बन्धोऽनादिरित्यभिप्रायं प्रकाशयन्ति वैयाकरणाः। अत एव अध्यासस्य पौरुषेयत्वाच्छब्दार्थसम्बन्धस्यानित्यत्वमेव इति न वक्तुं युज्यते। शब्दार्थव्यवहारस्यानादित्वान्न हि स आधुनिकैः पुरुषैः कर्तुः शक्यते। यो घटो नास्ति स न दीपशतेनपि प्रकाशयितुं पार्यते। एवं वाचकस्य शब्दस्य वाच्येनार्थेन सह अविभागरूपः सम्बन्धः स्थित एव। अत एव स ईश्वरसङ्केतेन प्रकाश्यते। ईश्वरसङ्केतस्तावत् स्थितमेव शब्दार्थसम्बन्धं नित्यं न सृजति, अपि तु प्रकाशयत्येव। एवम्प्रकारेण ईश्वरसङ्केतो नित्यस्य शब्दार्थसम्बन्धस्य द्योतक एव। एवं रीत्या निपातोपसर्गयोरर्थद्योतकत्वमपि व्याख्यातुं शक्यते। अत एव उक्तं नागेशेन अयमध्यासः आदिव्यवहारकृदीश्वरकृत एव। आध्यासिकं तादात्म्यमेव मुख्यं वैयाकरणसिद्धान्तं मन्यमानाः केचिद् एवं वदन्ति शब्दार्थयोरभेदेन वर्णमालायाम् अर्थोपलब्धिः स्यात्, न च तथोपलभ्यते। शब्दार्थयोस्तादात्म्यस्वीकारे वह्निशब्दोच्चारणे सति दाहादिकमुत्पद्यते, न चोत्पद्यते। गुडशब्दोच्चारणे मधुरास्वादो भवेत्, न च तथा भवति। क्षुरशब्दोच्चारणे गण्डोत्पाटनं भवेत्, न च

तदस्ति। अत एव कथं शब्दार्थयोस्तादात्म्यम् इति शङ्का जायते। तत्र नागेशभट्टेन परमलघुमञ्जूषाग्रन्थे समाहितम् - यत्तु तार्किकाः शब्दार्थयोस्तादात्म्यस्वीकारे मधुरशब्दोच्चारणे मुखे माधुर्यरसास्वादापत्तिः वह्निशब्दोच्चारणे मुखे दाहापत्तिरित्याहुः। तन्न। भेदाभेदस्योपपादितत्वात्। नैयायिकमते शक्तेः स्वरूपम् एवं भवति – अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारा इदं पदमिममर्थं बोधयतु इत्याकारा वेश्वरेच्छा शक्तिः, लाघवात्। सैव संकेतः सम्बन्धः। इच्छा कदापि सम्बन्धो भवितुमर्हति, यतः सम्बन्धः खलु सम्बन्धिद्वयभिन्नत्वे सति द्विष्ठत्वे च सति आश्रयतया विशिष्टबुद्धिनियामकः, यथा घटवद् भूतलमित्यत्र संयोगरूपसम्बन्धः सम्बन्धिभ्यां भिन्नो द्विष्टो घटनिरूपितसंयोगाश्रयो भूतलमिति विशिष्टबुद्धिनियामकश्च तद्वद् घटशब्दं न इच्छावान्, तदर्थो वा इच्छावान्। अत एव नागेशेन परमलघुमञ्जूषाग्रन्थे उक्तम् तस्मात् पदपदार्थयोः सम्बन्धान्तरमेव शक्तिः वाच्यवाचकाभावापरपर्याया। एवं प्रकारेण वैयाकरणाः शब्दार्थयोः यः सम्बन्धः स वाच्यवाचकभाव एव इति वदन्ति। स सम्बन्धस्तादात्म्यरूपः स इतरेतराध्यासमूलकः, नित्यश्च। स सम्बन्धः इच्छारूपः इति नैयायिकमतं महाभाष्यकारेण, वाक्यपदीयकारेण, कैयटेन, नागेशेन, कौण्डभट्टेन च पुनः पुनः परीक्षीतं सिद्धान्तितञ्चान्यथेति दिक्।।

## तथ्यसूत्राणि—

१. वाक्यपदीयम्, सम्बन्धसमुद्देशः, हेलराजकृता.....(अस्पष्टमत्र)।

२. वाक्यपदीयम्, सम्बन्धसमुद्देशः, कारिका ३।

३. वाक्यपदीयम्, सम्बन्धसमुद्देशः, कारिका २९।

४. वाक्यपदीयम्, सम्बन्धसमुद्देशः, कारिका ३२।

५. वाक्यपदीयम्, कारिका ३/३/१।

६. लघुमञ्जूषा, शक्तिनिरूपणम्।

७. वाक्यपदीयम्, १/५, स्वोपज्ञवृत्तिः।

८. सिद्धान्तलघुमञ्जूषा, पत्राङ्कः ३८।

९. परमलघुमञ्जूषा, पत्राङ्कः ४२।

१०. परमलघुमञ्जूषा, पत्राङ्कः ३७।

**सहायकग्रन्थसूची—**

१. अष्टाध्यायी, डः तपनशङ्करभट्टाचार्यः, संस्कृत-वुक्-डिपो, कोलकाता, २००४।

२. कारिकावली, न्यायसिद्धान्तमुक्तावली, दिनकरी-रामरुद्रीव्याख्यासम्बलिता, अनन्तशास्त्री, निर्णयसागर-प्रेस्, मुम्बइ, १९१६।

३. काशिका, डः जयशङ्करलालत्रिपाठी, डः सुधाकरमालवीयः, तारा-वुक्-एजेन्सी, वाराणसी, १९८६।

४. न्यायसिद्धान्तमुक्तावली, किरणावलीटीकासम्बलिता, प. श्रीकृष्णबल्लभा - चार्य्यः, चौखम्बा-संस्कृत-संस्थानम्, वाराणसी, वि.सं. -२०६३।

५. परमलघुमञ्जूषा, प. कालिकाप्रसादशुक्लः, वड़ोदा-संस्कृत-महाविद्यालयः, वड़ोदा, १९६१।

६. पातञ्जलानां शब्दार्थचिन्ता, डः तपनशङ्करभट्टाचार्यः, संस्कृत-वुक्-डिपो, कोलकाता, २००५।

७. प्रौढमनोरमा, शब्दरत्न-भैरवी-भावप्रकाशसहिता, चौखम्बा-संस्कृत-सीरीज, वाराणसी।

८. लघुशब्देन्दुशेखरः, म. म. श्रीनित्यानन्दपन्तपर्वतीयः, चौखम्बा-संस्कृत-सीरीज, वाराणसी, १९५८।

९. लघुसिद्धान्तकौमुदी, डः तपनशङ्करभट्टाचार्यः, संस्कृत-वुक्-डिपो, कोलकाता, २००२।

१०. वाक्यपदीयम्, सम्पूर्णानन्दसंस्कृतविश्वविद्यलयः, वाराणसी, १९८०।

११. वैयाकरणभूषणसारः, दर्पणप्रभासहितः, चौखम्बा-संस्कृत-सीरीज-अफिस्, वाराणसी, १९६९।

१२. वैयाकरणसिद्धान्तकौमुदी, श्रीगोपालदत्तपाण्डेयः, चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, २००१।

१३. वैयाकरणसिद्धान्तलघुमञ्जूषा, नन्दितावन्द्योपाध्याय-सम्पादिता, संस्कृत-पुस्तक-भाण्डारः, कोलकाता, २००४।

१४. व्याकरण-दर्शनेर-इतिहास, गुरुपद-हालदारः, प्रकाशकः – भारती-विकाश-हालदारः, कोलकाता, १३५० बङ्गाब्दे।

१५. व्याकरण-महाभाष्यम्, दधिरामशर्मा, चौखम्बासुरभारती-प्रकाशनम्, वाराणसी, १९८८।

१६. शब्दकोस्तुभः, विन्ध्येश्वरीप्रसादद्विवेदी, गणपतिशास्त्रीमोकाटे, चौखम्बा-संस्कृत-सीरीज-अफिस्, वाराणसी, १९९१।

१७. शब्दशक्तिप्रकाशिका, जगदीशतर्कालङ्कारभट्टाचार्य्य, कोलकाता, १७६६ शकाब्दे।

# कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्

स्वरूपसिंहः

संसारस्यास्थिरत्वविषये चर्चा प्रायः सर्वत्रैव भवति। आस्तिको भवतु अथवा नास्तिकः – सर्वेषां मते संसारः परिवर्तनशीलः। कस्यापि पदार्थस्य दर्शनमद्यात्र भवति, श्वोऽन्यत्र भवति भिन्नरूपेण। एकत्र स्थितस्य पदार्थस्यापि कालान्तरे रूपगुणादीनां परिवर्तनं दरीदृश्यते। परिवर्तनमिदं कालोपरि तथा देशोपारि अधिष्ठितम्। एतादृशस्य कालिकस्स्य तथा दैशिकस्य परिवर्तनस्य कारणम्। तथा दैशिकस्य परिवर्तनस्य पृष्ठभूमिः खलु क्रिया। अतः क्रिया पदार्थानां परिवर्तनस्य कारणम्। तया क्रियया सह येषां सम्बन्धः तेषां कारकत्वमित्यभिधा। अथवा क्रियायाः साधकं निर्वर्तकं वा कारकमिति। अर्थात् क्रियानिष्पादकत्वं कारकत्वम्। क्रियानिमित्तत्वं कारकत्वमिति लक्षणं कलापव्याकरणे प्राप्यते। तत् कारकं खलु षड्विधम्। षड्विधेषु कारकेषु कर्मकारकमन्यतमम्। कर्मत्वस्य स्वरूपनिर्णये नैयायिकाः तथा शाब्दिकाः स्वस्वमतमुपस्थापितवन्तः। तत्पूर्वं कर्मपदस्य व्युत्पत्तिं प्रदर्शयति।

**व्युत्पत्तिः**

‘डुकृञ् करणे’ इति तनादिगणीयोभयपदिधातोः भाववाचकमनिन्-प्रत्यये[१] कर्मन्-शब्दो जायते। एवं भाववाचकार्थे पदार्थविशेषो वर्तते वैशेषिकदर्शने। परन्तु भावेतरार्थेऽपि अस्य निर्वचनजन्यार्थः प्राप्यते। यत्तु दर्शनशास्त्रे विशेषतः आचारशास्त्रे एवं कथ्यते ‘क्रियते फलार्थिभिरिति कर्म धर्माधर्मात्मकम्’[२] इति।

**कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्**

कार्यार्थे कर्मशब्दस्य नैके विभागाः उपलभ्यन्ते विविधशास्त्रे। तत्र तन्त्रे शान्तिकरणं, वशीकरणं, स्तम्भनं, विद्वेषणं, उच्चाटनं, मारणञ्चेति षट् कर्माणि प्रसिद्धानि, हठयोगे धौति-वस्ति-नेति-नौलिक-त्राटक-कपालभातिप्रभृतीनि कर्माणि। धर्मशास्त्रे नित्यकर्म, काम्यकर्म, नित्यकाम्यकर्म चेति त्रिविधानि कर्माणि। पूर्वमीमांसायां नित्यं, नैमित्तिकं, काम्यञ्चेति त्रिविधानि कर्माणि। पूर्वमीमांसायां नित्यं नैमित्तिकं काम्यञ्चेति त्रिविधानि, वेदान्तेऽपि संचित—प्रारब्ध-क्रियमाणभेदेन कर्म त्रिविधम्। सर्वत्रैव एतदेव विग्रहः कर्मशब्दस्य – 'यत्क्रियते तदिति'। शास्त्रान्तरे केवलं कृ-धातुना सहैव कर्मणः सम्बन्धः तथा तेनैव लौकिको व्यवहारोऽपि चलति। परन्तु व्याकरणे सर्वैः सकर्मकधातुभिः तथा क्वचित् अकर्मकधातुभिः सह कर्मणः सम्बन्धं स्वीकृतवन्तः। किञ्च, अस्य धातोः रूपान्तरं 'करोति' इति रूपेण भवितुमर्हति।

भावार्थकस्य कर्मशब्दस्य कार्यार्थे प्रयोगः अत्यन्तं सुप्रसिद्धः। संस्कृते सर्वैः धातुभिः (सकर्मकेभ्यः अकर्मकेभ्यो वा) सह भाववाचकं प्रत्ययं संयोज्य 'करोति' – क्रियायाः कर्मरूपेण व्यावहारः प्रचलितः। यथा – दानं करोति (ददाति), अध्ययनं करोति (अधीते), शयनं करोति (शेते), लज्जां करोति (लज्जते)। अत्र सर्वत्रैव भावरूपोऽर्थस्तथा कर्मरूपोऽर्थः अक्षुण्णः। एतेनैव तथाकथितस्य कर्मशब्दस्य प्रयोगे भ्रम आयाति। परन्तु वास्तवे भ्रान्तिरियं नास्ति। कारणं कर्मशब्दस्य प्रयोगः 'भावे' भवतु अथवा 'कर्मणि', उभयत्रैव लक्ष्यं भवति उपर्युक्तप्रकारं समानमेव। स्वयं पाणिनिनैव कर्मणः लक्षणं कार्यरूपे व्यापकार्थे व्यवस्थितं कृत्वापि तस्य प्रयोगः क्रियारूपेऽर्थे कृतः। यथा – 'कर्मव्यतिहारे णच् स्त्रियाम्'[३]। अत्र काशिकायां क्रियतेऽर्थः – 'कर्म क्रिया, व्यतिहारः परस्परं करणम्' इति। किञ्च, 'कर्माध्ययने वृत्तम्'[४] इति सूत्रस्य अर्थः काशिकायां प्राप्यते – 'एकमन्यदध्ययने कर्म वृत्तमस्य एकान्यिकः।... यस्याध्ययने नियुक्तस्य परीक्षाकाले पठतः स्खलितमपपाठरूपमेकं जातं स उच्यते एकान्यिक इति"। अत्र स्खलनक्रियार्थे कर्मशब्दस्य प्रयोगः। एवं

'गुणवाचनब्राह्मणादिभ्यः कर्मणि च'[५] इति सूत्रे कर्मशब्दः क्रियावचनः। जडस्य भावः कर्म वा जाड्यम्' इति। अत्र सूत्रे भाव-क्रिययोः मध्ये भेदो दृश्यते।शब्दस्य प्रावृत्तिनिमित्तमेव भाव-शब्देन कथ्यते। क्रियायाः अवस्थाविशेषोऽत्र न भावः इति। कारणं तेन 'कर्मणि' इत्यस्य आवश्यकता नास्ति।[६]

**ईप्सिततमं कर्म**

पाणिनिना अष्टाध्याय्यां कर्मलक्षणं प्रदत्तम् – 'कर्तुरीप्सिततमं कर्म'[७] इति। अस्यार्थो हि कर्ता स्वीयक्रियया येन सह अधिकतया सम्बन्धुम् इच्छति तदेव कर्म। यथा कटं करोति, ग्रामं गच्छति – इत्यादिषु करोतिक्रियया कटेन तथा गच्छतिक्रियया ग्रामेण सह कर्ता सम्बन्धुमिच्छति, इत्यतः तयो: कर्मता।

ईप्सितशब्दस्य व्युत्पत्तिस्तावत् – आप्-धातो: इच्छार्थे सन्-प्रत्यये, 'आप्ज्ञप्यृधामीत्'[८] इति सूत्रानुसारं आकारस्य ईत्वे, 'सन्यङो:'[९], 'अजादेर्द्वितीयस्य'[१०] इति सूत्रद्वयसहकारेण 'प्स' इत्यस्य लोपे, ईप्स इति जाते, 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रानुसारं वर्तमाने क्त-प्रत्यये, इडागमे ईप्सितशब्दो निष्पन्नः। ईप्सित-शब्दस्य अर्थद्वयं वर्तते –रूढार्थः यौगिकार्थश्च। अभीष्टार्थे शब्दोऽयं रूढ:, रूढार्थे सत्त्वेऽपि अत्र यौगिकार्थो गृहीत:। आप्-धातोऽत्र फलाश्रयत्वरूपसम्बन्ध:। सन्-प्रत्ययार्थ: इच्छा। क्त-प्रत्ययार्थस्तु उद्देश्यतारूपविषयता। कर्तुरर्थ: धात्वर्थव्यापाराश्रय:। अत: ईप्सितशब्दस्यार्थो हि – सम्बन्धुमिष्यमाणम्। केन सह सम्बन्धुमिष्यमणमिति आकाङ्क्षायामुच्यते – कर्तृ-पदस्य विशेषेणमेवात्र करणरूपेण अन्वितं भवति। तद्विशेषं खलु व्यापार:। तेन निष्कर्षार्थ आयाति – कर्त्तृवृत्तिव्याप्यारप्रयोज्यफलाश्रयेच्छोद्देश्यं कर्म इति। अर्थात् कर्तृगतो यो व्यापार:, तेन उत्पाद्यस्य फलस्य आश्रयकविषयकेच्छाया: उद्देश्यं कर्म। यथा देवदत्तः तण्डुलं पचति इत्युदाहरणे देवदत्तः कर्त्ता। तत्र विक्लित्त्यनुकुलव्यापारोऽस्ति। तेन व्यापारेण उत्पाद्यं यत् विक्लित्तिरूपं फलम्,

तस्य फलस्याश्रयरूपेण या तीव्रेच्छा, तस्या इच्छाया: उद्देश्यं हि तण्डुलादय:। अत: तत्रैव वाक्यस्य कर्मतेत्यत्र नास्ति संशयः।

इदानीं प्रश्न: ईप्सितशब्दस्य यौगिकार्थस्वीकारे किं तावत् प्रमाणम्? अत्र प्रमाणं खलु 'वारणार्थाणामीप्सित:'[१३] इति। अस्य सूत्रस्य भाष्ये पतञ्जलिना कथ्यते यत् – 'माषेभ्यो गां वारयति' भवेद् यस्य माषा न गाव:, तस्य माषा ईप्सिता:, यस्य खलु गावो न माषा कथं तस्य माषा ईप्सिता:' इति। वस्तुत: सुखप्राप्ते: दु:खनिवृत्तेर्वा साधनं हि ईप्सितशब्दार्थ:। अतएव माषकर्तु: माषा: विनष्टाश्चेत् तस्य दुःखं भवति। तस्मादेव दु:खनिवृत्त्यर्थं माषक्षेत्रात् गां वारयति। एतदर्थमेव एवं प्रयोग: - 'माषेभ्यो गां वारयति' इति। परन्तु, अत्र लक्षणीयमेतत् यत् अपरेषां माषान् गौ:भुङ्क्ते चेत् दु:खं न भवति। अस्मिन् प्रसङ्गे उक्तवाक्यस्य प्रयोघो न भवति, कारणं तत्र माषा ईप्सिताः न भाष्ये ईप्सितशब्दस्य अभिप्रेतरूपं रूढार्थं गृहीत्यैव पूर्वपक्ष: क्रियते। अस्योत्तरमायाति - 'तस्यापि माषा ईप्सिता एव' इति। अत्र एतादृशस्योत्तरस्य श्रवणे एतत् सूचितं यत् ईप्सितशब्दो यौगिकार्थे गृहीतो न तु रूढार्थे। एवम् 'अग्नेर्माणवकं वारयति' इत्यादावपि अग्नि: माणवकस्य ईप्सित: (अभीप्सित:) भवितुं नार्हति। परन्तु पूर्वोक्तप्रकारेण फलाश्रयत्वरूपेण इच्छाया उद्देश्यम् अवश्यमेव भवेत्।

पुन: प्रश्नो भवति कर्मसंज्ञाविधायके सूत्रे 'कर्तु:' इति पदस्य आवश्यकता अस्ति न वा ? वस्तुत: 'कर्तु:' इति पदस्यार्थ: धात्वर्थव्यापाराश्रयत्वम् इति। तत्र विशेषणव्यापारेण सम्बन्धुमिष्यमाणस्य यथा कर्मसंज्ञा स्यात्तदर्थं 'कर्त्तु:' इत्ति पदस्य प्रयोजनम्। परन्तु तत् 'कारके' इति पदस्याधिकारेणैव सिद्धं भवेत्। कारकपदस्यार्थ: क्रियानिर्वर्तकत्वमिति। अर्थात् य: क्रियां निष्पादयति। क्रियानिष्पादको नाम कर्ता, पुन: कर्ता नाम धात्वर्थव्यापाराश्रय: इति। अत: केनाप्तुमिष्टतमम् इत्युच्यमाने पूर्वोक्तप्रकारेण कारकपदार्थस्य विशेषणीभूतव्यापारेण सम्भवति। तदर्थं 'कर्तु:'

इत्यस्य नास्ति प्रयोजनम्? अत्र दीक्षितमहोदय: उत्तरयति – 'कर्त्तु: किं माषेष्वश्वं वध्नाति' इति। वस्तुत: कारकपदेन कर्त्रर्थस्य लाभो भवति, किञ्च, धात्वर्थव्यापाराश्रयत्वात् व्यापारार्थस्य लाभोऽपि सम्भवेत्, परन्तु सर्वेषां कारकाणां स्व-स्व-व्यापारे कर्तृत्वमस्ति। अत: अत्र प्रत्युदाहरणे अश्व: यद्यपि कर्म तथापि स भक्षणानुकूलव्यापारस्याश्रयरूप: कर्त्ता। तेन एतादृशेन व्यापारेण सम्बन्धुमिच्छापि अश्वस्य अस्ति। तस्मात् अश्वगतभक्षणानुकूलव्यापारजन्यफलेच्छाया: विषयत्वात् माषस्यापि कर्मताप्राप्ति: दुर्वारा। माषक्षेत्रे गमनोन्मुखस्य अश्वस्य माषभक्षणजनितोदरव्यथादयपीडा यथा न स्यात्तदर्थम् अश्वस्य अन्यत्र वन्धनव्यवस्था। अस्मिन् प्रसङ्गे एव 'माषेष्वश्वं वध्नाति' इति प्रयोग: वाक्येऽस्मिन् प्रयुक्ते माषे उपर्युक्तव्यापारजन्यफलेच्छाया उद्देश्यत्वस्य विद्यमानत्वात् कर्मत्वप्रसङ्ग: इत्यत: तद्वारणाय 'कर्त्तु:' इति पदं कारकलक्षणे योजितम्। कारकपदेन कर्तृत्वस्य सिद्धेऽपि 'कर्त्तु:' इति पदेन प्रकृतधात्वर्थव्यापाराश्रयरूपस्वातन्त्र्यस्योपलक्षणं विहितम्। केवलं धात्वर्थव्यापाराश्रयत्वम् इत्यत्र प्रकृतशब्दस्य ग्रहणं यथार्थमेव। अर्थात् यस्य वाक्यस्य प्रयोगो भवति तद्वाक्यगतधातो: यो व्यापार: तद्रूपव्यापारप्रयोज्यफलाश्रयं कर्म इति।

उपर्युक्तोदाहरणे प्रकृतधातो: (वन्ध्-धातो:) अर्थ: वन्धनानुकूलो व्यापार:। देशान्तरसञ्चारविरोधिशंकुसंयोगानुकूलव्यापारजन्यफलं शंकुसंयोग:। तत्तु अश्वे एव विद्यते। तेन तस्य कर्मसंज्ञा। किन्तु अश्वगतभक्षजणानुकूलव्यापार: प्रकृतधातो: अर्थो नेति। तस्मात् तद्ग्रहणाभावात् माषस्य न कर्मता।

अत्र एवमपि प्रश्नो भवितुमर्हति यत् 'माषभक्षणेन पुष्टिर्जायताम्' इति धिया अश्वबन्धनं क्रियते चेत् तत्रापि एवं प्रयोग: माषेषु अश्वं वन्धातीति। अत्रापि प्रकृतधात्वर्थ: पूर्वोक्तबन्धनानुकूलव्यापार:, तद्व्यापारप्रयोज्यं फलं भवति अश्वेन सह

माशाणां गलविवरसंयोग:। तदाश्रयरूपेण इच्छाया उद्देश्यं भवति यथा अश्व: तथा माषोऽपि। अत: अश्ववत् माषाणामपि कर्मतापत्ति:। अत्रोच्यते व्यापारो यथा प्रकृतधात्वर्थरूपेण गृहीत:, तद्वत् फलमपि प्रकृतधात्वर्थरूपेण गृहीत: स्यात्। तेन कर्मण: सम्पूर्णं लक्षणं भवति – 'प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थ - फलाश्रयेच्छोद्देश्यत्वम्' इति। अत्र बन्ध्-धातोरर्थ: बन्धनानुकूलव्यापार:। व्यापारोऽयं परम्परासम्बन्धेन गलविवरसंयोगरूपो भवत्यपि न बन्ध्-धातो: साक्षात् अर्थ:। अत्र शंकुसंयोग एव धातो:प्रकृतं फलम्। अत: तादृशस्य फलस्य आश्रयेच्छोद्देश्यं माषा भवितुं नार्हन्ति। तेन तेषां कर्मसंज्ञा।

इत:परं तमप: सार्थक्यं प्रतिपादयता दीक्षितेनोदीरितं – 'तमप्ग्रहणं किम्? पयसा ओदनं भुङ्क्ते'[१५] इति। कस्यापि जनस्य भोजने सम्पन्नेऽपि पुन: भोजने प्रवृत्त्यर्थं वाक्यस्यास्य प्रयोग:। आकण्ठभोजनादपि दुग्धप्राप्त्यर्थं पुन: भोजनप्रवृत्ति:।अस्यायामवस्थायां दुग्धे भोजनरूपं फलं नास्ति अर्थात् कण्ठेन सह तस्य संयोगो नास्ति किन्तु उद्देश्यं वर्तते। तस्मादेव तदुद्देश्यस्य यथा कर्मसंज्ञा न भवेत्तदर्थं सूत्रे तमप्प्रयोग:। दुग्धेच्छया प्रवृत्तिर्यत्र तत्र हेत्वर्थे एव तृतीया। पुन: केषाञ्चिन्मते दुग्धं तावत् संस्कारगुणविशेष:। तत्र भोजनकर्त्तु: अधिकेच्छा नास्ति, स्याच्चेत् केवलं दुग्धं पीत्वैव क्षान्तो भवेत्। अत: ओदनमेव तत्र ईप्सिततमं, दुग्धमेव प्रकृष्टोपकारकम्।

एतत्तु न समीचीनम्। तमप: प्रयोजनं खलु 'अग्नेर्माणवकं वारयति' इत्यत्र 'अग्नि' इति ईप्सितस्य यथा कर्मसज्ञा न भवेत्तदर्थम्। यदि वारणार्थानां धातूनां प्रयोगेऽपि कर्मसंज्ञा स्यात्तर्हि 'वारणार्थानामीप्सित:'[१६]इति सूत्रस्य निरावकाशत्वात् अपवादत्वम्। अपवादे सति 'अग्नेर्माणवकं वारयति' इत्यत्र अग्निमाणवकयो: उभयोरेव अपादानत्वम्। तत्परिहारार्थमेव कर्मविधायकसूत्रे तमप: प्रयोजनम्। तेन माणवकस्य ईप्सिततमरूपेण विवक्षितत्वात् कर्मत्वम्, अग्ने: ईप्सितमात्रत्वात्

अपादानत्वं निर्बाधं सिद्धयेत्। वस्तुत: ईप्सिततमपदे तमप्ग्रहणेन प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रयेच्छोद्देश्यं गृहीतं भवति। किन्तु ईप्सितपदेन प्रधानोऽप्रधानो वा धात्वर्थ: फलाश्रयरूपेण इच्छाया विषयो भवति। तेन वार्-धात्वर्थो हि – संयोगानुकूलव्यापारस्य अभावानुकूलव्यापार:। संयोगानुकूलव्यापारोऽस्ति वारणकर्तरि। तदेवात्र प्रधानम्। तस्याश्रयरूपेण इच्छोद्देश्यं माणवक:। अत: तत्र ईप्सिततमत्वात् कर्मत्वम्। माणवकवृत्ति: अग्निना सह संयोगार्थं यो व्यापार:, तस्य फलसंयोगस्याश्रयविषयकेच्छाया: उद्देश्यं खलु अग्नि:। अत: अग्ने: ईप्सितत्वात्, अपादानत्वम्। एवम्प्रकारेण 'ईप्सिततमं' तथा ईप्सितम् इत्युभयौ एव यौगिकशब्दौ, न अभिप्रेतार्थकौ इति।

**अनीप्सितं कर्म–**

कर्मसंज्ञाया: पाणिनिकृतं द्वितीयं सूत्रं हि 'तथायुक्तं चानीप्सितम्'[१६] इति। अस्यार्थप्रसङ्गे दीक्षितेन वैयाकरणसिद्धान्तकौमुद्या: कारकप्रकरणे वृत्ति: कृता – 'ईप्सिततमवत्क्रिययायुक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात्' इति। अत्र सूत्रे तथेति पदं सादृश्यवाचकभिन्नं पदम्, न तु युक्तपदेन सह समासवद्धम्। तथाह्युक्तम् – "तथाशब्दस्य सादृश्यवाचकस्य प्रतियोगिसापेक्षत्वादाह – 'ईप्सिततमवदिति। पूर्वसूत्रे सन्निहितत्वादीप्सिततममेव सादृश्यप्रतियोगीति भाव:"[१७] उदाहरणेन स्पष्टीक्रियते – 'राम: गङ्गां स्पृशति' इत्यनेन बोध्यते यत् राम: गङ्गया सह संयोगं करोति। अत्र स्पृश्धातोरर्थ: संयोगानुकुलव्यापार:। एतादृशस्य व्यापारस्य फलं हि संयोग:, तस्य आश्रय: गङ्गा। अत: केवलं गङ्गैव अस्मिन् वाक्ये क्रियाजनितफलस्याश्रय:। गङ्गा न केवलमाश्रयमात्रमपि तु संयोगरूपफलाश्रयरूपेण रामस्योद्देश्यम्। तेन गङ्गाया ईप्सिततमत्वम्। परन्तु 'ग्रामं गच्छन् तृणं स्पृशति' इत्यत्र तृणपदस्स्य न ईप्सिततमत्वम्। कारणं तत्तु न स्पर्शक्रियाया इच्छाया: विषय:। य: ग्रामं गच्छति स इच्छावशादेव तृणं स्पृशति एवं

न। 'तृणस्पर्शं भवतु मम' एवमभिप्रायोऽपि नास्ति तव। अत: तृणस्य अनीप्सितत्वम्। परन्तु अत्र ईप्सिततमवत् क्रियाजनितफलमस्त्येव। तर्हि निष्कर्षार्थ: एवमायाति यत् – 'गङ्गां स्पृशति' इत्यत्र गङ्गा ईप्सिततमम्, कारणं सा खलु स्पर्शोच्छाया: उद्देश्यम्। पुन: 'ग्रामं गच्छन् तृणं स्पृशति' इत्यत्र तृणं न ईप्सिततमं, स्पर्शेच्छाया: उद्देश्यत्वाभावात्।

## द्वेष्यं तथा उदासीनं कर्म –

सूत्रेऽस्मिन् अनीप्सितशब्दान्तर्गतनञा अर्थद्वयस्य सम्भावना। एकं तावत् प्रसज्यप्रतिषेध:, अपरं पर्युदास:। कस्यापि विधानं कृत्वा तस्य निषेध: क्रियते चेत्, प्रसज्यप्रतिषेध: भवति।[१८] यथा 'न गच्छेत्' इत्यत्र विध्यात्मकोऽर्थ: गौण:, निषेधस्तु मुख्य:। अनीप्सितशब्दस्य 'न ईप्सितम्' इत्येवं व्याख्यानं क्रियते चेत् प्रसज्यप्रतिषेधो भवति, तेन केवलं द्वेष्यपदार्थमात्रस्यैव अनीप्सितेति संज्ञा। कारणं द्वेष्यस्य ईप्सितेन सह साक्षात् विरोध:। एवं यत्र विद्यात्मकस्यैव प्राधान्यं तथा निषेधस्याप्रधानता तत्र पर्युदास:।[१९] यथा –'अब्राह्मणो गच्छति' इत्यत्र गमनानुकूल:" ब्राह्मणसदृश: कश्चन। 'अनीप्सितशब्दस्यापि 'ईप्सितात् भिन्नम्' इत्येवमर्थ: क्रियते चेत् देष्योदासीनयोरपि निर्वाधमनीप्सितसंज्ञा। महाभाष्यकारेणात्र द्वेष्योदासीनयो: उभयोरेव ग्रहणं कृतम्। कैयटाचार्येणापि समर्थितम्। एवम्प्रकारेणात्र परिवर्तिन: आचार्या: अनीप्सितपदेन उभयोरेव ग्रहणं चक्रु:। दार्शनिकानां दृष्टौ द्वेष्यपदार्थे दु:खस्य भावो वर्तते, यत्खलु सांख्यमतानुसारं रजोगुणोद्रेकद्वारा व्यक्तं भवति। उदासीनं कर्म मोहस्वभपतमोगुणोद्रेकद्वारा व्यक्त्तं भवति। ईप्सिततमे अवश्यमेव सुखात्मकता अर्थात् सत्त्वोद्रेको भवति, अन्यथा तत्प्राप्तुमिच्छा न भवेत्।[२०]

अनेन सूत्रेणैव 'विषं भक्षयति' इति वाक्यस्थितविषयपदस्य कर्मता। अत्र तु एका पृथग् वार्ता वर्तते। यद्यपि विषद्रव्यं सर्वेषाम् अनीप्सितं तथा द्वेष्यम्।

विषभक्षणे प्राणहानिर्भवति इति धिया कोऽपि न भक्षयति। तथापि क्वचित् विषभक्षणमपि ईप्सिततमं भवति, यत्र आत्महत्या एव भक्षणकर्त्तुः अभिप्रायः।[२१]

## न्यायदर्शने कर्मविवेचनम्-

पूर्वमेवोक्तं यत् कर्मणः सम्बन्धः धात्वर्थफलेन सह। क्रियायाः फलविषयकचर्चा पाणिनिना – 'स्वरितञितः कर्त्रभिप्राये क्रियाफले'[२२] इति सूत्रे कृता। तदेव फलं यत् खलु धात्वर्थजन्यं तथा कर्तृवाचकप्रत्ययानां समीपे धात्वर्थं प्रति विशेषणम्।[२३] सर्वैः ज्ञायते यत् पचतिक्रियायाः फलं हि विक्लित्तिः। या खलु पाकक्रियाद्वारा उत्पन्नयोग्या। पुनः कर्तृवाचकतिप्प्रत्ययसमीपं धत्वार्थविशेषणम्। येन विक्लित्तिजनिका क्रिया एवं कथ्यते। एतत्तु अवधेयं यत् कर्मवाचकप्रत्ययसमीपं फलं तु विशेष्यं, न तु विशेषणम्।

अत्र जयन्तभट्टेन न्यायमञ्जर्यां प्रतिपादितं यत् कर्म क्रियाद्वारा सम्पाद्यं भवति। तेन फलरूपेण तस्य भानत्वात् न कारकत्वम्। क्रियया व्याप्तपदार्थः फलमेव भवति। क्रियासम्पादकत्वधर्माभावात् न तस्य कारकत्वम्। कारणं कारकसामान्यलक्षणं हि – क्रियासम्पादत्वमेव। जयन्तभट्टेन तु क्रियाजन्यरूपेण कर्मणः ग्रहणं क्रियते, न तु फलाश्रयरूपेण।

पुरुषोत्तमदेवेनात्र समाधानं दीयते कारकचक्रे। तेनोक्तं कर्त्ता क्रियया यं व्याप्तं कर्तुमिच्छति तदेव कर्म। अतः सर्वेषां कर्मणि स्वगतव्यापारोऽस्ति। स व्यापार एव कारकत्वं घटयति। तत्र यः पदार्थः उत्पद्यते तस्य उत्पत्तिक्रियां प्रति कर्तृत्वम्, पुनः तदन्तरं तस्य कर्मत्वं सिध्यति। यथा 'कटं करोति' नाम कटम् उत्पद्यमानम् उत्पादयति। भवत्यर्थस्य यः कर्ता करोतेः कर्म जायते। पुरुषोत्तमदेवेन कथ्यते यत् कर्मणि स्वगतक्रियायाः कर्तृत्वम् अव्यश्यमेव स्वीकरणीयम्। अन्यथा पाणिनेः 'कर्मवत्कर्मणाः तुल्यक्रिया" इति सूत्रं निरर्थकं भवति। अत्र पुरुषोत्तमदेवेन केचन श्लोका उद्धृताः। तथाहि –

**कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्**

"निर्वर्त्यकारकं नैव क्रिया तस्य हि साधिका।

विकार्यमपि भावेन विरोधान्नैव कारकम्॥

प्राप्यत्वात्पूर्विकावस्था न सा कर्म बुधैर्मता।

प्राप्यावस्था क्रियासाध्या साध्यत्वात् साधनं न हि॥

आत्मलाभे हि भावानां कारकापेक्षिता भवेत्।

लब्धात्मनां सकार्येषु प्रवृत्तिः स्वयमेव हि॥" इति।

**नव्यन्याये कर्मत्वविवेचनम्–**

नव्यन्यायस्य प्राचार्याः बहुधा कर्मत्वस्य विवेचनं कृतवन्तः। तत्र नव्यवैयाकरणैः अपि पूर्वपक्षरूपेण नैयायिकानां मतं बहुभावेन उद्धृतम्। अत्र सामान्यरूपेण नैयायिकसम्मतं कर्मलक्षणम् आलोच्यते।

(१)**करणव्यापारविषयः कर्म–** चूडामणिकृतन्यायसिद्धान्तमञ्जर्याः न्यायसिद्धान्त - प्रदीपटीकायां शशधराचार्येण लक्षणस्य स्थापना कृता। न्यायस्यान्यग्रन्थे विशेषतः तत्त्वचिन्तामणौ, कारचक्रेऽपि पूर्वपक्षरूपेणास्य लक्षणस्य निर्देशः दृश्यते। नव्यवैयाकरणा अपि कर्मविषयकमतप्रतिष्ठानावसरे पूर्वोक्तलक्षणस्योल्लेखं कृतवन्तः।[२५] करणकारकव्यापारविषयो नाम करणेन उत्पन्ना या क्रिया तस्याः अनुकुलव्यापारस्य विषयः एव कर्म। यथा 'दात्रेण धान्यं लुनाति ' इत्युदाहरणे दात्रं हि करणम्। तेन उत्पन्ना या छेदनक्रिया, तस्याः छेदनक्रियायाः अनुकुलसंयोगरूपव्यापारस्य आश्रयो भवति धान्यम्। अतः तस्यैव कर्मत्वम्। क्रियानुकुलो यो व्यापारः स खलु अवश्यमेव करणजन्यः स्यात्। नोचेत् व्यापारस्य आश्रयो न केवलं कर्म भवेत् अपि तु तत्र कर्तुः करणस्यापि ग्रहणं भवेदिति। कारणं कर्मातिरिक्तस्य करणस्य तथा कर्तुः उभयत्रैव क्रियानुकूलव्यापारत्वमस्ति। करणजन्यमिति विशेषणं योज्यते चेत् अतिव्याप्तिदोषस्य निराशो भविष्यति । यतो

हि करणजन्यसंयोगादिव्यापार: केवलं कर्मणि एवास्ति। अस्मिन् लक्षणे दोषं दर्शयति कारकचक्रकार: आचार्य: भवानन्द:। तथाहि –

> “कर्मवत्त्वं न करणव्यापारत्वं, तद्धि करणजन्यक्रियानुकूलव्यापाराश्रयत्वं, तच्च दात्रेण धान्यं लुनातीत्यादौ हस्तादिकरणव्यापारे दात्रेऽतिव्याप्तम्”[२६] इति।

अर्थात् क्रियानुकुलं यत् करणं तज्जन्यो यो व्यापारस्तस्य आश्रय: एव कर्म इति चेत् ‘दात्रेण धान्यं लुनाति’ इत्यादिप्रयोगस्थले दात्रेण सह हस्थस्य संयोगरूप: यो व्यापार: तस्याश्रयत्वं दात्रेऽपि सत्त्वात् दात्रस्य कर्मतापत्तिरिति।

(२)**क्रियाजन्यफलशालित्वं कर्मत्वम्**– कर्मत्वस्य एतादृशं लक्षणं प्राचीननैया - यिकानामिति अनेकत्र निर्दिष्टमस्ति। यद्यपि भवानन्देन कारकचक्रेऽस्योल्लेखो न कृत:, तथापि व्युत्पत्तिवादे गदाधरभट्टाचार्येणास्य विस्तृतं विवेचनम् उपस्थापितम्। अन्ततो मत्वा ‘इति प्राचीनपथपरिष्कारप्रकार:’ इत्यक्त्वा प्रस्तुतलक्षणस्वीकारे अभिमतं न प्रदर्शितम्। वैयाकरणभूषणे नैयायिकमतरूपेण तथा परमलघुमञ्जूषायां तार्किकाणां पूर्वपक्षमतरूपेण लक्षणमिदमुद्धृतम्। नव्यन्यायस्य कारकप्रकरणे आदावेवास्य लक्षणस्यालोचना दृश्यते। तस्मात् एतत्तु नैयायिकसम्मतं कर्मलक्षणमिति सर्वै: स्वीक्रिय्यते। तथाहि –

> “कर्मत्वञ्च क्रियाजन्यफलशालित्वम्, तत्र क्रिया धातुत एव लभ्यन्ते, जन्यजनकभावस्य च विनैव पदार्थत्वं संसर्गमर्यादया भानं सम्भवतीत्ति फलमत्रं कर्मप्रत्ययार्था:।”[२७]इति।

लक्षणेऽस्मिन् यथार्थता एतादृशी अस्ति यत् नव्यन्याये कर्मविवेचनस्य आधाररूपेण मतवादोऽयं गृह्यते। धातोरर्थ: व्यापार:, क्रियाया बोधोऽपि धातुत एव भवति। अत: धात्वर्थरूपव्यापारेण उत्पाद्यं यत् संयोगादिफालं तस्य धारयिता अर्थात् आश्रय एव

कर्म इति। 'ओदोनं पचति' इत्युदाहरणे अस्य संघटनं सम्यक् भवति।

गदाधराचार्येण लक्षणमिमं पूर्णतया विश्लिष्य प्राचीनाचार्यान् प्रति श्रद्धावशादेव समर्थ्यते। परन्तु वैयाकरणा: अत्र न्यायदृष्टौ दोषमुद्भावयन्ति। गङ्गेशोपाध्यायस्यापि लक्षणेऽस्मिन् अन्यथा दृश्यते, कारणं तेन 'परसमवेत' इत्यंश: योजित:। अत्रापि अतिव्याप्तिदोष: विद्यते। 'ग्रामं गच्छति' इत्यत्र गमनक्रियया उत्पन्नं संयोगरूपफलं, तस्याश्रय: न केवलं ग्राम: अपि तु कर्तरि अपि तत्संयोगोऽवस्थित:। यथा ग्रामरूपकर्मणि तथा कर्तर्यपि विद्यते। तेन लक्षणमिदं यथा कर्मपदं व्याप्तं करोति तथा कर्तृपदमपि व्याप्तं करोति। अत्र संयोगरूपफलं सम्बन्धिद्वयी समानभावेन विद्यमानात् 'चैत्रश्चैत्रं गच्छति' एतादृशमसङ्गतरूपफलस्यापि आश्रयत्वात् कर्म। परन्तु वास्तवे एतत् भवितुं नार्हति, कोऽपि अर्थश्च न आयाति। पाणिनिव्याकरणे अस्य समाधानां सूत्रकारेण सम्यक् निर्देशितं सूत्राणां यथार्थसन्निवेशेन। ग्रामस्य तथा चैत्रस्य समभावेन फलाश्रयत्वे सत्यपि कर्त्तृसंज्ञा कर्मसंज्ञा बाधते। तत्र नियमोऽस्ति 'विप्रतिषेधे परम् कार्यम्'[२८] इति।

(३)**<u>परसमवेतक्रियाजन्यफलशालित्त्वं कर्मत्वम्-</u>** लक्षणमिदं गङ्गेशोपाध्यायेन प्रवर्तितम्। अपि च कारकचक्रे, वैयाकरणभूषणे, लघुमञ्जूषायां पूर्वपक्षरूपेण लक्षणस्यास्योपस्थापनं कृत्वा तत्र दोषं निर्दिशति। परसमवेत: नाम अन्यत्र समवेत:, अन्यत्र नाम यस्मिन् स्थाने यत् वस्तु कर्मरूपेण अभिप्रेतं तद्भिन्नवस्तुनि समवेत: नाम समवायसम्बन्धेन अवस्थित:, एतादृशी क्रियाजन्यं यत् फलं , तस्याश्रयत्वम् एव कर्मत्वमिति। 'ग्रामं गच्छति' इत्यादिप्रयोगे 'ग्राम:' कर्म। कारणं क्रिया ग्रामभिन्ने अन्यत्र रामादिकर्तरि समवेता। रामादिकर्तरि कर्मत्वस्य नातिव्याप्तिप्रसङ्ग:। यतो हि गतिक्रियाया: यत् संयोगरूपफलं तत् क्रियापरसमवेतं न, परन्तु रामादौ स्वसमवेत:। तेन 'चैत्रश्चैत्रं गच्छति' इत्यादिप्रयोगस्यानापत्ति:।

लक्षणेऽस्मिन् विशेषत: भवानन्देन आपत्तिरुत्थापिता। तन्मते गम्-धातोरर्थ: य: संयोगावच्छिन्नक्रिया, तया जन्यः यो विभाग:, तद्रूपेण फलं प्रकटितं भवति। तेन 'गृहात् वनं गच्छति' इत्युदाहरणे विभागरूपं फलं गृहे विद्यमानात् तस्य कर्मत्वप्राप्ति:। एवं पत्-धातोरर्थ: अध:संयोगावच्छिन्नक्रिया। यया विभागरूपफलम् उत्पद्यते। फलत: 'पर्वतात् भूमिं पतति' इत्यादौ विभागरूपफलं पर्वते अस्ति। अत: तस्यापि कर्मतापत्ति। यद्यत्र पत्-धातो: अकर्मकरूपेण प्रयोगो भवेत् यथा – 'पर्णं पतति भूमौ' इति। अत्र फलव्यापारयो: एकनिष्ठता अर्थात् कर्तृनिष्ठता। तेन उत्तरदेशस्य भूमे: कर्मता आपतेत्, यद्धि असङ्गतमेव। कारणं अकर्मकक्रिया पुन: कर्मोपस्थिति: इति परस्परबिरुद्ध:। पुन: त्यज्-धातो: अर्थ: विभागावच्छिन्नव्यापार:, तस्य फलं हि संयोग:। फलतया तस्य प्रयोगे उत्तरदेशस्य कर्मत्वं स्वीक्रियेत। कारणं त्यागक्रियाया: फलं तेन प्राप्तं भवति। एवं स्पन्दधातो: संयोगस्तथा विभाग: उभयोरेव फलत्वम्। तेन संयोगरूपार्थस्वीकारे उत्तरदेशस्य तथा विभागरूपार्थस्वीकारे पूर्वदेशस्य कर्मताप्राप्ति: दुर्वारा। तस्मात् लक्षणमिदम् अतिव्याप्तिदोषदुष्टम्। तथाहि – "गमिपत्यो: पूर्वस्मिन्देशे, त्यजेश्चोत्तरस्मिन्देशे, स्पन्दे: पूर्वापरयोश्च कर्मत्वप्रसङ्गात्"[२९] इति।

अत्र पुन: भवानन्देनाक्षेप: क्रियते यत् 'तीरे नदी बर्धते' इत्यादौ तीरस्यापि कर्मत्वम्। कारणमत्र वृद्धेरवयवोपचयस्य परम्परया तीरप्राप्तिरेव फलम्। तज्जन्यफलाश्रयं भवति तीरम्। तथाहि – एवं तीरी नदी बर्धते' इत्यादौ वृद्धेरवयवोपचयस्य परम्परया तीरप्राप्तिफलकत्वात् तज्जन्यफलाश्रये तीरेऽतिव्याप्ति:"[३०]इति।

इदानीं प्रस्तुतलक्षाणे प्रयुक्तस्य 'पर' इति शब्दस्यार्थविषये शङ्का भवति। परशब्दस्य सामान्यार्थ: भिन्न: इति। इदानीं प्रश्नो भवति कस्मात् भिन्न:? – कर्मण: अथवा फलाश्रयात्। यदि कर्मण: भिन्न: एतादृशोऽर्थ: स्वीक्रियते तर्हि

'समवेतव्यापार...' इत्यस्य अर्थविषये असंगति: घटते। आदौ तु अन्योन्याश्रयदोष: आपतेत्। कारणं कर्मलक्षणप्रतिपादनकाले कर्मण: ज्ञानं पूर्वत: अवश्यमेव स्यात्। नोचेत् तद्भिन्न: इति ज्ञातुं न शक्यते। किञ्च, प्रतिपाद्यवस्तुन: प्रतिपादनं 'तद्भिन्नत्वाभाव' इत्येवं कथनं नोचितम्। इति प्रक्रिया अपोहस्य अन्तिमा गति:। अत: कर्मलक्षणे 'कर्मभिन्न' इति शब्दप्रयोग: अयथार्थ:।

यदि परशब्दस्य फलाश्रयभिन्नार्थे ग्रहणं क्रियते तर्हि अर्थो भवति फलाश्रयाद् भिन्नवस्तुनि समवेतक्रियाव्यापारेण उत्पाद्यफलस्य धारयिता एव कर्म इति। एतेन "देवदत्त: ग्रामं गच्छति' इत्यादौ यथा देवदत्तस्य न कर्मता तथा ग्रामस्यापि न कर्मत्वम्, कारणम् उभयौ अपि गमनक्रियाजन्यसंयोगरूपफलं धारयत:।[३१] एतेन 'परसमवेत' इति शब्दयोजनस्य किमपि फलं न प्राप्यते। पूर्ववदेव लक्षणं दोषयुक्तं भवति। अत्र नव्यवैयाकरणेन नागेशभट्टेन पूर्वपक्षे अस्य लक्षणस्थितस्य 'परसमवेत' इति अंशस्य व्याख्यानकाले परशब्दस्यार्थ: कृत: 'द्वितीयाविभक्ते: प्रकृत्यर्थाद् भिन्न:' इति। तथाहि – 'अत्र द्वितीयया स्वप्रकृत्यर्थापेक्षया परत्वं बोध्यते'[३२] इति।

(४)<u>**'तत् क्रियानाश्रयत्वे सति तत्क्रियाजन्यफलशालित्वं कर्मत्वम्'**</u> – उपर्युक्तलक्षणमिदं परत्वासंगतिरक्षायै नैयायिकै: स्वीकृतम्। कातन्त्रसम्प्रदायिनस्तु परवर्तिकाले लक्षणेऽस्मिन् सम्मतिं दत्तवन्त:। अस्य आशयस्तावत् एवमस्ति – यत् खलु प्रकृतक्रियया जन्यफलस्याश्रयं भवति तद्भवति कर्म। तेन कर्ता गमनक्रियाया: आश्रयोऽपि। अत: तस्य न कर्मत्वम्। कर्म तु तत्क्रियाया: आश्रयो न भवति। एतेन कर्तु: वारणं सम्भवति। परन्तु अन्येषां कारकाणां कर्मतापत्ति: निवारयितुं न समर्थ:। तेनास्मिन् लक्षणेऽपि अतिव्याप्तिदोष:। 'पर्वतात् अवरोहति' इत्युदाहरणे पर्वत: स्पन्दनरूपक्रियाया: अन्याश्रयत्वे सति क्रियाजन्यविभागरूपफलस्याश्रयो भवति, तेन तस्य कर्मत्वापत्ति:। अत: अपादानादिकारकादौ लक्षणस्यातिव्याप्ति:।[३३]

दोषस्यास्य परिहारार्थं कलापसम्प्रदायिन: लक्षणं कृतवन्त: - 'तत्क्रियानाश्रयत्वे सति धात्वर्थावच्छेदकीभूततत्क्रियाजन्यफलशालित्वं कर्मत्वम्' इति। अत्र धात्वर्थस्य अवच्छेदकरूपे क्रियाफलस्य प्रदर्शनं कृतम्। यत् खलु महत्त्वपूर्णविशेषणम्।

(५)**धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम्** – भवानन्देनैव लक्षणमिदं सिद्धान्तरूपेण स्वीकृतम्।[३४] गदाधराचार्येणापि नव्यनैयायिकानां सिद्धान्तरूपेण लक्षणमिदं विवेचितम्। वैयाकरणभूषणे तथा मञ्जूषायां खण्डनार्थम् उपर्युक्तलक्षणस्योद्धरणं दृश्यते।

प्रत्येकस्मिन् धातौ अवश्यमेव कापि शक्तिरेव धात्वर्थता। या खलु धातुजन्योपस्थितिविषयकविशेष्यता। तया निरुपितव्यापार: (धात्वर्थतावच्छेदक:) अत्र विशेषणरूपेण गृह्यते। धात्वर्थरूपविशेष्यस्य विशेषणम् अर्थात् फलावच्छिन्नव्यापाररूपेण स्वीकृतस्य विशेषणं हि फलम्।[३५]

वस्तुत: अस्य लक्षणस्य स्वीकारे अनेकत्रैव अतिव्याप्तिदोषस्य परिहारो भवति। यथा गम्-धातो: तथा पत्धातो: प्रयोगस्थले पूर्वदेशे कर्मत्वस्य अतिव्याप्ति: इति पूर्वमुक्तम्। परन्तु एतादृशं लक्षणं क्रियते चेत् वक्तुं शक्नुम: यत् धातोरर्थ: न केवलं स्पन्दनम्, अपि तु गम्-धातो: फलम् उत्तरदेशसंयोग:, अत्रैव धातुनिष्ठशक्ते: निरूपकावच्छेदकता विद्यते। एवं पत्-धातोरपि अधोदेशसंयोगो हि फलम्। अत: अस्य धातो: संयोगानुकुलव्यापार:, यत्र संयोग: विशेषणं, व्यापार: विशेष्यम्। अत: व्यापारस्थितविशेष्यताया: अवच्छेदक: विशेषणरूपसंयोग एव, न तु विभाग:। कारणं विभाग: तयो: धात्वो: नार्थ:।[३६]

एवं त्याज्धातोरर्थ: विभागानुकूलव्यापार:। तत्र व्यापारनिष्ठविशेष्यताया अवच्छेदक: विभाग:, न तु संयोग:, संयोग: धात्वर्थ एव न। तेन 'वृक्षं त्यजाति खग:' इत्यत्र उत्तरदेशस्य कर्मत्वप्राप्ति: न भविष्यति। कारणं विभागाश्रय: वृक्ष एव, अत: तस्यैव कर्मत्वम्। अत्र अपादानस्य कर्मत्वप्राप्तिविषये नागेशेन स्पष्टमिवोक्तम् –

**कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्**

> "ननु 'वृक्षं त्यजति खग:' इत्यत्र वृक्षस्य विभागरूपफलाश्रयत्वेनापादानत्वमस्त्विति च्त्न्न। अत्र हि विभाग: प्रकृतधात्वर्थ:। यत्र च विभागो न प्रकृतधात्वर्थस्तद्विभागाश्रयस्यैवापादानत्वम्, यथा वृक्षात् पततीत्यादौ।"[३७] इति।

यत्र विभाग: प्रकृतधातो: वाच्यार्थ: भवति तत्र अपादानस्य तथा कर्मण: उभयोरेव युगपत्प्राप्तौ 'अपादानमुत्तराणि कारकाणि बाधन्ते'[३८] इति परिभाषानुसारं कर्मत्वमेव। पत्धातो: अर्थमध्ये यदि अधोदेशरूपकर्म अन्तर्भुक्तं भवति तर्हि धातु: अकर्मको भवति।[३९] तेन पर्णं वृक्षाद् भूमौ पतति' इति प्रयोगोऽपि सङ्गच्छते।[४०]

अनेन प्रकारेण अस्य लक्षणस्यानुसारं स्पन्द्-धातुना तथा वृध्-धातुना फलावच्छिन्नव्यापारस्य बोधात् क्रमश: पूर्वोत्तरदेशे, किञ्च, तीरे कर्मत्वस्य प्रसङ्गो नायाति। वस्तुतोऽत्र धातु: अकर्मक:, न तु सकर्मक:। फलावच्छिन्नव्यापारस्य बोधात् धातो: मुख्यरूपं सकर्मकं भवति, तदैव कर्मण: प्रसङ्ग:, न त्वन्यत्र। 'नदी तीरे बर्धते' स्पन्दते' इत्यादय: व्यापारमात्रस्यैव बोधका:, न फलावच्छिन्नव्यापारस्य। अत एवात्र धातो: अकर्मकता।

भवानन्देनात्र आक्षेप: क्रियते यत् 'घटं जानाति' इत्यत्र ज्ञा-धातु: फलावच्छिन्नव्यापारस्य बोधक: न, तर्हि घटस्य कथं कर्मता? अत्रोत्तरं हि ज्ञा-द्विष्-इष्-कृ-प्रभृतय: धातव: सविषयकपदार्थस्य बोधका:। अत: विषयतारूपेण विभक्त्यर्थद्वारा पदार्थस्यान्वयं स्वीकृत्य सकर्मकताव्यवस्था स्थापिता भवति। परन्तु अत्र गौणं – सकर्मकत्वम्। तथाहि – "सविषयकपदार्थाभिधायि-जानात्यादीनान्तु विषयित्वरूपविओभक्त्यर्थद्वारा नामार्थान्वयित्वमेव गौणं सकर्मकत्वम्"[४१] इति। विषयतारूपविभक्त्यर्थद्वारा अन्यन्वयात् यत्-धातु: अकर्मक:, यद्यपि उद्देश्यतारूपविभक्त्यर्थद्वारा नामार्थस्य अन्वयो भवति। 'भोजनं यतते'

एतादृश: प्रयोगो न भवति। परन्तु 'भोजनाय यतते' इति तु शुद्धमेव। केचनोक्तवन्त: यत् यत्-धातु: सकर्मक: एव। किन्तु, यथा 'मातु: स्मरति' इत्यत्र 'अधीगर्थदयेशां कर्मणि'[४२]इत्यनेन कर्मणि द्वितीयां प्रबाध्य षष्ठी विधीयते, तथैव 'भोजनाय यतते' इत्यत्रापि द्वितीयास्थाने चतुर्थी भवति[४३]।

किञ्च, 'पर्वतादवरोहति' इत्यत्र कालापकसुषेणद्वारेण आशंका उत्थापिता यत् पूर्वोक्तलक्षणेन पर्वते कर्मतापत्ति:, तत्तु अनेन लक्षणेन निवार्यते। अवरोहणक्रियाया: वाच्यार्थ: उत्तरदेशसंयोग:, न तु विभाग:। फलम् उत्तरदेशसंयोगरूपेण प्रतीतं न भवति। कारणं धातुवाच्यरूपेण तन्न विवक्षितम्[४४]।

द्वितीयलक्षणस्यालोचनावसरे 'चैत्रश्चैत्रं गच्छति' इत्यादिप्रयोगे योऽतिव्याप्तिप्रसङ्ग: तस्य परिहार: लक्षणमिदं कर्तुं न समर्थम्। भूषणे कथ्यते यत् 'भूमिं प्रयाति विहगो विजहानि महीरुहम्' इत्यादि कर्मत्वस्योपपत्तिर्यथा तथा 'अत्मानं त्याजति' इति अनिष्टप्रयोगापत्ति:। एतेन प्रस्तुतलक्षणे 'परसमवेत' इति विशेषणप्रयोग: अनिवार्य:। गम्-धातो: धात्वर्थफलं चैत्रे एव वर्तते, अत: तस्य कर्मतापत्ति:। परन्तु चैत्रे य: धात्वर्थफलमस्ति तत् खलु तस्य समवेतव्यापारस्य फलम्। एतदेव वक्तुमुचितं यत् प्रकृत्यर्थभिन्नमेव परशब्दार्थ:। एवं 'परसमवेत' इति विशेषणेन कर्मलक्षणं परिशुद्धं भवति।[४५] एतदनुसारं 'भूमिं प्रयाति' इति प्रयोगे द्वितीयाविभक्तियुक्तभूमिशब्दापेक्षया भिन्नत्वम्। अत: नैयायिकानां वाक्यबोध एवमेव – 'भूमिभिन्नसमवेतभूमिवृत्तिसंयोगजनकस्पन्दानुकूलकृतिमान्' इति।[४६] एव मल्ल आत्मानं गच्छतीत्यादौ स्वभिन्नसमवेतम् आत्मवृत्तिसंयोगजनकं मल्लान्तरवृत्ति यद्गमनं तद्नुकूलकृतिमत्त्वस्य स्वस्मिन्नभावादेव नातिप्रसङ्ग: इति।[४७]

परमलघुमञ्जूषाकार: नागेशभट्ट: नैयायिकानां एतादृशपरिष्कृतलक्षणे 'परसमवेत' इति शब्दस्य स्थानोपरि 'व्यापारानधिकरणत्वे सति' इति विशेषणं

स्वीकरोति। तात्पर्यन्तु एवमेव यत् गमनक्रियारूपव्यापारस्य अधिकरणत्वात् 'चैत्रश्चैत्रं गच्छति' इत्यत्र चैत्रस्य न कर्मत्वम्। तदैव तस्य कर्मत्वं यदा सम्बद्धव्यापारस्याधिकरणं न नैयायिकानाम् अन्तिमलक्षणोपरि अपि नागेशस्य आपत्तिः। तेन केवलं गम्-धातोः प्रयोगोऽस्ति – एतादृशवाक्यत्रयमध्ये लक्षणस्याव्याप्तिः प्रदर्शिता। यथा 'काशीं गच्छन् पथि मृतः' इत्यत्र गम्-धातोरर्थः धात्वर्थतावच्छेदकफलसंयोगरूपः। परन्तु यो गच्छति स तु काशीं न प्राप्तवान्, अतः संयोगरूपफलस्य अनाश्रयत्वात् काश्याः न कर्मता। द्वितीयतः काशीं गच्छति, न प्रयागम् – इत्यत्र संयोगरूपफलस्य आधारः प्रयागो न भवति, अतः तस्यापि कर्मताप्राप्तिः। तृतीयतः ग्रामं न गच्छति इत्यत्र निषेधवाक्यस्थिते ग्रामे संयोगाभावत्वात् न कर्मत्वम्।

नागेशेन नैयायिकानां मतस्य विश्लेषणं कृत्वा प्रतिपादितं यत् क्रियायाः फलं धातोः एव ज्ञायते। तदर्थमेव द्वितीयाविभक्तिः या खलु कर्मप्रत्ययस्य अर्थम् आधेयत्वं तथा भेदं स्वीकरोति। नागेशेन अनूदितं मतमिदं प्रायः तत्त्वदीधितिकारस्य रघुनाथस्यैव। तस्य निर्देशः खलु भूषणसारदर्पणे हरिवल्लभाचार्येण कृतः। द्वितीयाविषयकं न्यायमतानुसारम् आधेयत्वस्यान्वयः फले तथा भेदस्यान्वयः सामानाधिकरण्यसम्बन्धस्य व्यापारे भवति। तथाहि लघुमञ्जूषायां –

'तत्र क्रियाफलस्य धातुनैव लाभादाधेयत्वं भेदश्च द्वितीयार्थः। तत्र फले आद्यान्वयोऽन्त्यस्य सामानाधिकरण्येन व्यापारे' इति।

भेदे प्रकृत्यर्थस्तु आदावेव अन्वितो भवति। अतः 'ग्रामं गच्छति चैत्रः' अस्य विधेः शाब्दबोधः न्यायानुसारं भवति एवम् – 'ग्रामाधेयफलानुकूलग्रामभेदसमानाधिकरणव्यापारवान् चैत्रः' इति। भूषणसारस्य काशिकाटीकायां प्राप्यते तावत् शाब्दबोधः – 'ग्रामवृत्तिसंयोगजनको ग्रामप्रतियोगिकभेदसमानाधिकरणो यो व्यापारस्तदाश्रयश्चैत्रः' इति।

**नव्यव्याकरणे कर्मत्वविवेचनम्—**

नव्यनैयायिकवत् नव्यवैयाकरणा अपि कर्मत्वविचारे स्वस्वमतं प्रतिष्ठापितवन्तः। विशेषतः नैयायिकानां मतखण्डनमेवावश्यकमिति धिया तैः स्वतन्त्रं लक्षणं लक्षितम्। तत्र नव्येषु लघुमञ्जूषाकारे नागेशभट्टे एव परिणतिः।

प्रथमतः भट्टोजिदीक्षितः शब्दकौस्तुभे ग्रन्थे न्यायशास्त्रानुमोदितं लक्षणं समालोचयति। 'कर्तुरीप्सिततमं कर्म' (पा.सू. १-४-४९) इति सूत्रस्य वृत्तिं प्रदर्श्य कथ्यते यत् यस्य व्यापारस्य आश्रयहेतोः स कर्ता तदेव व्यापारेण सम्बद्धं कर्तुं यः इष्टतमः तस्यैव कर्मत्वम्। एतदनुसारं क्रियाफलस्य धारक एव कर्ता । तथाहि शब्दकौस्तुभे – 'क्रिया हि फलेच्छापूर्वकेच्छाविषयः। फलमेव त्विष्टतमम्। तच्च धातुनोपात्तमिति तद्विशिष्टत्वेनेच्छा-विषयोऽत्र संज्ञी' इति। ईप्सिततमस्य तथा अनीप्सितस्य संयुक्तपरिणामो भवति धातुद्वारा उपात्तफलस्य आधारमात्रं हि कर्म इति। नागेशेन पूर्वपक्षरूपेण यथा न्यायसम्मतस्य आधेयस्य द्वितीयार्थं स्वीकृतं तथैव दीक्षितेनापि आधेयत्वं स्वीकृत्य फले तस्य अभेदान्वयः स्वीकृतः। तथाहि

'आधेयमेव वा। तच्चाभेदेन फलेऽन्वेति। अनन्यलभ्यः शब्दार्थ इति न्यायात्'। 'ग्रामं गच्छति' इत्यत्र ग्रामशब्दस्य द्वितीयार्थत्वं नाम आधेयत्वं स्वीक्रियते चेत् ग्रामाधेयसामानाधिकरणफलानुकूलव्यापारः एतादृशो बोधो भवति। दीक्षितस्य इदानीं भिन्नः प्रश्नः। धूपस्थाप्यफलशालि कर्म इत्येव यदि कर्मलक्षणं भवेत् तर्हि ईप्सितानीप्सितयोः पृथक् ग्रहणेन किम्? अत्रोत्तरं भवति अग्नेर्माणवकं वारयत्यादौ 'वारणार्थानामीप्सितः' इति सूत्रेण माणवकस्य अपादानत्वं प्राप्तम्, तद्वाराणाय कर्तुरीप्सिततमम् इति वक्तव्यमेव। एवञ्च द्वेष्योदासीनयोः संग्रहार्थं तथायुक्तम् इत्यावश्यकम्। तत्त्वबोधिनीकारेण ज्ञानेन्द्रसरस्वतिमहोदयेन उक्तं – 'अनीप्सितग्रहणं स्पष्टप्रतिपत्त्यर्थम्, तथायुक्तम् - इत्यस्यारम्भादेवेष्टसिद्धेः' इति।

कोण्डभट्टस्तु कर्मणि द्वितीया (पा.सू. २/३/२) इति सूत्रे कर्मत्वं

**कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्**

क्रियाजन्यफलाश्रयत्वरूपमेव स्वीकृतम्। तच्च ईप्सितानीप्सितसाधारणमेव। एवञ्च तेषां मते हरिं भजतीत्यादौ ईप्सितकर्मणः ग्रामं गच्छन् तृणं स्पृशति इत्यत्र तृणेऽनीप्सितकर्मणः शाब्दबोधे भानं न स्यात्, शाब्दबोधे तु सर्वेषां कर्मणां कर्मत्वरूपेणैव प्रतीतिः, न त्वीप्सितयोः तत्र भानम्। उक्तञ्च 'ईप्सितानीप्सतत्वयोः शाब्दबोधे भानाभावेन संज्ञायामेव तदुपयोगः' इति।

एवञ्च एतन्मते चैत्रो ग्रामं गच्छतीत्यत्र चैत्रस्य कर्मत्वापत्तिस्तु, परत्वात् कर्तृसंज्ञया कर्मसंज्ञाया बाधात् नास्तीति बोध्यम्। वस्तुतस्तत्र क्रियाजन्यफलाश्रयत्वेन द्वितीयापत्तिस्तु नाशंकनीया, ग्रामं गमयति चैत्रो मैत्रमिति वत् पाचयति तण्डुलं चैत्रः मैत्रेणेत्यत्रापि मैत्रपदात् द्वितीयापत्तिवारणाय, द्वितीयोत्पत्तौ कर्मसंज्ञाया एव कारणत्वस्वीकारेणादोषात्। अन्यथा तु गमयति चैत्रः मैत्रमित्यत्र यथोत्तरदेशसंयोगानुकूलव्यापारानुकूलव्यापाररूपक्रियाजन्यं, यत् प्रथमव्यापाररूपं फलं तत्फलाश्रयत्वेन मैत्रस्य कर्मसंज्ञा द्वितीयोत्पत्तिश्च भवति, तथा पाचयति चैत्रः मैत्रेण इत्यत्र चैत्रनिष्ठविक्लित्यनकूलव्यापारा - नुकूलव्यापाररूपक्रियाजन्यप्रथमव्यापररूपफलाश्रयत्वेन मैत्रपदात् द्वितीयोत्पत्तेः वारयितुम् अशक्यत्वात्। कर्मसंज्ञायाः द्वितीयोत्पत्तौ निमित्तत्वे तु पाचयति चैत्रः मैत्रेण इत्यत्र तादृशफलाश्रयत्वेऽपि अणौ कर्ता णौ कर्म चेत्, तर्हि गत्यादीनामेवेति गतिबुद्धिसूत्रस्य नियमेन कर्मसंज्ञायाः बाधान्न द्वितीयापत्तिः।

एवं चैत्रो ग्रामं गच्छतीत्यत्र क्रियाजन्यसंयोगरूपफलाश्रयत्वेऽपि कर्तृसंज्ञाया कर्मसंज्ञायाः बाधान्न चैत्रपदात् द्वितीयापत्तिरिति कौण्डभट्टाशयः। उक्तञ्च ग्रामस्यैव चैत्रस्यापि फलाश्रयत्वेऽपि तदीयकर्तृसंज्ञया कर्मसंज्ञाया बाधेन चैत्रश्चैत्रम् इति प्रयोगासम्भवात्। द्वितीयोत्पत्तौ संज्ञाया एव नियामकत्वात्। अन्यथा गमयति कृष्णं गोकुलम् इत्यत्र इव पाचयति कृष्णेन इत्यत्रापि कृष्णपदात् द्वितीयापत्तेः।

एवञ्च चैत्रो ग्रामं गच्छतीत्यत्र चैत्रपदात् द्वितीयोत्पत्त्यभावेऽपि शाब्दबोधे फलाश्रयत्वेन चैत्रस्य विषयता स्यादिति चेदुच्यते – शाब्दबोधस्य स्वस्वव्युत्पत्त्यनुसारित्वात्। व्युत्पत्तिस्तु कार्यकारणभावज्ञानमात्रम्। एवञ्च यैः ईदृशः कार्यकारणभावः समवायसम्बन्धेन धात्वर्थफलनिष्ठविशेष्यतानिरूपितप्रका - रतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रत्याश्रयोपस्थितिः कारणम् गृहीतः, तेषान्तु चैत्रनिष्ठसंयोगानुकूलचैत्राभिन्नैककर्तृकवर्तमानकालिको व्यापारः इति शाब्दबोधः चैत्रो गच्छति इति वाक्याद् भवति।

किन्तु यदि प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यतकशाब्दबुद्धित्वा - वच्छिन्नं प्रति, धात्वर्थव्यापारानधिकरणविभक्तिजन्याश्रयोपस्तितिः कारणम् इति कार्यकारणभावः स्वीक्रियते, तदा चैत्रस्य धात्वर्थव्यापाराश्रयत्वान्न तत्र फलविशेष्यकबोधः इति । तथा चोक्तं – 'शाब्दबोधः चैत्रश्चैत्रम् इत्यत्र स्यादिति चेन्न, व्युत्पन्नानामिष्टापत्तेः। उच्यतां वा प्रकारतासम्बन्धेन धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थफलविशेष्यकबोधं प्रति धात्वर्थव्यापाराधिकरणाश्रयोपस्थितिहेतुः इति कार्यकारणभावान्तरम्। प्रकृते चैत्रस्य व्यापारानधिकरणत्वाभावात् न दोषः।

प्रयागात् काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्वापत्तिस्तु नास्त्येव, क्रियाजन्यफलाश्रयत्वेन प्रकृतधात्वर्थफलाश्रयस्य विलक्षणात्। विभागस्तु न गम्- धात्वर्थः, अतः तदाश्रयत्वेन प्रयागस्य कर्मत्वापत्तिर्नास्ति।

कौण्डभट्टाभिमते कर्मत्वम् ईप्सितानीप्सितसाधारणमेव, किन्तु तेषां मते चैत्रो ग्रामं गच्छतीत्यत्र फलविशेष्यकचैत्रप्रकारकशाब्दबोधवारणाय कार्यकारणभावान्तरं स्वीकरणीयम्।

कर्मत्वस्य स्वरूपं प्रतिपादयता नागेशेन भणितं – 'कर्मत्वञ्च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थकफलाश्रयत्वेनोद्देश्यत्वम्' इति।

एवञ्च चैत्रश्चैत्रं गच्छतीति न प्रयोगः, चैत्रस्य फलाश्रयत्वेन उद्देश्यत्वाभावात्। 'गोपः गां दोग्धि' इत्यत्र गो-इत्यस्य पयसश्च कर्मत्वं सिध्यति, यतो हि दुह्धातोः विभागानुकूलव्यापारोऽर्थः। तत्र प्रधानीभूतः द्वितीयव्यापारः गोपनिष्ठः, तत्प्रयोज्यत्वञ्च गोवृत्तिप्रथमव्यापारे, परम्परया च विभागेऽपि वर्तते। एवञ्च प्रथमव्यापाररूपफलाश्रयत्वेन गोः तथा विभागाश्रयत्वेन च पयसः कर्मत्वं सिध्यति।

ननु नागेशाभिमते पूर्वोक्तकर्मत्वस्वीकारे प्रयागात् काशीं गच्छतीत्यत्र प्रयागस्य कर्मत्वापत्तिः दुर्वारा स्यात्, कर्तृवृत्तिव्यापारेण उत्तरदेशसंयोगस्येव विभागस्यापि प्रयोज्यत्वात् इत्याक्षेपे उच्यते – फलाश्रयत्वेनोद्देश्यत्वञ्च फलतावच्छेदकसम्बन्धेन। फलतावच्छेदकसम्बन्धश्च येन सम्बन्धेन फलत्वप्रकारकेच्छा भवति स एव सम्बन्धः। स च भिन्नभिन्नस्थले भिन्नरूपः। यथा तण्डुलं पचतीत्यत्र फलतावच्छेदकसम्बन्धः समवायः, समवायसम्बन्धेन विक्लित्तेः आश्रयः तण्डुलो भवतु इच्छायाः तत्र स्वीकारात्। एवञ्च ग्रामं त्यजति इत्यत्र प्रतियोगित्वविशिष्टसमवायः फलतावच्छेदकसम्बन्धः तेन सम्बन्धेन 'विभागाश्रयो ग्रामो भवतु' इति फलत्वप्रकारिकेच्छायास्तत्र विद्यमानत्वात्। अनया रीत्या एव प्रयागात् काशीं गच्छतीत्यत्र अनुयोगित्वविशिष्टः समवायः फलतावच्छेदकसम्बन्धः, तेन सम्बन्धेन प्रयागस्य फलाश्रयत्वेन उद्देश्यत्वाभावात् न प्रयागस्य कर्मत्वापत्तिरिति। तथाहि –

'प्रयागस्य फलतावच्छेदकसम्बन्धेन फलाश्रयत्वेनानुद्देश्यत्वाच्च' इति।

एवञ्च 'प्रयागं गच्छन् पथि मृतः' इत्यत्र फलाश्रयत्वाभावेऽपि फलाश्रयत्वेन उद्देश्यत्वात् कर्मत्वं सिध्यत्येव।

किञ्च, 'मथुरां गच्छति न प्रयागम्' इत्यत्र प्रयागस्य फलाश्रयत्वेन उद्देश्यत्वाभावात् कर्मत्वाप्राप्तौ अव्याप्तिः स्यादिति चेदुच्यते – " कर्मलक्षणे

ईप्सिततमपदस्य स्वार्थविशिष्टयोग्यताविशेषे लक्षणा। तथा च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वयोग्यतावि शेषशालित्वं कर्मत्वम्' इति। एवञ्च प्रयागस्य फलाश्रयत्वेनोद्देश्यत्वाभावेऽपि तादृशयोग्यताया विद्यमानत्वात्, न कश्चन दोषावकाशः। वस्तुतः आरोपितानारोपितसाधारणसंयोगविक्लित्यादिफलाश्रयत्वेनोद्देश्यत्वस्य कर्मत्व - स्वीकारेण न कश्चन दोषः। मथुरां गच्छति न प्रयागम् इत्यत्र मथुरायाम् अनारोपितस्य प्रयागे चारोपितस्य संयोगस्य विद्यमानत्वेन तदाश्रयत्वेन उद्देश्यत्वात् प्रयागस्यापि कर्मत्वं सिध्यति, तदर्थं लक्षणास्वीकारे गौरवमेवेति मे मतिः।

अनीप्सितानां 'ग्रामं गच्छन् तृणं स्पृशति' इत्यादौ तृणादीनां कर्मत्वन्तु 'तथायुक्तं चानीप्सितम्' इति लक्षणान्तरात् भिन्नमेव। तच्च प्रकृतधात्वर्थव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वमेव। तथा च स्पर्शरूपफलाश्रयत्वेन तृणस्य कर्मत्वं सिद्ध्यतीति भावः। ईप्सितानीप्सितकर्मणोः 'कर्तुरीप्सिततमं कर्म' 'तथायुक्तं चानीप्सितम्' इति लक्षणभेदात् भिन्नस्वरूपं स्वीकृतं नागेशभट्टेन।

अकथितं कर्मापि पाणिनिना स्वीकृतमपरं कर्म। तद्विषये सूत्रं हि- 'अकथितञ्च' । अस्यार्थो हि – अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात् इति। यथा गां दोग्धि पयः इति। यत्र गो-पदे अपादानकारकस्य अविवक्षितत्वात् पूर्वोक्तसूत्रेण कर्मत्वम्। परन्तु अपादानस्य विवक्षायां पञ्चम्येव। तथाहि प्रौढमनोरमायां – 'अपादानमात्रविवक्षियान्तु पञ्चम्येव। गोः क्षीरविशेषणत्वे तु षष्ठी। तेन गोः पयो दोग्धीत्यपि प्रयोगः साधुरेव। ' इति। अकथितकर्मविषये भर्तृहरेरभिमतं हि-

**कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्**

'प्रधानकर्म कथितं यत् क्रियायाः प्रयोजकम्।

तत्सिद्धये क्रियायुक्तमन्यत्त्वकथितं स्मृतम्।। इति।

एव प्रयोज्यकर्तुः कर्मत्वं प्रतिपादयता पाणिनिना सूत्रितं- 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्ता स णौ' इति। गत्यर्थकानां बुद्ध्यर्थकानां भोजनार्थकानां शब्दकर्मकाणाम् अकर्मकाणां धातूनाम् अणिजन्तावस्थायाः कर्तुः कर्मसंज्ञा भवति।

कर्मभेदः- तात्त्विकदृष्ट्या कर्मणः एकत्वेऽपि व्यावहारिकदृष्ट्या तस्य अवान्तरभेदाः प्रदर्शयितुं शक्यन्ते। आदौ कर्मणः मुख्यभेदद्वयमस्ति। तद्धि- ईप्सिततमं कर्म, सूत्रान्तरलक्षितं कर्म। ईप्सिततमकर्मणः पुनः भेदत्रयम् – निर्वर्त्यं, विकार्यं, तथा प्राप्यम्। सूत्रान्तरलक्षितस्य कर्मणः भेदचतुष्टयम् – उदासीनं, द्वेष्यम्, अकथितं तथा अन्यपूर्वकम्। अतः साकल्येन कर्मणः सप्त भेदाः। तथाहि –

निवर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।

तत्रेप्सिततमं कर्म चतुर्धान्यत्तु कल्पितम्।।

औदासिन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।

संज्ञान्तरैरन्याख्यातं यद्यच्चाप्यन्यपूर्वकम्।।

अत्र अन्यपूर्वकं नाम, पाणिनिना अन्यान्यपि कानिचन सूत्राणि कृतानि। तैरपि कर्मत्वं सिध्यति। तानि यथा 'क्रुधद्रुहोपसृष्टयोः कर्म' (पा.सू. - १/४/३८), 'दिवः कर्म च' (पा.सू. - १/४/५३), 'अधिशीङ्स्थासां कर्म' (पा.सू. -१/४/४६), 'अभिनिविशश्च' (पा.सू. - १/४/४७), 'उपान्वध्याङ् वसः' (पा.सू. - १/४/४८) इति।

**तथ्यसूत्राणि—**

१. सार्वधातुभ्यो मनिन्। क्रियते इति कर्म – सि.कौ., उणादिसूत्रम् – 584

२. सर्वदर्शनसंग्रहस्य शैवदर्शने, पृ- 345

३. पा.सू. 3-3-43

४. तत्रैव. 4/4/63

५. तत्रैव. 5/1/124

६. भवतोस्मादभिधानप्रत्ययाविति भावः। शब्दस्य प्रवृत्तिनिमित्तं भावशब्देनोच्यते इति। यथा गोर्भावः गोत्वम् – काशिका – पा.सू. 5/1/118

७. पा.सू. - 1/4/49

८. तत्रैव. 7/4/55

९. तत्रैव. 6/1/9

१०. तत्रैव. 6/1/2

११. तत्रैव. 3/1/2

१२. तत्रैव. 3/2/188

१३. तत्रैव. 1/4/27

१४. सि. कौ. – 535

१५. तदेव

१६. पा. सू. 1/4/50

१७. सि. कौ. 538 (बालमनोरमायाम्)

१८. अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता।

प्रसज्यप्रतिषेधोसौ क्रियया सह यत्र नञ्।।- न्या.को

१९. प्राधान्यं हि विधेर्यत्र प्रतिषेधेप्रधानता।

पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्।। - तत्रैव.

२०. i)सुखसाधने एव लोके ईप्सितत्वं प्रसिद्धम् – भाष्यप्रदीपोद्यते – 2.

ii)—तत्र यत्सुखहेतुस्तत्सुखात्मकं सत्त्वम्, यद्दुःखहेतुस्तद्दुःखात्मकं रजः, यन्मोहहेतुस्तन्मोहात्मकं तमः‘ – सांख्यतत्त्वकौमुदी – 13.

२१. महाभाष्ये – 2.

२२. पा. सू. – 1/3/72.

२३. ‘फलत्वञ्च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्‘ – प.ल.म. (धात्वर्थनिर्णये).

२४. पा. सू – 3/1/84.

२५. करणव्यापारवत्त्वम् – प.ल.म.

२६. कारकचक्रे – पृ. 31.

२७. व्युत्पत्तिवादस्य द्वितीयाकारके प्रथमखण्डः पृ. 283.

२८. पा. सू. – 1/4/2.

२९. कारकचक्रे – पृ. 31.

३०. तत्रैव पृ. 32.

३१. व्या. द. इ. पृ. 272.

३२. परमलघुमञ्जूषायाम्

३३. व्या. द. इ. पृ. 272

३४. कारकचक्रे – पृ. 33

३५. "धात्वर्थपरिच्छेदकत्वमिति। फलावच्छिन्नव्यापारस्य धात्वर्थत्वमिति वादिनां मतेनेदम्। तथा च तन्मते धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वमिति द्वितीयार्थः।" – वै. भू. सा. – दर्पणे।

३६. "एवञ्च संयोगानुकूलव्यापारस्य गमिपत्यर्थत्वात् व्यापारनिष्ठविशेष्यताया अवच्छेदकत्वं विशेषणीभूतसंयोगे एवास्ति, न तु विभागे। विभागस्य धातुवाच्यत्वाभावात्" – प. ल. म. – ज्योत्स्नायाम्।

३७. प. ल. म.(कारकार्थनिरूपणे – पृ. 247.)

३८. म. भाष्ये – 1/4/1.

३९. 'धात्वर्थेनोपसंग्रहात् - - - ' इत्यतः वा. प. – 3/7/88.

४०. प. ल. म. पृ. – 243.

४१. कारकचक्रे – पृ. 35.

४२. पा. सू. – 2/3/52.

४३. कारकचक्रे – पृ. 37.

४४. क्रियावच्छेदकं यत्र फलं कर्त्रा विवक्षितम्।

तदेव कर्मधातुस्तु फलानुक्तावकर्मकः।। - व्या. द. इ. (पृ. 373)

४५. 'स्वभिन्नसमवेतो यो धात्वर्थनिष्ठं तदवच्छेदकीभूतधर्मवत्त्वं तत्क्रियाकर्मत्वमित्यर्थः' – कारकचक्रे.

४६. तत्रैव. पृ. – 40.

४७. तत्रैव. पृ. 40-41.

४८. "काशीं गच्छन् पथि मृतः इत्यादौ काश्याः, काशीं गच्छति न प्रयागमित्यादौ प्रयागस्य, ग्रामं न गच्छतीत्यादौ ग्रामस्य च तादृशफलशालित्वाभावादेतस्य

लक्षणस्यात्र सर्वत्राव्याप्तेः” – प. ल. म.(पृ - 244)

४९. शब्दकौस्तुभम् – 2.

५०. वै. भू. सा. – सुबर्थनिर्णये.

५१. प. ल. म.(कारकविचारः)

५२. तत्रैव.

५३. तत्रैव.

५४. पा. सू. – 1/4/50.

५५. पा. सू. – 1/4/49

५६. पा. सू. – 1/4/50

५७. पा. सू. – 1/4/51

५८. वै. सि. कौ –

५९. वा. प. – 3/7/71

६०. पा. सू. – 1/5/52

६१. वा. प. – 3/7/54, 56

**सहायकग्रन्थावली—**

१. अष्टाध्यायीसूत्रपाठः – पाणिनिः, सम्पा. गोपालदण्डपाण्डेयः, चौखम्बा-संस्कृत-सीरीज, १९५०.

२. कारकचक्रम् – भवानन्दसिद्धान्तवागीशः, व्याख्या. श्रीमन्माधवतर्कालङ्कारः, छात्रपुस्तकालयः, १९३७.

३. काशिकावृत्तिः – जयादित्यवामनौ(न्यासपदमञ्जरीसहिता), प्राच्यभारती

प्रकाशन्, १९६५-६७.

४. पदवाक्यरत्नाकरः – गोकुलनाथोपाध्यायः(गूढार्थदीपिका-संवलिता), सम्पा. श्रीनन्दिनाथमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः.

५. परमलघुमञ्जूषा – नागेशभट्टः, व्याख्या. जयशङ्करलालत्रिपाठी, कृष्णदास-एकाडेमी(द्वितीयसंस्करणम्).

६. परमलघुमञ्जूषा – नागेशभट्टः, व्याख्या. लोकमणिदाहालः, चौखम्बा-सुरभारती -प्रकाशनम्(प्रथमसंस्करणम्).

७. भूषणसारतत्त्वप्रकाशिका – कं. वे. रामकृष्णामाचार्यः, राष्ट्रिय-संस्कृत-विद्यापीठ, तिरुपतिः.

८. भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा- राममनोहरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः.

९. लघुमञ्जूषा – नागेशभट्टः(भावप्रकाशसहिता) सम्पा. पेरिसूर्यनारायणशास्त्री.

१०. लघुशब्देन्दुशेखरः(अव्ययीभावान्तः)- नागेशभट्टः, व्याख्या. श्रीनित्यानन्द - पन्तपर्वतीयः, चौखम्बा-संस्कृत-संस्थानम्(दशमसंस्करणम्).

११. वाक्यपदीयम् – भर्तृहरिः,(हेलाराजाम्बाकर्तृव्याख्याद्वयोपेतम्), पण्डित रघुनाथशर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः.

१२. वैयाकरणभूषणसारः – कौण्डभट्टः (दर्पणसुबोधिनीटीकासहितः), सम्पा. अयोध्यानाथसान्यालशास्त्री, संस्कृत-पुस्तक-भाण्डारः.

१३. वैयाकरणभूषणसारः – कौण्डभट्टः, सम्पा. प. प्रभाकरमिश्रः, चौखम्बा-सुर-भारती-प्रकाशनम्.

१४. वैयाकरणसिद्धान्तकौमुदी – भट्टोजिदीक्षितः( बालमनोरमातत्त्वबोधिनीसहता) – सम्पा. प. गिरिधरशर्मा, श्रीपरमेश्वरानन्दशर्मा च, मोतिलाल-वनारसीदासः.

१५. वैयाकरणसिद्धान्तकौमुदी – भट्टोजिदीक्षितः(कारकप्रकरणम्) - सम्पा. अयोध्यानाथसान्यालशास्त्री, संस्कृत-पुस्तक-भाण्डारः.

१६. व्याकरण दर्शनेर इतिहास – गुरुपद –हालदारः, संस्कृत-वुक्-डिपो.

१७. व्याकरणमहाभाष्यम् – पतञ्जलिः, प्रदीपोद्योतटीकासहितम्.

१८. व्युत्पत्तिवादः – गदाधरः, सनन्दाटीकासहितः, सम्पा. सच्चिदनन्दमिश्रः, भारतीयविद्याप्रकाशनम्.

१९. शब्दशक्तिप्रकाशिका – जगदीशतर्कालंकारः कृष्णकान्तीटीकोपोता.

२०. शाब्दबोधमीमांसा – (सुबर्थविचारात्मकः द्वितीयभागः) एन्. एस्. रामानुजताताचार्यः, राष्ट्रिय-संस्कृत-संस्थानम्.

२१. संस्कृत व्याकरण मे कारकतत्त्वानुशीलन – उपाशङ्करशर्मा, चौखम्बा-सुरभारती-प्रकाशनम्.

२२. सर्वदर्शनसंग्रहः – माधवाचार्यः, सम्पा. वासुदेव-अभ्यङ्करः, पुणे अरियेन्टाल्-रिसार्च-इनस्टिटिउट्.

२३. सांख्यतत्त्वकौमुदी – वाचस्पतिमिश्रः, सम्पा. नारायणचन्द्रगोस्वामी, संस्कृत-पुस्तक-भाण्डारः.

२४. सारमञ्जरी – जयकृष्णः, सम्पा. अशोक-कुमार-वन्द्योपाध्यायः, सदेशः.

# शाब्दिक-नैयायिक-मीमांसकदिशा लिङर्थ-विमर्शः

सन्तुसिंहः

**उपोद्घातः---**

**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च**[१] इत्यादि-श्रुतिततिभिरेतच्छ्रुतिसिद्धं सत्यं यद् धृतदेहानां समेषां जनिचक्रचेच्छित्सूनामात्मतत्त्वसाक्षात्कार एव शरणम्। स च साक्षात्कारः श्रवण-मनन-निदिध्यासन-साध्यः। तत्र श्रवणं नाम वेदान्तानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूलमानसी क्रियेति वेदान्त-परिभाषापरिभाषा। सार्थश्रुतस्यैव मननयोग्यत्वाद्गुरुवाक्यश्रवणसमनन्तरवाक्यार्थावबोधालम्बनापेक्षा समेति शिष्याणाम्। तदवबोधश्च साकाङ्क्षाशब्दप्रयोज्य इति जागदीशसिद्धान्तः। तथाहि शब्दशक्तिप्रकाशिकायां काशितं तेन -

**साकांक्षाशब्दैर्यो बोधस्तदन्वयार्थगोचरः।**

**सो यं नियन्त्रितार्थत्वान्न प्रत्यक्षं न चानुमा।।**[२] इति। स च स्वार्थान्वयगोचरो बोधः साकाङ्क्षैरपि सार्थकैरेव शब्दैः सम्पादनीयो, न तु निरर्थकैः। स च सार्थकशब्दः प्रकृति-प्रत्यय-निपातभेदात् त्रैविध्यमेति। तथाहि कारिकेरिता -

**शब्दान्तरमपेक्ष्यैव सार्थकः स्वार्थबोधकृत्।**

**प्रकृतिः प्रत्ययश्चैव निपातश्चेति स त्रिधा।।**[३] इति। विभक्ति-धात्वंश-कृत्तद्धितभेदात् प्रत्ययस्य चातुर्विध्यमिति केचित् । अपरे विभक्ति-धात्वंश-कृत्-स्त्री-तद्धितभेदात् पाञ्चविध्यं प्रत्ययस्येतीतरे। सुप्-तिङोर्विभक्तित्वेन प्रसिद्धिः सर्ववेद्या शाब्दिकनिकाये। तथा च पाणिनीयो नियमः - **विभक्तिश्च**[४] इति। तत्र

शाब्दिकैस्तार्किकैर्मीमांसकैश्च प्रसङ्गसङ्गत्या सुपामिव तिङामर्थविशेषान् स्वस्वसिद्धान्तसरण्या प्रदर्श्य ग्रन्थो निरमायि। तत्रापि लादेशभूतानां तिङामर्थनिरूपणवेलायां स्थानिभूतानां लानामेवार्थवैभिन्न्याद् वस्तुतो लकाराणामेवार्थो न्यरूपि विद्वद्भिः। धातोर्विधीयमानाः कालभेदाद्दश लकाराः शास्त्रेषु सुप्रसिद्धाः। ते हि लट्, लिट् लुट्, लेट्, लोट्, लङ्, लिङ्, लुङ्,लृङ् चेति। मद्ग्रन्धेस्मिन् लिड्लकारार्थ एव शाब्दिक-तार्किक-मीमांसकमतोपास्थपनपुरःसरं सविशदं वितन्यते।

## शाब्दिकदिशा लिडर्थविमर्शः

### भाष्यानुसारेण लिडर्थविमर्शः -

तत्रभवता पाणिनिना लिड् विधीयते **"परोक्षे लिट्"**[५] इति सूत्रेण । तद्वृत्तिरीरिता दीक्षितेन **"भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लट् स्यादि"**[६]ति। रामो वनं जगाम, कृष्णः कंसं जघान इत्यादीन्युदाहरणानि। रामाभिन्नैककर्तृको वननिष्ठकर्मतानिरूपक-भूतानद्यतनकालावच्छिन्नः परोक्षो व्यापार इति शाब्दिकसम्मत-शाब्दबोधः। तेनानद्यतनभूतकालः परोक्षत्वञ्च लिडर्थ इति शाब्दिकवादः। तथाहि नागेशेन निगदितम् - **"लिट्तिङस्तु भूतानद्यतनकालः परोक्षत्वञ्चाधिकोऽर्थः"**[७] इति।

### अनद्यतनपदार्थनिरूपणम् -

ननु लिडर्थघटकीभूतार्थः क इति चेदुच्यते न विद्यते अद्यतनो यस्मिन् सोऽनद्यतन इति। अद्यतनभिन्नकालो ह्यनद्यतनशब्दार्थः। ननु कः पुनरयम् अद्यतनः ? अद्यतनपदार्थविचारे मतिमतां विमतिर्बाहुल्येन लक्ष्यते। तथाहि कैयट-हरदत्तत-न्यासाकारादीनां नये सम्पूर्णो दिवसः, व्यतीतायाः रात्रेश्च चतुर्थो भागः, आगामिन्याश्च प्रथमो भागोऽद्यतनपदेन व्यपदिश्यते। तथाहि महाभाष्यप्रदीपे कैयटेन प्रदीपितम् - **"रात्रेश्चतुर्थो यामो दिवसश्च सर्वो द्वितीयायाश्च रात्रेः प्रथमोऽद्यतनः"**[८] इति। न्यासेऽपि सममेव मतं समुपन्यस्तम् - **"दिवसः सकलोऽतिक्रान्ताया रात्रेश्चतुर्थो याम आगामिन्याश्च प्रथमो याम इत्येषोऽनद्यतनः काल"**[९] इति।

विप्रतिष्ठते त्वत्र दीक्षितपादः। तन्नये रात्रेरतीताया उत्तरार्धेन आगामिन्याश्च

पूर्वार्धेन सहितो दिवसः सम्पूर्णोऽद्यतनकालः। तदुक्तं तेन सिद्धान्तकौमुद्याम् - **"अतीताया रात्रेः पश्चार्धेनागामिन्याश्च पूर्वार्धेन च सहितो दिवसोऽद्यतनः"**[१०] इति।

उक्ताद्यतनकालभिन्नकालो ह्यनद्यतनकालः। अनद्यतनश्चासौ भूतकालश्च अनद्यतनभूतकाल इति कर्मधारयसमासः।

**परोक्षपदार्थनिरूपणम् -**

परोक्षापरोक्षभेदाद् द्विविधोऽनद्यतनः। अक्ष्णः परं परोक्षम् , मयूरव्यसंकादित्वात्समासः। वृत्तिविषये चाक्षिशब्दः सर्वेन्द्रियवाची, न तु नेत्रमात्रपर्यायः।

भट्टोजिदीक्षितमते परोक्षमित्यत्र अव्ययीभावः, प्रति-पर-समनुभ्योऽक्ष्णः इति समासान्तष्टच्। परं नागेशादयो नानुमोदन्ते दीक्षितमतम् । तन्नये अक्षशब्दोऽप्यस्तीन्दिरयवाचकः, तेनालं समासान्तकल्पनया। प्रति-पर-सम...... इत्यत्र परशब्दोपादानमनार्षम् । तदुक्तं तेन **--- "वृत्तिविषये त्वक्षिशब्दः सर्वेन्द्रियवचने न चक्षुःपर्यायः।"**[११] इति। एवञ्च इन्द्रियजन्यज्ञानाविषयोऽर्थः परोक्षशब्दवाच्यः।

परोक्षविषये महाभाष्यकृता तदीयभाष्ये मतचतुष्टयं समुपस्थापितम् । तत्र वर्षशतात् पूर्वसंवृत्तं वृत्तं परोक्षम्  इत्येके, वर्षसहस्रात् पूर्वकालिकं वृत्तं परोक्षमित्यन्ते, कुटीरादिव्यवहितं वृत्तं परोक्षम् इत्यपरे, दिनत्रयात्प्राक् कृतं वृत्तं परोक्षमिति चान्ये जगदुः। तथा चात्रेदं भाष्यवचनम्  -

**"केचित्तावदाहुः ---- वर्षशतं परोक्षमिति।**

**अपर आहुः --- वर्षसहस्रवृत्तं परोक्षमिति।**

**अपर आहुः --- कुड्कुटान्तरितं परोक्षमिति ।**

**अपर आहुः --- द्व्यहवृत्तं त्र्यहवृत्तं चेति।"**[१२] इति।

अत्रेदमवधेयं यद्भाष्यकृता तदीयभाष्येऽन्यदीयनयान् उपस्थाप्यापि न कोऽपि सिद्धान्तः सिद्धान्तितः।

भाष्यटीकाकृता कैयटेन तु परोक्षार्थो निरूपितः । तदुक्तं तेन **“इन्द्रियगोचरसाधनासाधितान्यद्यतनक्रियावाचिनस्तु धातोर्लिट् प्रत्यय”**[१३] इति । इन्द्रियजन्यज्ञानविषयेण साधनेन साधिता अनद्यतनक्रियावाचिनोऽर्थः परोक्ष इति तदर्थः।

## वैयाकरणभूषणसारानुसारेण लिडर्थविमर्शः -

**“परोक्षे लिट्”** इति सूत्रानुरोधादनद्यतने भूते परोक्षे धातोर्लिङ् भवति। तेन अद्यतने भूते, अनद्यतने भविष्यति, भूते अपि अपरोक्षे च न लिट्प्रयोगः। परोक्षत्वञ्च साक्षात्करोमीत्येतत्प्रतीतिसाक्षिकलौकिक-विषयताशालिज्ञानविषयत्वम् ।

तत्र धात्वर्थविशेषणमिदं परोक्षत्वमिति प्राचामाशयः। धात्वर्थो हि क्रिया। सा च क्रिया साध्यत्वेनाभिधीयमानो गुणभूतावयवः पूर्वापरीभूतानेकव्यापाराणाम् एकफलजनकत्वविषयैकबुद्ध्या विषयीकृतः समूहात्मकः। पूर्वापरीभूतायाः क्रियायाश्च तस्याः प्रत्यक्षप्रमाज्ञानाविषयात्तथा तदवयवानामाशुविनाशित्वेन पिण्डीभावाभावात् कथमपि सा निदर्शयितुमशक्या। तेन स्वत एव धात्वर्थभूता क्रियापरोक्षेति सिद्धम् । अतः स्वतोऽपरोक्षाया धात्वर्थभूतायाः क्रियाया विशेषणत्वेन प्रयुक्तं परोक्षत्वमव्यवर्तकं सद् व्यर्थं, विशेषणस्येतरव्यावर्तकत्वस्वभावात् । तेन नेदं परोक्षत्वं धात्वर्थविशेषणमिति पूर्वपक्षिणां पक्षः।

प्राञ्चस्तन्मतचिखण्डिषया निजगदुर्यद् अवयवानां क्षणिकत्वेन तन्मेलनात्यन्तासम्भवत्वेन पिण्डस्यैवाभावात् पिण्डीभूताया निदर्शयितुमशक्यत्वेऽपि अवयवश एकैकावयवस्य साक्षात्करोमीत्येतादृशलौकिकप्रतीतिविषयत्वसम्भवाद् अवयवद्वारा वक्तुः प्रत्यक्षविषयक्रियायां लिडापत्तिहतये परोक्षत्वस्य विशेषणा धात्वर्थे युक्ता। अन्यथा पश्य मृगो धावतीत्यत्र मृगकर्तृकधावनक्रियाया दर्शनक्रिया-निरूपितकर्मत्वासङ्गतिर्ध्रुवा।

ननु क्रियावयवा अपि क्रियावदतीन्द्रिया एव, यथा पचेरुदकसेचनादयोऽवयवास्तथा तेषामप्यवयवास्तेऽपि समूहरूपेणैव धातुवाच्यः।

यस्तु क्षणावच्छिन्नस्तद्रूपोऽवयवः, स तु न धातुवाच्यः, किन्त्ववयवसमूहात्मनैव, आश्रितक्रमरूपत्वात्तद्वाच्यस्य । एवञ्च सदसद्रूपा क्रिया न सद्विषयेन्द्रियग्राह्या। तदुक्तं -

**क्रमात् सदसतां तेषामात्मना न समूहिनः।**

**सद्वस्तुविषयैर्यान्ति सम्बन्धं चक्षुरादिभि।।**[१५] इति।

अत्यन्तापरदृष्टेति भाष्यस्याप्यवयवरूपेण समूहात्मना चादृष्टेत्येवार्थः, अत एव **वर्तमाने लडि**[१६]ति सूत्रे भाष्ये - **अस्ति वर्तमानो कालः, परं त्वादित्यगतिवन्नोपलभ्यत**[१७] इत्युक्तम्। एवञ्च, वर्तमानत्वाक्रान्तक्रियाणां स्पष्टमेवाप्रत्यक्षत्वं तत उपलभ्यते, पश्य मृगो धावतीत्यादौ तु दृशिर्ज्ञानार्थको धावतिर्वा फलपर इति न कश्चिद्दोषः। किञ्च, अवयवस्य प्रत्यक्षत्वे प्रकृतः कटम् इत्यादौ अवयवातीतत्वेन समुदायातीतत्वमादाय क्ताद्युपपादनवदवयवप्रत्यक्षत्वेन समुदायप्रत्यक्षत्वमादाय, परोक्षे इत्यस्य चारितार्थ्ये भाष्यस्थपूर्वपक्षस्य निर्द्दलत्वापत्तिरित्यपरितोषान्मतान्तरमाह भट्टः कौण्डः - **व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितमितो नोक्तदोषः**[१८] इति। अत्र व्यापाराविष्टानां क्रियानुकूलसाधनानामेवात्र पारोक्ष्यं विवक्षितम्। अस्मिन्न पक्षे परोक्ष इति व्यापाराविष्टे कारके विशेषणं, न तु धात्वर्थक्रियायां, तस्या अतीन्द्रियत्वेन परमाणोरिव बहिरिन्द्रियजन्यप्रत्यक्षायोग्यत्वात्। ततश्च अनद्यतनभूतकालिको यो व्यापारस्तादृशव्यापारविशिष्टः परोक्षश्च यो देवदत्तादिस्तन्निष्ठक्रियावाचकाद् लिडिति प्रकृतसूत्रार्थः। तेन न पचनादिक्रियानाविष्टस्य चैत्रस्य प्रत्यक्षत्वेऽपि चैत्रः पपाचेति प्रयोगानुपपत्तिः पचनादिक्रियानाविष्टस्य परोक्षत्वात् । प्रयोक्तुर्व्यापाराविष्टसाधनस्य देवदत्तादेः प्रत्यक्षत्वदशायाम् अयं पपाच इति प्रयोगवारणार्थतया परोक्षपदासार्थक्ये सति अव्यावर्तकत्वरूपो दोषो नेत्यर्थः। अत्रेदमवधेयं यद् व्यापाराविष्टस्य प्रत्यक्षत्व एव लिण्नेष्यते, न तु व्यापारानाविष्टस्य प्रत्यक्षत्वे। एवं च प्रयोक्तुः प्रत्यक्षाविषयकर्तृकस्थल एव चैत्रः पपाचेति लिट्प्रयोगो भवति। यदा हि प्रयोक्तानद्यतनभूतकालिकगमनादिक्रियाकर्तारं सज्जीकृताश्वादिकं बद्धपरिकरं

गमनोद्यतं साक्षात्कृतवांस्तदायं जगामेति प्रयोगो न भवति व्यापाराविष्टस्य बद्धपरिकरादिकस्य गन्तुः परोक्षत्वाभावात्। यदा तावत् तादृशगमनादिक्रियाकर्तारं क्रियानाविष्टत्वेन साक्षात्करोति तदायं जगामेति लिट्प्रयोगः क्रियाविष्टस्य गन्तुः परोक्षत्वादिति भावः। यद्यपि क्रियाया अप्रत्यक्षत्वे विशिष्टज्ञाने विशेषणज्ञानस्य कारणत्वात् तत्र विशेषणभूतक्रियायाः प्रत्यक्षत्वाभावेन तादृशक्रियाविशिष्टसाधनप्रत्यक्षं दुरुपपादमेव, तथा च तद्वैयर्थ्यं तदवस्थमेव तथापि फूत्कारसीत्कारादिक्रियावैशिष्ट्यसमये साधनसमये साधनप्रत्यक्षस्य विवक्षितत्वान्नोक्तदोष इति बोद्धव्यम्।

अत्रेदमप्यवधेयम् - प्राचीनमते परोक्षत्वं धात्वर्थे विशेषणं, नवीनमते तु धात्वर्थसाधने तद्विशेषणम्। तत्र मतयोः प्रथममेव युक्तरूम्। अत्र कारणं तावद् धातोरित्यधिकारस्य धात्वर्थे लक्षणायां स्ववाच्यत्वरूपः सम्बन्धः। साधनलक्षाणायां तु स्ववाच्यसाधनत्वरूपः सम्बन्धः स्वीकार्यः। अतो साधने लक्षणा न कर्तव्या गौरवात् इति युक्तम्।

ननु व्यातेने किरणावलीमुदयनः इत्यत्र उदयनकर्तृकक्रियायाः प्रयोक्तुरुदयनस्य प्रत्यक्षत्वेन विस्तारक्रियायाः पारोक्ष्याभावाल्लिडनुपपन्नः। साधनपारोक्ष्यपक्षे क्रियाविष्टसाधनस्य स्वप्रत्यक्षत्वादिति हेतुर्बोध्यः। अत्रोच्येते स्वव्यापारस्य वर्तमानदशायां विषयान्तरासक्तिरूपव्यासङ्गादिना स्वयमप्रतिसन्धाने अपि ततः कार्येणानुमितौ लिड् भवति। यथा बहु जगाद पुरस्तात्तस्य मत्तः किलाहम् इत्यत्र हर्षातिरेकादिना मनसः असन्निहितत्वात् क्रियापारोक्ष्यं तद्वत्प्रकृते अपि विषयान्तरसञ्चाररूपव्यासङ्गादिना उदयनकर्तृकव्यापारस्य व्यापारविशिष्ट - साधनस्य चोदयनप्रत्यक्षविषयत्वाभावरूपपरोक्षत्वसम्भवान्न् लिटः असङ्गतिः। ननु स्वव्यापारस्य यथाकथञ्चित् परोक्षत्वोपपादने अपि तत्रानद्यतनातीतत्वयोरुपपादनमसम्भवमिति चेदुच्यते व्यातेने इत्यादि भूतत्वानद्यतनत्वपरोक्षत्वानामारोपेणोपपादनीयम्। आरोपफलं तु ग्रन्थे अतिसुकरत्वशीघ्रनिष्पाद्यत्वादिप्रत्यायनम् । तत्फलं तु अध्येतृणामर्थप्रविवेका - दिफलकममुं ग्रन्थं ज्ञातुं सोत्कण्ठानामाह्लादः। परोक्षत्वारोपोऽप्येतत्फलक एव। एवं सूक्ष्मकालेन करिष्यामि यत्र करणकाले स्वयमपि साक्षात्कर्तुमशक्यम् इत्येव

बोधनाद् अनायासेन ग्रन्थकरणमपि व्यङ्ग्यम् । सूर्योपमाप्येतत्पोषिकैव। इतरग्रन्थेभ्योऽत्र ग्रन्थे, तत्कर्तृभ्यश्च स्वस्मिन् व्यतिरेकोऽपि व्यङ्ग्यः। भविष्यतः प्रयोगकाले वास्तवमेव परोक्षत्वमिति न तदंशे आरोपापेक्षेत्यपि वदन्ति। तदुक्तम् - **कथं तर्हि व्यातेने किरणावलीमुदयन इति, स्वक्रियायाः स्वप्रत्यक्षत्वादिति चेत् असङ्गतमेव, व्यासङ्गादिना स्वव्यापारस्य परोक्षत्वोपपादनेऽपि बहुतरमनः-प्रणिधानसाध्यशास्त्रनिर्णयजनकशब्दरचनात्मके ग्रन्थेऽनद्यतनत्वातीतत्वयोर्विस्तार -क्रियायामसत्त्वेन अनद्यतनातीतत्वयोरभावेन तदर्थकलिडसम्भवात्**[१९] इति।

## परमलघुमञ्जूषानुसारेण लिडर्थविमर्शः -

नागेशनये भूतानद्यतनकालः परोक्षत्वञ्च लिडर्थः। तदुक्तम् - **लिट्तिङस्तु भूतानद्यनतकालः परोक्षत्वञ्चाधिकोऽर्थ**[२०] इति। पपाच इत्यादितो बोधे तत्तद्विषयसन्देहानुदयाद् भूतत्वादेरिव अनद्यतनत्वादेरपि बोधविषयत्वम् । साक्षात्करोमीत्येतादृशविषयशालिज्ञानत्वं ज्ञाननिष्ठमपरोक्षत्वम् । तद्विषयत्वं चार्थनिष्ठमपरोक्षत्वम्।

नागेशमते अपि लिडर्थरूपं परोक्षत्वं कारके विशेषणं, न तु क्रियायां क्रियाया अतीन्द्रियत्वेन भाष्योक्तत्वात्। धातोरुत्तरमनुप्रयुक्तानां भ्वादीनां क्रियासामान्यमर्थः। तथा च आम्प्रकृतेरर्थः तत्तत्क्रियाविशेषः। ननु अभेदसम्बन्धेन शाब्दबोधं प्रति प्रकारतावच्छेदकविशेष्यतावच्छेदकयोर्विरूपोपस्थितेर्हेतुत्वेन कृभ्वसामप्रकृतेश्च क्रियावाचकत्वेन कथमुभयोरभेदान्वय इति चेदुच्यते सामान्यविशेषयोरभेदान्वयः स्वीकार्यः। यथा द्रोणो ब्रीहिरित्यत्र द्रोणपदार्थस्य विशेषपरिमाणस्य प्रत्ययार्थेन सामान्यपरिमाणेन साकमभेदान्वयस्तथात्रापि बोध्यम् । तथाहि परमलघुमञ्जूषायामीरितम् - **परोक्षत्वं च कारके विशेषणं न तु क्रियायाम्, तस्या अतीन्द्रियत्वेन लिट्सूत्रे भाष्ये प्रतिपादनाद् व्यभिचाराभावात्। कृभ्वाद्यनुप्रयोगस्थले कृभ्वसां क्रियासामान्यमर्थः आम्प्रकृतेस्तु तत्तत्क्रियाविशेषः। सामान्यविशेषयोभेदान्वयः अकर्मकप्रकृतिकामन्तानुप्रयुक्तकृभ्वसामकर्मिकैव क्रिया**[२१] इति।

वस्तुतस्तु अनुप्रयुक्तानां कृभ्वासां फलशून्यक्रियासामान्यवाचकत्वमेव। सकर्मकाकर्मकत्वव्यवहार आम्प्रकृतिधातोरेव बोध्यः। तेन एधाञ्चक्रे देवदत्त इत्यत्र

एकत्वावच्छिन्नपरोक्षत्वावच्छिन्नदेवदत्तकर्तृका भूतानद्यतनकालाधिकरणिका वृद्ध्यभिन्ना क्रियेति शाब्दबोधो भवति।

परोक्षत्वञ्चेत् प्रत्यक्षप्रमाणान्यप्रमाणजन्यरज्ञानविषयत्वं, तदा प्रत्यक्षक्रियाया अपि शाब्दज्ञानविषयत्वे, अनुमितिज्ञानविषयत्वे वा पपाच इत्यदिप्रयोगापत्तिः स्यात्। अतो नागेशेन परोक्षत्वं निरूपितमेवम् --- **परोक्षत्वञ्च साक्षात्कृतमित्येतादृशविषयताशालिज्ञानाविषयत्वम्**[२२] इति। भूतत्वञ्चाद्यतनाष्ट - प्रहरव्यतिरिक्तत्वे सति भूतत्वं बोध्यम्।

## तार्किकदिशा लिडर्थविमर्शः

### व्युत्पत्तिवादानुसारेण लिडर्थविमर्शः -

गदाधाराचार्यनये अतीतत्वम् अनद्यतनत्वं परोक्षत्वञ्च लिडर्थः। ननु किं नाम परोक्षत्वम् इति जिज्ञासाशमनाय न्यगादि भट्टैः - **परोक्षत्वञ्च वक्तुः साक्षात्काराविषयत्वम्**[२३] इति। तत्रानद्यतनत्वस्य ह्यस्तने अपि सत्त्वात्परोक्षत्वमिति। तेन ह्यस्तनस्यापि धात्वर्थस्य वक्तृसाक्षात्कारविषयत्वे न लिट्लकारप्रयोगापत्तिः। तथाहि अनद्यतनत्वे सति परोक्षत्वस्य गर्भिण्याः पुत्रभवनादौ वृत्तेः गर्भिण्याः पुत्रो भविष्यति इत्यादौ गर्भिण्याः पुत्रो बभूवेति प्रयोगापत्तिरिति चेदुक्तम् -अतीतत्वमिति। तथा च कंसं जघान इत्यादौ अनद्यतन-वक्तृसाक्षात्काराविषय-वर्तमानध्वंस-प्रतियोग्युत्पत्तिक-कंसकर्मक-हननानुकूल-कृतिमान् इत्याद्यन्वयबोधो बोद्धव्यः।

न चानद्यतनत्वस्य परोक्षत्वविशिष्टातीतत्वव्यापकत्वात् पृथग्लिङर्थत्वमनुपा - देयमेवेति शङ्क्यम्, अद्यतनस्याप्यतीतस्य कार्यान्तरव्यासक्तचित्ततयापरोक्ष - त्वसम्भवात्।

अभूनृपो बिबुधसखः परन्तपः, अध्यास्त सर्वर्तुसुखम् अयोध्याम् इत्यादिषु तु परोक्षसत्त्वे अपि परोक्षाविवक्षया लिडभावाद्भूतसामान्ये लुङ्प्रयोगः। तथा च गादाधरगीः - **अध्यस्तसर्वर्तुसुखाम् अयोध्याम् इत्यादौ परोक्षत्वसत्त्वे अपि परोक्षत्वाविवक्षया न लिट्**[२४] इति। जयमङ्गलेनापि भट्टिकाव्यस्य

जयमङ्गलटीकायामुक्तम् - **अभूदिति भूतसामान्ये लुङ् । भूत इत्यर्थः। अन्यथा राज्ञश्चिरातीतत्वात् कवेः परोक्षत्वाच्च लिट् स्यात्**[२५] इति।

**परोक्षत्वविषये मतान्तरनिरासः -**

केचित्तावद्वक्तृभिन्नकर्तृकत्वं परोक्षत्वमिति मतं पोषयन्ति। तेषां नये अध्यास्ते - इत्यादौ अध्यासनक्रियायाः कविभिन्नराजकर्तृकत्वात्परोक्षत्वं सिद्धम्। तथा च, परोक्षत्वस्य वक्तृभिन्नकर्तृकत्वादेव उत्तमपुरुषस्य वक्तृकर्तृकत्वेन परोक्षत्वाभावात् उत्तमपुरुषप्रयोगासम्भवे सति णलुत्तमो वा इत्यनेन लिट उत्तमपुरुषादेशविधानं व्यर्थं सद् अपरोक्षतायामपि साधुत्वं ज्ञापयति।

मतमेतन्न सहते आचार्यपादः। तथाहि - कलिङ्गे दृष्टः असि, नाहं कलिङ्गान् जगाम इत्यदौ अत्यन्तापह्नवस्थले सूत्रान्तरेण (अत्यन्तापह्नवे लिड् वक्तव्यः) इति वार्तिकेन क्रियाया अपरोक्षत्वे अपि लिड्विधानात् नाहं कलिङ्गान् जगामेति स्थलविषयकतयैव णलुत्तमो वा इति शास्त्रोत्पत्तेः तस्य ज्ञापकताकथनमयुक्तम् ।

अत्रैवं ब्रूमो यत्परोक्षत्वविवक्षैव लिटः साधुतानियमिकेत्यभिहितं भट्टाचार्यैः। यथा परोक्षे अपि परोक्षत्वविवक्षाया अभावात् न लिट् भवति, एवमपरोक्षे अपि परोक्षत्वविवक्षायां लिट् साधुः। व्यातेने इत्यत्र क्रियायाः परोक्षत्वं विवक्षितमाचार्यैः। किमर्थं विवक्षितमिति चेत्, इयं क्रिया अनायासनिष्पाद्या यत्र काले मयापि न साक्षात् क्रियत इत्येवम् अनायास-सिद्धत्वप्रतीतये। युक्ता चेयं सरणिः व्यातेने इत्यत्र लिटः साधुत्वोपपादने। कथमन्यथा लिडर्थस्य अनद्यतनत्वस्य भूतत्वस्य च तत्राभावेन लिटः साधुता भवेत्। सुकरत्वशीघ्रनिर्वर्त्यत्वादिप्रतीतिजननाय भूतत्वानद्यतनत्वादिविवक्षायाः सत्त्वेन तत्साधुताया उपपादनीयत्वात्। न च वक्तृसाक्षात्काराविषयत्वरूपस्य परोक्षत्वस्य तत्र बाधाद् आहार्यपरोक्षानङ्गीकाराच्च कथं तत्र शाब्दबोध इति वाच्यम् । गौणमुख्यसाधारणं परोक्षत्वं लिडर्थः। वक्तृसाक्षात्कारविषयत्वं मुख्यं परोक्षत्वम्। अनायासनिष्पाद्यत्वं गौणं परोक्षत्वम् । तदेव व्यातेने इत्यत्र शाब्दबोधे भासते, गङ्गायां घोष इत्यत्र शैत्यपावनत्वादिविशिष्टतीरस्य शाब्दबोधे भानमिव।

केचित्तु श्येनेनाभिचरन् यजेत इत्यत्र यथा बाधात् लिङर्थस्य बलवदनिष्टाननुबन्धित्वस्य न धात्वर्थे भानम्, तथा व्यातेन इत्यत्र बाधात् लिडर्थः

परोक्षत्वं धात्वर्थे न भासते इति वदन्ति। एतत्संवं हृदि कृत्वाक्षेपसमाधिपुरःसरमगादि गदाधरेण - **केचित्तु वक्तृभिन्नकर्तृकत्वमेव परोक्षत्वम्, अत एव लिट उत्तमपुरुषासम्भवेनापरोक्षतायामपि लिटः साधुत्वे णलुत्तमो वा इत्यादेर्ज्ञापकत्वमुपायकारोक्तं सङ्गच्छते, अन्यथा निद्रादिदशायां स्वकर्तृकगमनादिक्रियायाः स्वपरोक्षत्वसम्भवेन ज्ञापकत्वासङ्गतेरित्याहुः।**

**कलिङ्गे दृष्टः असि?, नाहं कलिङ्गान् जगाम इत्यादौ अत्यन्तावपह्नवस्थले सूत्रान्तरेण क्रियाया अपरोक्षत्वे अपि लिङ्विधानात् तादृशज्ञापकबलेन व्यातेने किरणावलीम् इत्यत्र लिटः साधुत्वोपपादनमुपायकृतामुयुक्तमेवेति बोध्यम्। अत्यन्तावपह्नवश्चाबाधितपरोक्तविपरीतबोधनाय तदुपपादकाभावप्रतिपादनेच्छा कलिङ्गाधिकरणकदर्शनादेरुपपादकं कलिङ्गगमनादिकं तेन विना तदसम्भवात्। अत्यन्तापह्नवः स्वरूपसन्नेव लिट्साधुतानियामकः**[२६] इति।

**शब्दशक्तिप्रकाशिकानुसारेण लिडर्थविमर्शः -**

आचार्यजगदीशेन लिटो लक्षणद्वयं न्यरूपि स्वग्रन्थे। तत्राद्यं लिट्लक्षणं निरूपयतागादि यद् यादृशी तिङ्त्वभिन्नधात्वर्थधर्मिकस्वार्थप्रकारकशाब्दबोधं न जनयति तादृशी तिङेव लिट्-पदवाच्या। तथाहि कीर्तितेयं कारिका -

**द्विरुक्तभिन्नधात्वर्थे स्वार्थस्यन्वयबोधने।**

**या न योग्या तादृशी तिङ् लिट्पदेनाभिधीयते।।**[२७] इति।

यादृशानुपूर्वीकप्रकारकज्ञानत्वं द्विरुक्तान्यधर्मिकस्वार्थप्रकारकबोध-जनकतावच्छेदकं, तादृशानुपूर्वीमत्तिङ्त्वं लिट्त्वमिति कारिकार्थः। ननु लिट्-लक्षणे अभावद्वयनिवेशनं व्यर्थम्, द्विरुक्तधात्वर्थधर्मिक-स्वार्थप्रकारकबोधजनकत्वस्यैव लिट्लक्षणत्वादिति चेन्न, तल्लक्षणस्य लुङाद्यतिव्याप्तेः। तथाहि अशिश्रियत्, अदुद्रुवत् इत्यादौ लुङो द्विरुक्तधात्वर्थधर्मिकस्वार्थप्रकारकशाब्दबोधं जनयन्तीति तत्र लिटः अतिव्याप्तिर्निर्बाधा। अभावद्वयनिवेशे तु अपाक्षीत् इत्यादौ लुङो द्विरुक्तधात्वर्थधर्मिकस्वार्थप्रकारकज्ञानजनक-सत्त्वात् नातिव्याप्तिः। लिटस्तु जघान जघ्नतुः इत्यादौ द्विरुक्तधात्वर्थे एव स्वार्थप्रकारकबोधजनकत्वमिति समन्वयः।

लिटः अर्थान्तरं निरूपयता निरुक्तम् -

**द्विरुक्तस्य यजेरर्थे चकास्तेराम्युतस्य वा।**

**या स्वार्थस्यान्वये हेतुः सा वा तिङ् कथ्यते लिटा।।**[२८] इति।

द्विरुक्तयज्धात्वर्थधर्मिकस्य आमन्तचकासधात्वर्थधर्मिकस्य वा स्वार्थप्रकारका - न्वयबोधस्य जनकतावच्छेदकं यादृशानुपूर्वीप्रकारकज्ञानत्वं तादृशानुपूर्वीमत्तिङ्त्वं लिट्त्वमिति कारिकार्थः।

मनश्चचाल इत्यत्र अतीककाल इव धात्वर्थनिष्ठं परोक्षत्वमपि लिटः अर्थः। तच्चातीन्द्रियत्वम्। तथा च अतीतकालवृत्त्यतीन्द्रयचलवन्मन इति शाब्दबोधो भवतीति।

**लकारार्थानुसारेण लिडर्थविमर्शः -**

**लिटः परोक्षत्वे सत्यतीतत्वमेकः अर्थस्तथा अतीतत्वे सति अत्यन्तापह्नवत्वमर्थान्तरमि**[२९]ति सिद्धान्तवागीशसिद्धान्तः। परोक्षत्वस्य यथाश्रुतातीन्द्रियत्वार्थमस्वीकृत्य तदर्थं निरूपयतोक्तम् - **परोक्षत्वं तावद् तद्वक्तृभिन्नकर्तृकत्वमि**[३०] ति। तद्वक्तृभिन्नकर्तृकत्वं हि लिड्विभक्त्यन्तपदप्रयोग - कर्तृभिन्नपुरुषकर्तृकत्वमिति बोध्यम्। तेन चैत्रगमने मैत्रप्रत्यक्षाविषयत्वरूपपरोक्षत्वस्य असत्त्वे अपि चैत्रो जगाम इति लिड्विभक्त्यन्तपदप्रयोगकर्तृभिन्नपरुरुषकर्तृकरूपपरोक्षत्वस्य सत्त्वादेव प्रयोगसाधुता उपपद्यते। इदञ्च अभ्युपगमवादमात्रम् ।

नन्वेतादृशाभ्युपगमवादास्वीकारे का क्षतिरिति चेदुच्यते, तथात्वे अन्यत्र व्यसक्तचित्ततया स्वयंकृतगमनादेरतीन्द्रियत्वे अत्र अहं जगामेति प्रयोगापत्तिर्दुर्वारा। परं परोक्षत्वस्य एतादृशार्थस्वीकारे व्यासक्तचित्ततया स्वयंकृतगमनादेरतीन्द्रियत्वे अपि लिट्प्रयोक्तृपुरुषगमनकर्तृपुरुषयोरैक्यात् न कथमपि अहं जगामेति अनिष्यप्रयोगापत्तिः।

अतीतत्वे सत्यन्तापह्नवत्वमिति लिटः अर्थान्तरम् । यादृशशब्दप्रयोगे जिज्ञासितविषयस्य न केनापि प्रकारेण उपपत्तिः सम्भवति तादृशशब्द एवात्रापह्नवः। आत्यन्तिकत्वञ्च प्रश्नविषयविपरीतमनुक्त्वा तदुपपादकविपरीतकथनम्। यथा श्रुतप्रश्नवाक्यजन्यबोधे यदंशे यदवगाहते तदंशे

तदभावगाहिबोधस्य साक्षाज्जनकं यादृशानुपूर्वीप्रकारकज्ञानं तादृशानुपूर्वीमच्छब्दमनुक्त्वा फलतः प्रश्नार्थविपरीतकथनमात्यन्तिकत्वमिति फलितम् । तथाहि कलिङ्गे दृष्टः असि मयेति केनचिदुक्ते नाहं कलिङ्गं जगाम इत्युत्तरितं परेण। अस्मिन्नुदाहरणे कलिङ्गे दृष्टः असि मया इथि जिज्ञासितविषयस्य विपरीतं नाहं कलिङ्गे दृष्ट इत्यनुक्त्वा तदुपपादकस्य तस्य जिज्ञासितविषयस्य उपपादको दर्शनविषयतायाः कारणं कलिङ्गगमनमिति, तद्विपरीतकथनं कलिङ्गगमनाभावकथनमम् अपह्नवः। तेनात्रातीतार्थे अत्यन्तापह्नवसत्त्वाद् उत्तमपुरुषे अपि लिट्प्रयोगो युक्तः।

## मीमांसकदिशा लिडर्थविमर्शः

**अनद्यतनभूतपरोक्षत्वं लिडर्थ** इति भाट्टचिन्तामणिकृन्मतम्। अनद्यतने भूते इत्यनुवृत्तौ परोक्षे लिडिति पाणिनीयसूत्रात्। वर्तमानाहोरात्रवृत्तिप्रागभाव - ध्वंसान्यतराप्रतियोग्युत्पत्तिकत्वमद्यतनत्वम्। तद्भिन्नत्वमनद्यतनत्वम्। भूतत्वं वर्तमानध्वंसप्रतियोगित्वम्। साक्षात्करोमीत्येतादृशज्ञानाविषयत्वं परोक्षत्वम्।

## उपसंहृतिः -

लिट्लकारस्य अर्थस्तावत् परोक्षतच्चमनद्यत्वञ्चेत्यस्मिन् विषये नास्ति केषाञ्चिदपि संशयलेशः। परं वैयाकरणेषु तार्किकेषु परोक्षविषये मतान्तराणि सुलभानि। तत्र भाष्यमतव्याख्यानावसरे प्राचां शाब्दिकानां परोक्षत्वविषये बहुविधमतान्युपस्थाप्य भाष्यकृन्मतमपि व्याख्यातम्। तथा चार्वाचां शाब्दिकानामपि कौण्डभट्टादीनां मतान्युपस्थापितानि। अनद्यतनशब्दघटकीभूताद्यतनस्वरूपविषये प्राचां तथार्वाचां मतवैमत्यमस्मद्दृक्पथमायाति। तत्र प्राचीनेभ्यो भट्टोजिदीक्षितस्तु भिन्नमतमुपस्थापयामास। तथाहि--- दिवसः सकलः अतिक्रान्ताया रात्रेश्चतुर्थो याम आगामिन्याश्च प्रथमो याम इत्येषः अद्यतनः काल इति प्राचामाशयः। परं दीक्षितराद्धान्तस्त्वतीताया रात्रेः पश्चार्धेनागामिन्याश्च पूर्वार्धेन च सहितो दिवसः अद्यतन इति। परोक्षविषये तार्किकाणां मतं त्वविरोध्येव। अत्रायं विशेषो यत्तार्किकेष्वाचार्यजगदीशेन लिट्लक्षणमेव स्वग्रन्थे निरूपितं, न तु लिटः स्वरूपम्। परं नास्त्यत्रापि विरोधस्तल्लक्षणस्य तदर्थानुगुणत्वात्। ततश्च मीमांसकमतमपि

समुपन्यस्तम् तत्र । एवं शाब्दिक-तार्किक-मीमांसकदिशा यथामति लिङर्थो न्यरूपीति दिक्।

## तथ्यसूत्राणि—

१. वृहदारण्यकोपनिषदि - ४/५/६

२. शब्दशक्तिप्रकाशिकायाः तृतीयकारिकायाम्

३. शब्दशक्तिप्रकाशिकायाः षष्ठकारिकायाम्

४. अष्टाध्यायाः १.४.१०४संख्यकं सूत्रम्

५. अष्टाध्याय्याः ३.२.११५संख्यकं सूत्रम्

६. सिद्धान्तकौमुद्यास्तिङन्तप्रकरणे १८पृष्ठाङ्के

७. परमलघुमञ्जूषायां लादेशाधिकारे ७५पृष्ठाङ्के

८. महाभाष्यप्रदीपे १८७संख्यकपृष्ठाङ्के

९. काशिकाया न्यासे ४९५पृष्ठाङ्के

१०. सिद्धान्तकौमुद्यास्तिङन्तप्रकरणे १७५पृष्ठाङ्के

११. महाभाष्ये १७५संख्यकपृष्ठाङ्के

१२. तस्मिन्नेव

१३. तस्मिन्नेव

१४. वैयाकरणभूषणसारे लकारार्थनिर्णये १४६संख्यकपृष्ठाङ्के

१५. वैयाकरणभूषणसारस्य काशिकाव्याख्यायां १६४पृष्ठाङ्के

१६. अष्टाध्याय्याः ३.२.१२३संख्यके सूत्रे

१७. महाभाष्ये ३.२.१२३संख्यकसूत्रे १९७-१९९पृष्ठाङ्के

१८. वैयाकरणभूषणसारे लकारार्थनिर्णये १४७पृष्ठाङ्के

१९. वैयाकरणभूषणसारे लकारार्थनिर्णये १४८-१४९संख्यकपृष्ठाङ्के

२०. परमलघुमञ्जूषायां लादेशार्थविचारे ७५संख्यकपृष्ठाङ्के

२१. तत्रैव

२२. ततैव

२३. सुनन्दाव्याख्यासहिते व्युत्पत्तिवादे ८२८संख्यकपृष्ठाङ्के

२४. तत्रैव

२५. भट्टिकाव्यस्य प्रथमश्लोकस्य जयमङ्गलटीकायां ९संख्यकपृष्ठाङ्के

२६. सादर्शे व्युत्पत्तिवादे ३१०-३११पृष्ठाङ्के

२७. शब्दशक्तिप्रकाशिकायाः १०४कारिका

२८. शब्दशक्तिप्रकाशिकायाः १०५कारिका

२९. लकारार्थनिर्णये २८संख्यकपृष्ठाङ्के

३०. तत्रैव

३१. भाट्टचिन्तामणौ ८७संख्यकपृष्ठाङ्के

## सहायकग्रन्थसूची


१. अष्टाध्यायी, पुष्पादीक्षितसम्पादिता, संस्कृतभारती, नवदेहली, 2010

२. कालसिद्धान्तदर्शिनी, हाराणचन्द्रभट्टाचार्यः, सदेशः, कलिकाता, पुनर्मुद्रितम्, 2007

३. किरणावली, शिवचन्द्रसार्वभौमसम्पादिता, दा एसियाटिक् सोसाइटि, कोलकाता, 1989

४. तर्कामृतम्, महामहोपाध्यायजीवनकृष्णतर्कतीर्थसम्पादितः, दा एसियाटिक् सोसाइटि,कोलकाता,1974

५. तर्कामृतम्, विष्णपदमहापात्रसम्पादितम्, मान्यताप्रकाशनम्, नवदेहली, 2009

६. दशलकारवादः, हरेरामत्रिपाठिसम्पादितः,राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली, 2010

७. परमलघुमञ्जूषा, आचार्यलोकमणिदाहाल-सम्पादिता, चौखम्बा संस्कृत प्रतिष्ठान,1991

८. परमलघुमञ्जूषा, जयशङ्कलालत्रिपाठि-सम्पादिता, कृष्णदास अकादमी, बाराणसी,वि,सं.2061

९. प्रक्रियाकौमुदी, श्रीमुरलीधरमिश्रसम्पादिता, सम्पूर्णानन्द संस्कृविश्वविद्यालयः, वाराणसी,2000

१०.भाट्टचिन्तामणिः, (तर्कपादः), श्रीसूर्यनारायणशुक्लसम्पादितः, चौखम्बा संस्कृत सीरिज आफिस, बाराणसी,1970

११.भूषणसार-परमलघुमञ्जूषयोः सिद्धान्तानां समीक्षा, ड. राममनोहर मिश्रविरचितः, सम्पूर्णानन्दसंस्कृविश्वविद्यालयः, 1983

१२. महाभाष्यम्, श्रीभार्गवशास्त्रिजोशिसम्पादितम्, चौखम्बासंस्कृतप्रतिष्ठानम्, पुनर्मूद्रितम्,2008

१३. महाभाष्यप्रदीपव्याख्यानानि, एम्.एस्.नरसिमाचार्यसम्पादितानि, इन्स्टिट्युट् फ्रान्सियास् इण्डोलोजिक्, पण्डेचेरी,1983

१४. लकारार्थनिर्णयः तारानाथतर्कवाचस्पतिसम्पादितः, कलिकाता, 1364 वङ्गाब्दः

१५. लकारार्थनिर्णयः, अशोककुमारबन्द्योपाध्यायसम्पादितः, श्रीबलरामप्रकाशनी, 2005

१६. लघुसिद्धान्तकौमुदी (भैमीव्याख्यायुता), भीमसेनशास्त्रिसम्पादिता, भैमीप्रकाशनम्, पञ्चमसंस्करणम्, दिल्ली,2007

१७. वैयाकरणभूषणसारः शङ्करीयुतः, महादेव-चिमणाजी-आप्टे-सम्पादितः, आनन्दाश्रममुद्रणालयः,1879

१८. वैयाकरणभूषणसारः, बालकृष्णपञ्चोलिसम्पादितः, चौखम्बा संस्कृत सीरिज, बाराणसी,1969

१९. वैयाकरणभूषणसारः प्रभादर्पणटीकाद्वयोपेतः, तारकेश्वरशास्त्रि चतुर्वेदिसम्पादितः, चौखम्बा संस्कृत भवन, बाराणसी, 1879

२०. वैयाकरणसिद्धान्तकौमुदी, गिरिधरशर्मसम्पादिता, मोतीलाल-वेनारसी-दास, नवमसंस्करणम्, दिल्ली,2001

२१. व्युत्पत्तिवादः सादर्शः, हरेरामत्रिपाठिसम्पादितः, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली,2011

२२. व्युत्पत्तिवादः सुनन्दाव्याख्यासहितः, ड. सच्चिदानन्दमिश्रसम्पादितः, भारतीयविद्याप्रकाशनम्, दिल्ली, 2001

२३. व्यत्पत्तिवादः जयासहितः, रामकान्तमिश्रसम्पादितः, इलाहावादः, पुनःप्रकाशनम्, वाराणसी, 1988

२४. व्युत्पत्तिवादः कृष्णम्भट्टी-दीपिका-प्रकाश-शास्त्रार्थकलादिसप्तव्याख्यायुतः, अचिन्त्यदासम्पादितः,न्यु भारतीय वुक् कर्पोरेशन्, दिल्ली, 2004

२५. व्युत्पत्तिवादः गूढार्थतत्त्वालोकयुतः, धर्मदत्तझा-सम्पादितः,कृष्णदास अकादमी, 1978

२६. शब्दशक्तिप्रकाशिका, पण्डितढण्ढुराजशास्त्रिसम्पादिता, चौखम्बा संस्कृत भवनम्, तृतीयसंस्करणात्मिका, 2002

# वैयाकरणनिकाये स्फोटवादः

सुमन्तचौधुरी

**उपोद्घातः -**

भारतीयानां मते तत्त्वज्ञानस्यैव दर्शनशब्दवाच्यत्वम् । आत्मज्ञानस्यैव च परमतत्त्वज्ञानत्वम् । अतः परमात्मसाक्षात्कारसाधकानि वेदान्तादिशास्त्राणि दर्शनशास्त्रपदवीं लभन्ते । अपि च येषु येषु शास्त्रेषु आत्मतत्त्वं प्राधान्येन प्रस्तूतं वर्तते, प्रसङ्गवशाच्च प्रतिपादितानि लौकिकतत्त्वानि परमात्मविषये पर्यवसितानि तेषामेव दर्शनपदवाच्यत्वं संगच्छते। यथा वेदान्तदर्शनम् । वेदान्तशास्त्रेषु "आत्मा वाऽरे द्रष्टव्यः, श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इत्यादिवाक्यानि ब्रह्मप्राप्तिसाधकानि आत्मतत्त्वावधारकाणि वा भवन्ति । ननु पदानां साधुत्वासाधुत्वानुशासनेन शब्दसाक्षात्कारसाधकस्य व्याकरणशास्त्रस्य च दर्शनशास्त्रत्वं कथमिति चेदुच्यते शब्दस्यैव प्रत्यगात्मस्वरूपत्वात् व्याकरणशास्त्रस्य अध्यात्मज्ञानोपायभूतत्वात् दर्शनशास्त्रत्वम् अस्त्येवेति।

ननु शब्दस्य जगत्कारणत्वे ब्रह्मस्वरूपत्वे वा किं मानमिति चेदुच्यते - "वाचा हीदं सर्व्वं कृतम्", "प्रजापतिर्वा इदमेकमासीत्। तस्य वागेव स्वमासीत्। तां मिथुनं समभवत् । सा गर्भमधत्त, साऽस्मादाक्रान्तामत, सेमा: प्रजा: असृजत्", "ओमित्येकाक्षरमिदं सर्वम्", इत्यादिश्रुतिरेव शब्दब्रह्मणः जगत्कारणतां प्रतिपादयति । भर्तृहरिणापि उक्तम् -

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।

विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।" इति।

एवं दर्शनान्तरप्रतिष्ठितब्रह्मणि यद्ब्रह्मत्वं तत्सर्वं वाच्येवोपपद्यते। वैशेषिकाः अपि

शब्दस्यैव प्रपञ्चकारणत्वं प्रतिपादयति। तथाहि तैरुक्तं -"पदार्थनाम्ना स्वीकृता वेदान्तिदिभिश्च ब्रह्मणो विवर्तरूपेणाङ्गीकृता यावन्तो भावास्ते शब्दस्यैव विवर्ता" इति। अत्र हरिवृषभेणोच्यते -

"ब्रह्मेदं शब्दनिर्माणं शब्दशक्तिनिबन्धनम्।

विवृतं शब्दमात्राभ्यस्तास्वेव प्रविलीयते।।" इति

एवमेव मुण्डकोपनिषदि अपि उच्यते -

"तदेतत्सत्यं यथा सुदीप्तात्पावकाद्विस्फुलिङ्गाः सहस्रशः प्रभवन्ते सरूपाः।तथाक्षरद्विविधाः सौम्यभावाः प्रजायन्ते तत्र चैवापियन्ति।।" इति।

महाभाष्यकृता पतञ्जलिना पस्पशाह्निके तादृशस्य शब्दस्य स्वरूपं प्रतिपादयिष्यता "अथ शब्दानुशासनम्" इति प्रतिज्ञावाक्यमुपन्यस्तम्। ततः केषां शब्दानामिति प्रश्न उपस्थापितः। तस्योत्तररूपेण सिद्धान्तितं -

"येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः"।इति।

तादृशः शब्दः स्फोटरूप एव। वैयाकरणैः किमर्थं स्फोटः स्वीकृतः इति चेदुच्यते कैयटेन -"वैयाकरणा वर्णव्यतिरिक्तस्य पदस्य वाक्यस्य वा वाचकत्वमिच्छन्ति। वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणानर्थक्यप्रसङ्गात्। आनर्थक्ये तु प्रत्येकमुत्पत्तिपक्षे यौगपद्येनोत्पत्त्यभावात् अभिव्यक्तिपक्षे तु क्रमेणैवाभिव्यक्त्या समुदायाभावादेकस्मृत्युपारूढानां वाचकत्वे सरो रस इत्यादावर्थप्रतिपत्त्य - विशेषप्रसङ्गात्तद्व्यतिरिक्तः स्फोटो नादाभिव्यङ्ग्यो वाचकः" इति।

अयं स्फोटः अष्टविधः - वर्णजातिस्फोटः, पदजातिस्फोटः, वाक्यजातिस्फोटः, अखण्डपदव्यक्तिस्फोटः, अखण्डवाक्यव्यक्तिस्फोटः, वर्णव्यक्तिस्फोटः, सखण्डपदव्यक्तिस्फोटः, सखण्डवाक्यव्यक्तिस्फोटः चेति। एषु अखण्डवाक्यव्यक्तिस्फोटस्यैव प्राधान्यं प्रामाण्यञ्च ।

अतः कीदृशः स्फोटात्मकः शब्दः प्रमाजनकः इति जिज्ञासायाम् उच्यते आप्तोपदेशरूपस्य स्फोटात्मकशब्दस्यैव प्रमाजनकत्वं स्वीकुर्वन्ति वैयाकरणाः। अतः

गौतमोऽपि "प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि" इति सूत्रे तादृशस्यैव शब्दस्य प्रमाजनकत्वं स्वीकुर्वन्ति। तथाहि नागेशेन उच्यते "आप्तोपदेशरूपः शब्दः प्रमाणम् इति। आप्तश्च नामानुभवेन वस्तुतत्त्वस्य कार्त्स्न्येन निश्चयवान् रागादिवशादपि नान्यथावादी यः स इति चरके पतञ्जलिः" इति।

अत्रायं प्रश्नः शब्दस्य प्रमाणत्वे स्वीकृते घटशब्दात् पटविषयिणी प्रमा कस्मान्न जायते। कस्माद्वा घटत्वप्रकारकघटविशेष्यकज्ञानमिव घटप्रकारकघटत्वविशेष्यकज्ञानं नोपजायते। कस्माद्वा वृत्तिज्ञानशून्यस्य विस्मृतवृत्तिकस्य वा तच्छब्दज्ञानरहितस्य वा चैत्रादेर्भानं न भवति। कस्माच्च घटपदाश्रयत्वेनोपस्थितस्याकाशस्य जनकतयोपस्थितस्य वा चैत्रादेर्वा शब्दजन्यज्ञाने विषयतया भानं न भवति कस्माद्वा अगृहीतवृत्तेरपि पदान्न ज्ञानं चेत्यादयः नाना प्रश्ना मनसि समुद्यन्ति। एतेषामेव संशयानां निराकरणाय परमलघुमञ्जुषायां नागेशेन शाब्दबोधे कार्यकारणभावः प्रदर्शितः।

## शाब्दबोधे कार्यकारणभावः -

"तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्ति - विशिष्टज्ञानं हेतुः" इति। अर्थात् घटत्वप्रकारकघटविशेष्यकशाब्दबोधं प्रति घटत्वधर्मावच्छिन्नघटनिरूपितं यद्वृत्तिविशिष्टज्ञानं तदेव हेतुरिति।

अत्र वृत्तिज्ञानशून्यस्य विस्मृतवृत्तिकस्य शब्दज्ञानरहितस्य वा शाब्दबोधवारणाय शाब्दबुद्धिं प्रति वृत्तिज्ञानं हेतुरिति। घटविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति पटनिरूपितवृत्तिज्ञानस्य हेतुत्वापत्तिनिरासाय तद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तन्निरूपितवृत्तिज्ञानं हेतुरिति उक्तम्। एतेन घटपदात् समवायसम्बन्धेनोपस्थितस्य आकाशस्य जनकतयोपस्थितस्य चैत्रादेश्च न शाब्दबोधे भानं भवति। किञ्च, घटत्वप्रकारकघटविशेष्यकवृत्तिज्ञानाद् घटप्रकारकघटत्वविशेष्यकशाब्दबोधवार - णाय घटप्रकारकघटत्वविशेष्यकवृत्तिज्ञानाद्घटत्वप्रकारकघटविशेष्यकशाब्दबोध - वारणाय तद्धर्मावच्छिन्नविषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपित -वृत्तिज्ञानस्य हेतुत्वं स्वीकृतम्।

एवं कार्यकारणभावबोधोत्तरं तत्रस्थवृत्तिशब्दार्थविषये आकाङ्क्षा जायते।

तथाहि वृत्तिर्नाम "पदार्थस्मृत्यनुकूलत्वे सति पदपदार्थसम्बन्धः वृत्तिरि"ति। सा वृत्तिस्त्रिधा शक्तिः लक्षणा व्यञ्जना चेति।

अधुना संशयः वृत्त्याश्रयः शब्दः क इति। अस्मिन् प्रसङ्गे मीमासंकैः नैयायिकैः च सह वैयाकरणानां विरोधः अवलोक्यते।

**मीमांसकमतखण्डनम् -**

मीमांसका हि वर्णानां नित्यत्वं मन्यन्ते, तेषामेवार्थवाचकत्वात्। तेन तन्मते वर्णानामेव वृत्तेराश्रयत्वम्। अत्र वर्णानां प्रत्येकं वाचकत्वम् अथवा वर्णसंघातस्य इत्यत्र विचार आवश्यकः। न हि प्रत्येकं वर्णानां वाचकत्वं सम्भवति, तथा सति द्वितीयप्रभृतिवर्णोच्चारणस्य वैयर्थ्यापत्तिः। यदि गौरित्यत्र गकारस्यैव वाचकत्वं तदा औकारविसर्जनीययोः उच्चारणं व्यर्थमेव। ननु वर्णसङ्घातः शब्द वृत्त्याश्रय इति चेन्न, उच्चारणकालव्यवहितोत्तरकाले एव प्रध्वंसित्वात् वर्णानां यौगपद्यासम्भवात्। अर्थात् यौगपद्यं हि तदैव भवति यदि वर्णानां युगपदेवोपस्थितिः स्यात्। तद्विपरीतं वर्णास्तु उच्चारणसमनन्तरमेव नश्यन्ति। युगपत् सर्वेषां वर्णानामुच्चारणं न सम्भवति। अतः युगपदुच्चारणाभावात् संघात एव नोपपद्यते। वर्णानामुच्चारणप्रध्वंसित्वं "परः सन्निकर्षः संहिता" (अष्टा.-१-४-१०९) इति सूत्रे प्रतिपादितम्। न च नष्टविद्यमानयोः पौर्वापर्यनियमः अस्ति। तथा सति "इको यणचि" (अष्टा.-६-१-७७) इति सूत्रे "तस्मिन्निति निर्दिष्टे पूर्वस्य"(अष्टा.-१।१।६६) इति परिभाषया अचि परे तदव्यवहितपूर्वस्य इको यण् स्यादिति वाक्यार्थः असङ्गतः स्यादिति प्रक्रियाया एव उच्छेदः स्यात्। तेन न प्रत्येकं वर्णा न वा वर्णसङ्घातः वृत्त्याश्रयो भवति।

**नैयायिकमतखण्डनम् -**

तेषां नये वर्णानामनित्यत्वेऽपि पूर्वपूर्वकालोच्चरितवर्णश्रवणजन्यसंस्कारद्वारा उत्तरोत्तरवर्णोच्चारणसमयेऽपि तेषामव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्वोच्चरितवर्णानां ग्रहणं भवति इति।

अथवा, पूर्वपूर्ववर्णजाः शब्दाः शब्दजशब्दन्यायेन चरमवर्णप्रत्यक्षपर्यन्तं जायमाना एव सन्तीति पदप्रत्यक्षोपपत्तिः न दुश्शका।

अथवा, पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतचरमवर्णानुभवतः शाब्दबोधः इति। परन्तु तेषां मतं न साधु। तथाहि, आद्ये अयं पूर्वोऽयं पर इति व्यवहारासम्भवात् अव्यवहितोत्तरत्वसम्बन्धः वक्तुमशक्यः। द्वितीये, शब्दजशब्दन्यायेन पदप्रत्यक्षोपपादनेऽपि पदस्याविद्यमानत्वेन शक्त्याश्रयत्वं वक्तुं न शक्यम्।

तृतीये, येन क्रमेण अनुभवस्तेनैव क्रमेण तत्संस्कारस्थितिः इति विनिगमनाभावात् सरो रसः, नदी, दीनः इत्यादौ विपरीतसंस्कारोद्बोधेन प्रत्येकमन्यार्थप्रत्ययापत्तेः।

अतः शक्त्याश्रयः शब्दः क इति पृच्छायां वैयाकरणैः उच्यते वृत्त्याश्रयः शब्दः स्फोटरूपः एव।

**स्फोटनिरूपणम् -**

वाचः चातुर्विध्यं स्वीक्रियते नागेशेन... परापश्यन्तीमध्यमावैखरीभेदेन। तत्र मूलाधारस्थपवनसंस्कारीभूता मूलाधारस्था शब्दब्रह्मरूपा स्पन्दशून्या विन्दुरूपिणी परा वागुच्यते। नाभिपर्यन्तमागच्छता तेन वायुना अभिव्यक्ता मनोगोचरीभूता पश्यन्ती वागुच्यते। ततः हृदयपर्यन्तमागच्छता तेन वायुना अभिव्यक्ता तत्तदर्थवाचकशब्दस्फोटरूपा श्रोत्रग्रहणायोग्यत्वेन सूक्ष्मजपादौ बुद्धिनिर्ग्राह्या मध्यमा वागुच्यते। ततः आस्यपर्यन्तमागच्छता तेन वायुना ऊर्ध्वमाक्रमता च मूर्धानमाहत्य परावृत्य च तत्स्थानेष्वभिव्यक्ता परश्रोत्रेणापि ग्राह्या वैखरी वागुच्यते। तथाहि उच्यते-

"परा वाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता।

हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।

वैखर्या हि कृतो नादः परश्रवणगोचरः।

मध्यमया कृतो नादः स्फोटव्यञ्जक उच्यते।।" इति।

एवमेव –

"चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयां वाचो मनुष्या वदन्ति।।" इति मन्त्रस्य व्याख्यानकाले पतञ्जलिना महाभाष्ये उक्तं -"चत्वारि वाक्परिमिता पदानि। चत्वारि पदजातानि नामाख्यातोपसर्गनिपाताश्च। तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहायां त्रीणि निहिता नेङ्गयन्ति। गुहायां त्रीणि निहितानि नेङ्गयन्ति। न चेष्टन्ते, न निमिषन्तीत्यर्थः। तुरीयं वाचो मनुष्या वदन्ति। तुरीयं ह वा एतद्वाचो यन्मनुष्येषु वर्तते। चतुर्थमित्यर्थः"।

युगपदेव मध्यमावैखरीभ्यां नाद उत्पद्यते। तत्र मध्यमानादोऽर्थवाचक-स्फोटात्मकशब्दव्यञ्जकः। वैखरीनादो ध्वनिः सकलजनश्रोत्रमात्रग्राह्यो भेर्यादिनादवन्निरर्थकः। किन्तु मध्यमानादः सूक्ष्मतरः कर्णपिधाने जपादौ च सूक्ष्मतरवायुव्यङ्ग्यः शब्दब्रह्मरूपस्फोटव्यञ्जकश्च। तादृशमध्यमानादव्यङ्ग्यः शब्दः स्फोटात्मको ब्रह्मस्वरूपो नित्यश्च। तथाहि उक्तं भर्तृहरिणा -

"अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः।।" इति।

अधुना प्रत्येकं स्फोटः अधस्तात् आलोच्यते -

**वर्णस्फोटः -**

शास्त्रप्रक्रियानिर्वाहको वर्णस्फोटः। स च अखण्ड एव। प्रकृतिप्रत्ययास्तत्तदर्थवाचका इति तदर्थः। अत्र नैयायिकाः स्थानिनां वाचकत्वं स्वीकुर्वन्ति, न तु आदेशानाम्। किन्तु वैयाकरणा आदेशानामेव वाचकत्वं स्वीकुर्वन्ति।

**नैयायिकानां मतम् -**

नैयायिकानां मते पचति, रामः इत्यादिप्रयोगान्तर्भूताः तिब्विसर्गादयः वाचकाः न सन्ति, अपि तु तैः प्रयोगान्तर्गततिब्विसर्गादिभिः स्मृताः लकाराः स्वादयश्च वाचकाः सन्ति। तेषां नये स्थानी एक एव, तस्य स्थाने जायमानाः तिबादयः सुबादयश्च आदेशाः बहवः। अतः लाघवानुरोधात् ते स्थानिन एव वाचकत्वं स्वीकुर्वन्ति।

किञ्च, यदि आदेशानां वाचकत्वं स्वीक्रियेत तदा यत्र प्रत्ययस्य लुगादिः भवति तत्र

आदेशस्य अभावरूपत्वात् वाचकत्वं कथमपि न सम्भवति।

किञ्च, कर्त्रादिबोधं प्रति कृत्यादिबोधं वा प्रति तिबादयः आदेशाः कारणानि सन्ति। एकस्य लटः स्थाने तिबादय अष्टादश आदेशाश्चेत् यत्र तिप् भवति तत्र तसादिर्न भवति। एवं पचति इत्यादौ यत्र तिपा बोधः भवति तत्र तसादिरूपं कारणं नास्ति, यत्र च पचतः इत्यादौ तसादिना बोधो जायते तत्र तिब्रूपं कारणं नास्ति। अर्थात् पचति इत्यादौ तसादिरूपकारणाभावेऽपि केवलं तिपा बोधो जायते व्यतिरेकव्यभिचारः। पचतः इत्यादौ तिपः अभावेऽपि कर्त्रादिबोधो जायते इति अन्वयव्यभिचारः। अत्र व्यभिचारवारनाय कार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वं निवेश्यते अर्थात् तिबव्यवहितोत्तरजायमानं बोधं प्रति तिप् कारणं, तसाद्यव्यवहितोत्तजायमानं बोधं प्रति च तसादिकारणमिति रीत्या व्यभिचारो वारणीयो भवति इति गौरवम्।

किञ्च, स्थानिनां वाचकत्वे "लः कर्मणि च भावे चाकर्मकेभ्यः" (अष्टा.-३।४।६९) इति सूत्रमपि प्रमाणम्। अनेन सूत्रेण कर्तरि कर्मणि भावे च अर्थे लकारा विधीयन्ते, न तु तिबादिषु अर्थेषु। अतः एतैः कारणैः ते नैयायिकाः स्थानिन एव वाचकत्वमङ्गीकुर्वन्ति।

**<u>वैयाकरणमतम्</u> -**

वैयाकरणाः नैयायिकसिद्धान्तान् त्रिभिः युक्तिभिः खण्डयन्ति - व्यवस्थितेः व्यवह्तितेः, तद्धेतुन्यायतश्च। तथाहि व्यवस्थितिर्नाम व्यवस्था। व्यवस्थानुरोधात् प्रयोगान्तर्गताः तिबादय एव वाचकाः सन्ति, न तु प्रयोगान्तर्गतैः तिबादिभिः स्मृताः लकाराः। यतो हि पचति इत्यादौ स्थानिनं लकारमजानतोऽपि पुरुषस्य बोधो भवति। यदि लकारस्य एव वाचकत्वं स्यात् तदा लकारं यो न जानाति तस्य बोधो न स्यात्।

व्यवहृतिः नाम व्यवहारः। व्यवहारेणापि शाब्दबोधो भवति। तथाहि उच्यते -

"शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च।

वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः।।" इति।

**वैयाकरणनिकाये स्फोटवादः**

तथाहि कश्चित् प्रयोजकवृद्धः प्रयोज्यवृद्धम् आदिशति घटमानय इति। तदा प्रयोज्यवृद्धः घटमानयति। कश्चित् बालः प्रयोज्यवृद्धस्य घटानयनकार्यं दृष्ट्वा घटानयनरूपं कार्यं प्रयोजकवृद्धस्य वाक्येन प्रयोज्यमिति जानाति। ततः प्रयोजकवृद्धः घटं नय, पटम् आनय इत्यादि प्रयोज्यवृद्धमादिशति। तदा प्रयोज्यवृद्धस्य तत्कार्यं दृष्ट्वा बालकः आनय इति पदस्य आनयनम् इति अर्थं, घटः इत्यस्य कम्बुग्रीवादिमान् इति अर्थः, पटः इत्यस्य तन्तुजालरूपार्थं विविच्य जानाति। नैयायिकानां नये स्थानिनो लकारस्य वाचकत्वे स्वीकृते अत्रापि बालकस्य बोधो न स्यात्।

तद्धेतुन्यायस्तावत् यदि लकारस्य वाचकत्वं स्वीक्रियते तदा भू ल् इत्यत्रापि बोधः स्यात्। परन्तु बोधस्तु भवति इति आदेशसमभिव्याहृतस्यैव। अतः यस्मात् शाब्दबोधस्तस्यैव शाब्दबोधं प्रति कारणत्वमिति न्यायेन आदेशस्यैव वाचकत्वं न तु स्थानिनाम्।

किञ्च स्थानिनामपि तत्र तत्र व्याकरणेषु भिन्नत्वात् तेषां वाचकत्वस्वीकारे लाघवमिति मतमपि नैयायिकानां न युक्तम्। यथा पाणिनिना तिपः स्थानी लट् प्रकल्पितः, कैश्चित तिबादेः स्थानी कट् इति प्रकल्पितः। एवं विभिन्नेषु स्थानिषु कः स्थानी वाचकः, को न वाचक इति व्यवस्थापयितुं न शक्यते।

"लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रे लाघवानुरोधात् कल्पिते लकारे कर्त्रादिवाचित्वमङ्गीकृतम्। वस्तुतः वाचकत्वमादेशस्यैव इति न विरोधः।

अतः आदेशस्यैव वाचकत्वं स्वीकरणीयम्। एवमादेशभूतप्रकृतिप्रत्ययादीनामेव वाचकत्वम्। प्रकृतित्वं नाम प्रत्ययनिष्ठविधेयतानिरू- पितोद्देश्यतावच्छेदकाक्रान्तत्वम्। प्रत्ययत्वं च अर्थबोधकत्वे सति पाणिनीयसङ्केतसम्बन्धेन प्रत्ययपदत्वम् इति।

अयं वर्णस्फोटः द्विविधः वर्णव्यक्तिस्फोटः, वर्णजातिस्फोटश्चेति। "अर्थवन्तो वर्णाः धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्" इति भाष्यकारवचनात् एकाक्षरीकोशादिमाध्यमेन च वर्णानाम् अर्थवत्त्वं ज्ञायते। यदा कश्चित् वर्णविशेषमुच्चारयति तदा वर्णव्यक्तिस्फोटः। यथा अर्थगतजातेः शक्यत्वं

तथैव शक्ततावच्छेदकवर्णादिगतजातेरेव वाचकत्वम्। तथाहि उच्यते हरिणा -

"अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।

कैश्चिद् व्यक्तय एवास्याः ध्वनित्वेन प्रकल्पिताः।।" इति।

अर्थात् ककारगकारप्रभृतिभिरनेकवर्णव्यक्तिभिरभिव्यङ्ग्यो वर्णजातिस्फोटः इति भावः। न च जातेः प्रत्येकं वर्णेषु सत्त्वात् प्रत्येकस्मात् अर्थबोधापत्तिः। अनेकव्यक्त्यभिव्यङ्ग्यवर्णसमुदाये तस्य व्यासज्यवृत्तित्वादक्षतेः, ककारादिवर्णव्यक्तिमाध्यमेन अभिव्यक्तवर्णसमुदायस्य वर्णजातिस्फोटत्वम्।

**पदस्फोटः -**

आदेशानां वाचकत्वे सिद्धे पदस्फोटोऽपि सिद्धः एव। तस्मादेव भूषणसारे उच्यते – "समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमभिव्याहाररूपपदस्य वाचकता सिध्यति, प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात्, प्रत्येकं वर्णानामर्थवत्त्वे प्रातिपदिकत्वापत्तौ नलोपः प्रातिपदिकान्तस्य इत्यादिभिः धनं, वनम् इत्यादौ नलोपाद्यापत्तेश्च।" भूषणसारकारिकायाम् उच्यते -

"अथादेशा वाचकाश्चेत् पदस्फोटस्ततः स्फुटः इति।"

अर्थात् समभिव्याहृतवर्णानां वाचकत्वे सिद्धे तादृशवर्णसमुदायरूपपदस्य वाचकता सिद्ध्यति, वर्णसमुदायस्य वाचकत्वे पदस्फोटोऽपि सिद्धयति। एवं वर्णसमुदायो वाचक इति पदस्फोटपक्षे पर्यवसानम्। "सुप्तिङन्तं पदमि"ति पारिभाषिकपदस्य वाचकत्वस्वीकर्तृणां मते -

"घटेनेत्यादिषु न हि प्रकृत्यादिभिदा स्थिता।

वस्नसादाविवेहापि सम्प्रमोहो हि दृश्यते।। " इति।।

अर्थात् घटेन इत्यादौ घटे इति प्रकृतिः, न इति प्रत्ययः, घट् इति प्रकृतिः, एन इति प्रत्यय इति विभागस्य "सर्वे सर्वपदादेशाः" इति स्वीकारे विशिष्य प्रकृतिप्रत्यययोर्ज्ञानासम्भवान्न वाचकत्वमिति। यथा "बहुवचनस्य वस्नसौ" (अष्टा.- ८।१।२१) इत्यनेन समुदायस्यादेशविधानान्नात्र तद्विभागः सम्भवतीतीत्यर्थः। एवं घटेनेत्यत्रापि प्रकृतिप्रत्ययविभागस्य ज्ञानाभावात् समुदायस्यैव वाचकत्वमिति

सुप्तिङन्तरूपपदस्य वाचकत्वात् पदस्फोटः सिद्ध्यति।

व्यवहारिकरूपेण पदस्फोटो द्विविध – सखण्डः अखण्डश्चेति। तार्किकाः पाचक इति पदं यौगिकं, पङ्कज इति पदञ्च योगरूढं स्वीकुर्वन्ति। परन्त्वन्ये जना व्यवहारदशायां पाचकपङ्कजादिशब्दानेव सखण्डपदस्फोटस्योदाहरणत्वेन स्वीकुर्वन्ति। यतो हि, खण्डशक्तेरनुसन्धानपूर्वकमेव कोशादिना शक्तेर्ज्ञानं तत्र भवति। व्याकरणज्ञानरहितानां तु व्यवहारेणैव शक्तिज्ञानात् तान्येव अखण्डपदस्फोटस्योदाहरणानि। मणिनूपुररथन्तरप्रभृतयो रूढशब्दाः सर्वेषां मते अखण्डा एव स्वीक्रियन्ते, अवयवार्थज्ञानरहितसमुदायशक्तिज्ञानादेव तत्रार्थबोधात्।

**वाक्यस्फोटः -**

वाक्यार्थबोधं प्रति पदार्थबोधस्य कारणत्वात् पदस्फोटानन्तरं वाक्यस्फोटो विचार्यते। घटम् आनय घटं पश्य इत्यादिस्थलेषु क्रियाकारकविभागसम्भवात् सखण्डवाक्यस्फोटः। हरेऽव विष्णोऽव इत्यादिस्थलेषु अखण्डवाक्यस्फोटः, क्रियाकारकविभागस्य अज्ञानत्वात्। अत्र हरे अव इति स्थिते अकारे पूर्वरूपे कृते न ज्ञायते किं कारकं, का वा क्रियेति।

परन्तु अवैयाकरणानां प्रकृतिप्रत्ययक्रियाकारकादिज्ञानहीनत्वात् सर्वाण्यपि वाक्यानि अखण्डवाक्यस्फोटस्योदाहरणानि भवन्ति।

ननु एवं चेत्, शास्त्राप्रामाण्यप्रसङ्गः, पदवाक्ययोरखण्डत्वात् शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां व्युत्पादनपरत्वादिति चेन्न, यथा उत्तरमीमांसायां सर्वाधारस्य एकस्य नित्यस्य ब्रह्मणः स्वरूपबोधनाय अन्नमयप्राणमयमनोमयविज्ञानमयानन्द - मयरूपपञ्चकोशानामवतरणं कृतं तथैव अत्रापि अखण्डस्फोटबोधनाय प्रकृतिप्रत्ययपदवाक्यादिकल्पनम्। आचार्यो भर्तृहरिः अखण्डवाक्यजातिस्फोटं स्वीकरोति। तदुक्तं हरिणा -

"अनेकव्यक्त्यभिव्यङ्ग्या जातिः स्फोट इति स्मृता।।" इति।

अर्थात् पदे प्रकृतिप्रत्ययरूपानेकवर्णव्यक्तिमाध्यमेन, वाक्ये सुबन्ततिङन्तादिपदमाध्यमेन समुदायवाचकत्वशक्त्या वाक्यस्य वाचकत्वं सिद्ध्यतीति अखण्डवाक्यजातिस्फोटसिद्धिः।

एतेषु स्फोटभेदेसु सत्सु वाक्यस्फोटस्यैव मुख्यत्वं, तस्यैव लोकेऽर्थबोधकत्वात्, तेनैवार्थपरिसमाप्तेश्च। तस्मात् न्यायभाष्यकारः कथयति -

"पदसमूहो वाक्यमर्थसमाप्तौ" इति।अर्थात् अभिप्रायस्य अर्थस्य निराकाङ्क्षत्वेन बोधनात् व्यवहारे तस्यैव प्राधान्यं स्वीकर्तव्यमिति।

अयं स्फोटो यद्यपि एकः अखण्डश्च तथापि पदं वाक्यं जपाकुसुमादिलौहित्यपीतत्वादिव्यञ्जकोपरागवशाल्लोहितः पीतः स्फटिक इति भानवत् वर्णादिव्यङ्ग्यो वर्णरूपः पदरूपो वाक्यरूपश्च। एवम् अखण्डस्फोटस्य स्वीकरणे -

"पदे वर्णा न विद्यन्ते वर्णेष्ववयवा न च।

वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन।।" इति भर्तृहरिवचनस्यापि प्रामाण्यं वर्तते।अर्थात् यथा वर्णेषु एकारैकारादिषु अवयवाः न सन्ति, तथैव पदेषु अपि वर्णा न सन्ति। एवं वाक्येष्वपि पदानि न सन्तीति।

व्यञ्जकध्वनिगतकत्वादिकं स्फोटे भासते। यथा आकाशस्य एकस्यैव घटाकाशो महाकाश इत्याद्यौपाधिकभेदो दृश्यते, एकस्यैव च चेतनस्यौपाधिको जीवेश्वरभेदो, जीवानाञ्च परस्परभेदः। एवं स्फोटे अपि व्यञ्जकध्वनिगतकत्वादिभानात् ककारो बुद्ध इत्यौपाधिको भेदव्यवहारः।

**स्फोटोत्पत्तिप्रक्रिया -**

केनचित् घटमानय इति वैखरीनादः प्रयुक्तः। स केनचिच्छ्रोत्रेन्द्रियेण गृहीतः। स नादः इन्द्रियद्वारा बुद्धिहृद्गतः सन् अर्थबोधकं शब्दं स्वनिष्टकत्वादिना व्यञ्जयति तस्मादर्थबोधः, स्फुटत्यस्मात् इति व्युत्पत्तेः। वक्ता हि युगपदेव मध्यमावैखरीभ्यां नादमुत्पादयति। तत्र वैखरीनादः मध्यमानादग्राहको, मध्यमानादस्तु स्फोटव्यञ्जकः इति ततः शीघ्रमेव अर्थबोधः। श्रजोता तु वक्तृभिन्न इति तस्य विलम्बेन अनुभवात् प्रथमं श्रोत्रेन्द्रियेण वैखरीनादं गृह्णाति यो हि हृद्गतो बुद्धिविषयत्वमवाप्य स्वगतकत्वादिना अर्थबोधकं शब्दं व्यञ्जयति, ततः अर्थबोधो भवति।

**स्फोटविषये मुनित्रयसम्मतिः -**

**पाणिनेर्मतम् -**

पाणिनेः "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्" (अष्टा.-१।२।४५ सूत्रम्) इति सूत्रं स्फोटसत्त्वे मानम्। एतेन सूत्रेण अर्थविषयकबोधजनकशब्दमुद्दिश्य प्रातिपदिकसंज्ञा विधीयते। स्फोटात्मकशब्दस्य एव अर्थविषयकबोधजनकत्वात् तस्यैव प्रातिपदिकसंज्ञा अनेन विधीयते। अन्यथा अर्थविषयकबोधजनकशब्दरूपस्य उद्देश्यस्य अभावात् प्रातिपदिकसंज्ञाया निर्विषयत्वेन सूत्रमेव व्यर्थं स्यात्।

## वार्तिककारस्य मतम् -

"सिद्धे शब्दार्थसम्बन्धे" इति वार्तिकं स्फोटस्य अस्तित्वे प्रमाणम्। तथाहि कात्यायनेन अनेन वार्तिकेन शब्दस्य सिद्धत्वमुद्घोषितम्। सिद्धत्वं नाम नित्यत्वम्। शब्दे अर्थे तथा तयोः सम्बन्धे च नित्ये सति पाणिनेः आचार्यस्य लक्षणं प्रवर्तते इति वार्तिकाशयः।अत्र वार्तिककारेण स्फोटरूपः एव शब्दः स्वीकृतः। यतो हि स्फोटरूपस्यैव शब्दस्य नित्यत्वं शाब्दिकैः अङ्गीक्रियते।

## महाभाष्यकारस्य मतम् -

शब्दस्य स्वरूपं प्रतिपादयिष्यता भाष्यकारेण उक्तं "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः" इति। अत्रोच्चारितेन इत्यस्य शारीरमारुताभिहतकण्ठादिस्थानैरवयवद्वाराभिव्यक्तेन येन इत्यर्थः नागेशेन प्रतिपादितः। एतेन स्फोटस्यैव शब्दत्वं स्वीकृतं पतञ्जलिना इति ज्ञायते।

किञ्च, "अइउण्" इति सूत्रस्य भाष्ये "श्रोत्रोपलब्धिः बुद्धिनिर्ग्राह्यः प्रयोगेणाभिज्वलित आकाशदेशः शब्दः।" इति। एकश्च पुनराकाशम् इति शब्दलक्षणे स्फोटरूपशब्दस्यैव निर्देशः पतञ्जलेरि"ति व्याख्यानात् ज्ञायते। तथाहि उद्योते उच्यते - "अत्र शब्द इति एकवचनेन स्फोटस्य एकत्वम् अखण्डत्वं च ध्वनतिम्" इति। किञ्च, कैयटोऽपि "श्रोत्रोपलब्धिः इति श्रोत्रोपलब्ध्या आकाशदेशत्वं शब्दस्य प्रतिपादयति। आकाशप्रदेशविशेषस्य श्रोत्रत्वाद् इन्द्रियाणाम् असम्बद्धविषयाग्रहणात् श्रोत्रस्य च निष्क्रियत्वाद् गमनाभावाद् आकाशदेशत्वमस्याभ्युपेयम्। बुद्धिनिर्ग्राह्य इति - पूर्वपूर्वध्वन्युत्पादिताभिव्यक्ति - जनितसंस्कारपरम्पराप्राप्तपारिपाकान्त्यबुद्धिनिर्ग्राह्य इत्यर्थः। प्रयोगेण इति प्रयुज्यते इति प्रयोगः ध्वनिः, तेनाभिव्यक्तः" इति।

एवम् "एओङ्" इति सूत्रे भाष्ये उच्यते - अथवा उभयतः स्फोटमात्रं निर्दिश्यते रश्रुतेः लश्रुतिर्भवति इति।

"तपरस्तत्कालस्य" (अष्टा.-१।१।७०) इति सूत्रेऽपि भाष्यकृता उच्यते - "स्फोटः शब्दः, ध्वनिः शब्दगुणः। कथम् यथा भेर्याघातः भेरीमाहत्य कश्चित् विंशतिपदानि गच्छति, कश्चित् त्रिंशत्, कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति। ध्वनिकृता वृद्धिः।

"ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते।

अल्पो महांश्च केषाञ्चिदुभयं तत्स्वभावतः।।" इति।

इत्यनेन भाष्येण स्फोटस्य प्रतिपादनं कृतमिति विज्ञायते।

**उपसंहारः -**

वैशेषिकनये परमाणोरिव, वेदन्तिनां परमात्मन इव वा शाब्दिकजगति स्फोटस्य महती चर्चा विहिता। शाब्दिकानां दार्शनिकत्वविचारः स्फोदमाधारीकृत्य एव भवति। अयंस्फोटः एकः अखण्डः आन्तरप्रणवरूपश्च इति नागेशो वैयाकरणसिद्धान्तलघुमञ्जूषायाम्। परन्तु स व्यञ्जकधर्ममाश्रित्य विभिन्नवत्प्रतिभाति। यथा हि संयोगसन्निकर्षात् श्वेतमपि वस्त्रं रक्तवत्प्रतिभाति, यथा वा मण्यादौ एकमपि रूपमनेकधा दृश्यते, तथैव ध्वनिषु स्फोट एक एव विभिद्यते इत्यलमतिविस्तरेण।

## तथ्यसूत्राणि—

१.बृहदारण्योकनिषदि २।४।५

२.शतपथ ब्रा.०८.०१.०२.०९

३.ताण्ड्यमहाब्रह्मण..२०.१४.०२

४.०म ३ ०प्र ५प्रश्नोपनिषदि

५. वाक्यपदीयब्रह्मकाण्डे प्रथमश्लोक

६.मुण्डकोपनिषदि २।१।१

७.पस्पशाह्निके

८. पस्पशाह्निके कैयटव्याख्या, पृष्टा -११

९. परमलघुमञ्जूषायं शक्तिप्रकरणे

१०. परमलघुमञ्जूषायं शक्तिप्रकरणे

११. नागेशभट्टकृतपरमलघुमञ्जूषायां स्फोटनिरूपणप्रकरणे

१२. ऋग्वेदसंहिता, १।१६४।४५

१३. पस्पशाह्निके

१४. वाक्यपदीये ब्रह्मकाण्डे प्रथमश्लोकः

१५. भर्तृहरिः - वाक्यपदीयम्- ब्रह्मकाण्डम् -९३तमश्लोकः

१६. वैयाकरणभूषणसारे स्फोटनिरूपणप्रकरणे

१७. वैयाकरणभूषणसारकारिका, ६४

१८.वैयाकरणभूषणसारकारिका -६५

१९.वाक्यपदीयब्रह्मकाण्डे श्लोकसङ्ख्या -७३

२०. पस्पशाह्निके

२१. तत्रैव

२२.प्रथमं माहेश्वरसूत्रम्

२३. चतुर्थं माहेश्वरसूत्रम्

## उपयुक्तग्रन्थसूची—

१) नागेशस्य, परमलघुमञ्जूषा, लोकमणिदाहालविरचितया किरणावलीसंस्कृत-

व्याख्योपेत-हिन्द्यनुवादसहिता, चौखम्बा सुरभारती प्रकाशन, वाराणसी- २२१००१

२) नागेशस्य, परमलघुमञ्जूषा, वंशीसंस्कृतहिन्दीव्याख्याविभूषिता, श्रीनिवासशर्मणा सम्पादिता, चौखम्बा विद्याभवन, वाराणसी, २२१००१

३) भर्तृहरेः, वाक्यपदीयम् (ब्रह्मकाण्डम्), वामदेवाचार्यस्य संस्कृतहिन्दीप्रतिभाव्याख्यया समन्वितम्, सत्यनारायणखण्डूडीमहोदयेन सम्पादितम, चौखम्बा कृष्णदास अकादमी, वाराणसी, २२१००१

४) कृष्णमणित्रिपाठिनः, स्फोटवादविवेचनम्, श्रीपति-अवस्थीमहोदयेन सम्पादितम्, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २२१००१

५) कौण्डभट्टस्य, वैयाकरणभूषणसारः, श्रीहरिवल्लभकृतदर्पणव्याख्यासम्बलितः तथैव चन्द्रिकाप्रसादद्विवेदीसुबोधिनीहिन्दीव्याख्योपेतश्च, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली- ११०००७

६) नागेशस्य वैयाकरणसिद्धान्तलघुमञ्जूषा (तात्पर्यनिरूपणान्ता), सभापतिशर्मोपाध्यायकृतरत्नप्रभटीकोपेता, चौखम्भा संस्कृत संस्थान, वाराणसी, २२१००१

७) कालिकाप्रसादशुक्लस्य, वैयाकरणानामन्येषां च मतेन शब्दस्वरूपतच्छक्तिविचारः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, २२१००२

९) नागेशस्य, वैयाकरणसिद्धान्तलघुमञ्जूषा (द्वितीयो भागः), माधवशास्त्रिभण्डारीनरहरिशास्त्रिपेण्डसेप्रभृतिभिः सटिप्पणं सम्पादिता, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली-११००५८

१०) कौण्डभट्टस्य, वैयाकरणभूषणसारः, प्रभादर्पणव्याख्याद्वयोपेतः, चौखम्भा संस्कृत संस्थान, वाराणसी, २२१००१

११) कौण्डभट्टस्य, वैयाकरणभूषणसारः (स्फोटनिर्णयः), राष्ट्रियसंस्कृतपीठम्, नवदेहली, २०१०

# व्याकरणमुख्यप्रयोजनखण्डनखण्डनम्

अभिजित् मण्डलः

शास्त्रारम्भे शास्त्रप्रवृत्त्यर्थं शास्त्रप्रयोजनमवश्यमेव निरूपणीयम्। विना प्रयोजनं तु शास्त्रपाठे प्रवृत्तिर्न जायते; परज्ञानायैव शास्त्ररचना, अतः शास्त्रादौ शास्त्रकृता अवश्यमेव शास्त्रप्रयोजनं सूचनीयम्। अनुबन्धचतुष्टयेषु प्रयोजनं तु प्रामुख्यं भजते। यतो हि –

**"प्रयोजनमनुद्दिश्य न मूढोऽपि प्रवर्तते"** इति।

कुमारिलभट्टेनापि प्रोक्तं –

**"सर्वस्यैव हि शास्त्रस्य कर्मणो वापि कस्यचित्।**
**यावत्प्रयोजनं नोक्तं तावत्तत्केन गृह्यते॥"**[१] इति ॥

किञ्च तेनैवोक्तं –

**"सिद्धार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते ।**
**शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनम् ॥"**[२] इति ॥

संस्कृतव्याकरणपरिसरे नैक एव व्याकरणग्रन्था विरचिताः। तेषु व्याकरणशास्त्रस्याकरग्रन्थत्वेन पाणिनेः 'अष्टाध्यायी' प्राधान्यं भजते। शास्त्रादौ तु अवश्यमेव प्रयोजनं सूचनीयं, परन्तु न हि कुत्रापि प्रयोजनं निरूपितं पाणिनिना तदीये व्याकरणशास्त्रे। अतो मीमांसकसम्प्रदायेषु केचन सम्प्रदायाः **'प्रयोगोत्पत्त्यशास्त्रत्वात्...'** इति पूर्वपक्षीयसूत्रस्य वार्तिके आहुः –

**"न तावत्सूत्रकारेण किञ्चिदुक्तं प्रयोजनम्।**
**कथं चैतावति ग्रन्थे स्यात् प्रयोजनविस्मृतिः॥"**[३] इति ॥

अस्योत्तरे तावत् वैयाकरणाः स्वमतं कथयन्ति यत् – प्रत्यवायपरिहाराय धर्मपरायाणजनस्य सकाशे सन्ध्यावन्दनादेः प्रयोजनकथनं यथा वृथा भाषणं तथैव

आत्मोत्कर्षाभिलाषिजनस्य समीपे व्याकरणपाठस्य प्रयोजनकथनमनावश्यकमेव। श्रुतावपि आम्नातं

**"ब्राह्मणेन निष्कारणो धर्मो षडङ्गो वेदोऽध्येयो ज्ञेयश्च"** इति।

व्याकरणस्य वेदाङ्गत्वात् तस्य पाठोऽपि ब्राह्मणेन अवश्यकरणीयः। वस्तुतः उत्तमाधिकारिणमुद्दिश्यैवायं व्याकरणग्रन्थः इति मन्यमानेनैव पाणिनिना व्याकरणस्य प्रयोजनं नोक्तं तदीयग्रन्थादौ। न्यायमञ्जर्याः प्रमाणप्रकरणे जयन्तभट्टेनोक्तं-

**"यद्यपि सूत्रकृता स्वयं प्रयोजनं किमपि न व्यवहृतमिति व्याहृतं तदप्यदूषणमेव, व्याकरणं हि वेदाङ्गमिति प्रसिद्धमेतदा हिमवता आ च कुमारीभ्यः, वेदश्च यदि निष्प्रयोजनः स्वस्ति प्रजाभ्यः, समाप्तानि दृष्टादृष्टफलानि सर्वकर्माणि, जितं चातुर्वर्ण्यबाह्यैरन्तजनपदवासिभिः म्लेच्छैः, अथ सप्रयोजनो वेदो हि सोऽङ्गवत्त्वादङ्गैः सहैव सप्रयोजनतां भजत इति कोऽर्थः प्रयोजनान्तरचिन्तया, न हि दर्शपूर्णमासप्रयोजनादन्यत् प्रयोजनादिप्रयोजनमन्विष्यत इति मन्वानः स्वयं सूत्रकृत्प्रयोजनं नाख्यत्"[४] इति।**

अर्थात् वेदस्याप्रमाणत्वे सति वेदविहितधर्मकर्मादीनां लोपः स्यात्। न तत्क्वचित्। स्वतः सिद्धमेव वेदस्य प्रयोजनम्। यथा दर्शपूर्णमासप्रयोजनाद् अन्यत् प्रयाजादिप्रयोजनस्य न केऽपि अन्वेषणं कुर्वन्ति, तथा वेदस्य प्रयोजनस्य सुप्रसिद्धत्वात् तदङ्गभूतस्य व्याकरणस्यापि प्रयोजनं न कुत्रापि सूचितमिति निश्चप्रचम्।

पाणिनिना यद्यपि न कुत्रापि व्याकरणस्य प्रयोजनं सूचितं तथापि कात्यायनपतञ्जली व्याकरणस्य प्रयोजनं तदीयग्रन्थादौ सूचितवन्तौ। मीमांसका वदन्ति यत् पाणिनेः अनुसरणमेव श्रेयः स्यात् कथं व्याख्यातृभ्यां कात्यायनपतञ्जलिभ्यां प्रयोजननिरूपणम्?

अतो न्यायमञ्जर्याः प्रमाणप्रकरणे जयन्तभट्टेनोच्यते –

**"व्याख्यातारस्तु मुख्यानुषङ्गिकभेदभिन्नप्रयोजनप्रपञ्चं प्रयोजनातिशयव्युत्पादनद्वारकश्रोतृजनोत्साहपरिपोषसिद्धये**

**दर्शितवन्त इति न कश्चिदुपालम्भः"**[५] **इति।**

अनुशिष्यन्ते अपशब्देभ्यः पृथक्कृत्य कथ्यन्ते साधुशब्दा अनेनेति शब्दानुशासनं नाम शास्त्रमिति प्रतिज्ञया साधुशब्दज्ञानं व्याकरणाध्ययनस्य मुख्यं प्रयोजनमिति लभ्यते। ननु साधुशब्दज्ञानं व्याकरणाध्ययनस्य मुख्यं प्रयोजनं तस्य किं वा प्रयोजनम् ? अतो भाष्यकारः भगवान् पतञ्जलिः महाभाष्ये पस्पशाह्निके आह –

**"रक्षोहागमलघ्वसन्देहाः प्रयोजनमि"**[६]ति।

परन्तु मीमांसकेषु केचन सम्प्रदाया मुनिद्वयस्य मतस्य विपक्षमतं व्याहरन्ति। अतः 'प्रयोगोत्पत्त्यशास्त्रत्वात्...' इति पूर्वपक्षीयसूत्रस्य वार्तिके कुमारिलभट्टेन न्यगादि –

**"पाणिनीयाष्टाध्यायाः न्यूनतापरिहाराय कात्यायनपतञ्जलिभ्यां यानि प्रयोजनानि सूचितानि न तानि पर्याप्तानि।"**[७] इति।

तत्र वैयाकरणानां विपक्षे यानि विपक्षमतानि खण्डनमतानि वा मीमांसकैः व्याहृतानि तेषां मतानां खण्डनमतमपि निरूपितं वैयाकरणैः। अधस्तावदालोच्यते व्याकरणमुख्यप्रयोजनखण्डनखण्डनम्।

१. <u>रक्षा</u>

व्याकरणस्य मुख्यप्रयोजनेषु प्रथमा हि रक्षा अन्यतमा। पतञ्जलिर्महाभाष्ये आह – **"रक्षार्थं वेदानामध्येयं व्याकरणम्। लोपागमवर्णविकारज्ञो हि सम्यग् वेदान् परिपालयिष्यती"**[८]ति। अर्थात् वेदरक्षार्थमवश्यमेव व्याकरणमध्येयम्। व्याकरणं विना वर्णानां लोपागमवर्णविकारविषयेऽनभिज्ञो जनो न सक्षमो भवेत् सर्वशास्त्राकरवेदरक्षायाम्। मतमिदं मीमांसकैर्निराकृतम्। कुमारिलभट्टेनोच्यते –

**"वेदरक्षापि नैतस्मादृतेऽध्येतृपरम्पराम्।**
**सम्प्रदायोऽनुवृत्तश्चेद् वेदस्तेनैव रक्ष्यते॥"**[९] इति।

किञ्चोक्तं तेनैव –

**"शिष्याचार्यसम्बन्धो हि महान् वेदरक्षाहेतुः व्याकरणानधीनस्यापि वेदक्रमस्याध्ययेनैव रक्ष्यमाणत्वात्।"**[१०] इति।

अपि च –

**"सहाध्यायिभिरेवातो वेदः कार्त्स्न्येन रक्ष्यते।**

**स्वराक्षरविनष्टोऽपि द्वेषादन्यैर्न मृष्यते॥**

**तस्मात्प्रीतैरुपाध्यायैः द्विष्टैः कारुणिकादिभिः।**

**न विनाशयितुं वेदो लभ्यते तेन रक्ष्यते ।**

**तस्माद् वेदरक्षार्थं तावन्नाध्येयं व्याकरणम्॥"**[११] इति॥

तात्पर्यं तावत् शिष्याचार्यसम्बन्धेन तथा सहाध्यायिवर्गस्य संश्लेषेण वेदरक्षा भवति, न हि व्याकरणेन। अतो वेदरक्षार्थं नास्ति प्रयोजनं व्याकरणाध्ययनस्य।

मतमिदं वैयाकरणाः निराकृत्य कथयन्ति यत् – 'ईश्वरो विरचित' इत्यादिषु प्रयोगेषु विचरितः उतो वा विचरितोः इति शङ्कायां तु 'ईश्वरे तोसुन्-कसुनौ' इति पाणिनीयसूत्रमेवाश्रयणीयम्। इति मतमाश्रित्य भट्टचिन्तामणेः वाञ्छेश्वरयज्वाचार्यैः कथितं –

**"न चाध्येतृपरम्परया रक्षादिसिद्धिः"** इति।

अतः वेदरक्षार्थमवश्यमेव व्याकरणमध्येयम्। व्याकरणेन वेदार्थज्ञानं, तज्ज्ञानेन च मोक्षलाभो वस्तुतो व्याकरणपाठस्यैव फलम्। उक्तञ्च भर्तृहरिणा वाक्यपदीये ब्रह्मकाण्डे –

**"तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**

**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥"**[१२] इति॥

२. <u>ऊहः</u>

अपरप्रयोजनमूहः। पतञ्जलिराह –

**"ऊहः खल्वपि। न सर्वैर्लिङ्गैः न च सर्वाभिर्विभक्तिभिः वेदे मन्त्रा निगदिताः। ते चावश्यं यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्याः। तान्नावैयाकरणाः शक्नोति यथायथं विपरिणमयितुम्। तस्मादध्येयं व्याकरणम्।"**[१३] इति । अर्थात् वेदे न हि सर्वत्र सर्वैः लिङ्गैः न वा सर्वाभिः विभक्तिभिः मन्त्रा आम्नाताः। अतः याज्ञिकैरवश्यमेव मन्त्रानां यथायथपरिवर्तनं विधेयम्। व्याकरणज्ञानं विना तदसम्भवमेव। मीमांसकाः मतमिदं न स्वीकुर्वन्ति। तैरुच्यते यत् ऊहकार्यं मीमांसकशास्त्रस्य विषयः न तु व्याकरणस्य। अतः कुमारिलभट्टेन लिखितं –

**"ऊहार्थमपि शब्दानां न व्याकरणमर्थवत्।**

**ऊहस्याप्यन्यतः सिद्धेरूह्यानुह्यविभागवत्॥"**[१४] इति॥

अत्रापि मीमांसकमतस्य खण्डनमतं प्रतिपादितं वैयाकरणैः। आचर्यसायणस्य मतमत्र प्रणिधानयोग्यं –

> **"प्रकृतौ आम्नातस्य मन्त्रस्य विकृतौ समवेतार्थत्वाय तदुचितपदान्तरस्य प्रक्षेपेण पाठ ऊहः। तद्यथा अन्वेनं माता मन्यतामनु पिता अनु भ्राता इति प्राकृतपशुविषयो मन्त्रपाठस्तस्य च मन्त्रस्य विकृतौ पशुद्वये सति अन्वेनौ माता मन्यतामित्यूहः। पशुबहुत्वे सति अन्वेनान् माता मन्यतामित्यूहः कर्तव्यः"**[१५] इति।

इत्येवं व्याकरणस्य प्रयोजनानुसारं व्याकरणगतपरिवर्तनं साधनीयम्; तत्तु व्याकरणज्ञानमन्तरेण न कदापि सम्भवति। अत ऊहार्थमवश्यमेवाध्येयं व्याकरणम्।

### ३. आगमः

व्याकरणाध्ययनस्यापरप्रयोजनं खलु आगमः। पतञ्जलिः महाभाष्ये आह –

> **"आगमः खल्वपि। 'ब्राह्मणेन निष्कारणो धर्मो षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति'। प्रधानं च षट्स्वेङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति"**[१६] इति।

अर्थात् ब्राह्मणाः कारणानुसन्धानं विनैव षडङ्गवेदस्याध्ययनं कुर्वन्ति। तत्र षड्वेदाङ्गेषु व्याकरणं तावत् प्रधानम्। अतोऽध्येयं व्याकरणम्। आगमविषये कैयटेन प्रतिपादितम् –

> **"आगमः प्रयोजनः प्रवर्तकः नित्यकर्मतां व्याकरणाध्ययनस्य दर्शयति। प्रयोजनशब्देन च फलं प्रयोजकश्चोच्यते"**[१७] इति।

मीमांसकाः स्वकीयमतं प्रतिपादयन्ति यत् –

> **"आगमः यस्तु निर्दिष्टः प्रयोजनविवक्षया।**
> **कर्मणां नोच्यते तत्र किं वेदाध्ययनं फलम्॥"**[१८] इति॥

किं बहुना, श्लोकमिममाश्रित्यैव न्यायसुधायां सोमेश्वरभट्टेनोच्यते यत् –

> **"यथा वेदाध्ययनं प्रति प्रोयोजनभूतानां कर्मणां नाध्ययनं प्रयोजनं तथा षडङ्गवेदाध्ययनविधायकमागमं प्रति**

**प्रयोजनभूतस्य व्याकरणाध्ययनस्य नागमप्रयोजनमित्यु - पालम्भार्थः।"**[१९] **इति।**

निष्कर्षो हि यथा प्रयोजनभूतकर्मणः अध्ययने आवश्यकता नास्ति तथैव प्रयोजनभूतव्याकरणपाठस्यापि आगमो न प्रयोजनभूतः।

अत्र मीमांसकमतस्य विरुद्धमतत्वेन वैयाकरणाचार्यकैयटस्य मतं प्रणिधानयोग्यम्। व्याकरणमुख्यप्रयोजनत्वेन स्वीकृत आगमस्तु कैयटाचार्येण प्रवर्तकत्वेन स्वीकृतः। भट्टोजिदीक्षितेनापि शब्दकौस्तुभे प्रोक्तं –

**"रक्षोहलाघवसन्देहाख्यानि चत्वारि फलानि, आगमस्तु प्रवर्तकः।"**

यथा प्रत्यवायपरिहाराय 'अहरहः सन्ध्यामुपासित' इति श्रुतिवाक्यानुसारेण प्रत्यहं सन्ध्यावन्दना करणीया तथैव वेदाङ्गत्वात् व्याकरणस्य पाठः करणीयः इत्येव प्रवर्तकत्वेन आगमस्य प्रयोजनम्।

### ४.लघुः

व्याकरणाध्ययनस्य तुरीयं प्रयोजनं खलु लघुः। पतञ्जलिराह –

**"लघ्वर्थं चाध्येयं व्याकरणम्। ब्रह्मणेनावश्यं शब्दाः ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्।"**[२०] इति।

अयमेव ऋषेरभिप्रायो यत् पुराकल्पस्य नियमानुसारं प्रतिपदपाठद्वारा शब्दज्ञानलाभापेक्षया सामान्यविशेषात्मकनियमेन ज्ञानलाभः सुलभः तत्तु व्याकरणज्ञानेनैव शक्यमतो व्याकरणमध्येयम्। एवं हि श्रूयते –

**"वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम"**[२१] इति।

मीमांसकमते पाणिनीयव्याकरणपाठेनापि शब्दज्ञानं भवति दुरूहम्। लोकव्यवहारे अज्ञातत्वात् तथा स्वकीयसंज्ञापरिभाषावलम्बनेन रचितत्वाच्च शब्दज्ञाने वाधा स्यात्। अतो शब्दज्ञानार्थं यत् लाघवप्रदर्शनं तत्तु गौरवाय एव।

मीमांसकमतस्य विपक्षे युक्तिं प्रदर्शयन्ति वैयाकरणाः – अनन्ता हि शब्दराशिः। न हि सम्भवः पृथक्तया समेषां शब्दानां पाठः। व्याकरणेन तु प्रकृतिप्रत्ययद्वारा शब्दज्ञाने तु लाघवः परिदृश्यते। भगवता पतञ्जलिना सुष्ठूक्तं –

**"कथं तर्हि इमे शब्दाः प्रतिपत्तव्याः? किञ्चित् सामान्यविशेषवल्लक्षणं प्रवर्त्यम्। येनाल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः कश्चिदपवादः। कथं जातीयकः पुनरुत्सर्गः कर्तव्यः कथं जातीयकोऽपवादः? सामान्येनोत्सर्गः कर्तव्यः। तद्यथा 'कर्मण्यण्' (३/२/३)| तस्य विशेषेणापवादः। तद्यथा – 'आतोऽनुपसर्गे कः' (३/२/३)"**[२२] इति।

अतो शब्दज्ञानाय व्याकरणपाठस्यावश्यकतानस्वीकार्या।

**५. असन्देहः**

व्याकरणाध्ययनस्यान्तिमं प्रयोजनं खलु असन्देहः। पतञ्जलिराह –

**"असन्देहार्थं चाध्येयं व्याकरणम्। याज्ञिकाः पठन्ति 'स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत' इति। तस्यां सन्देहः स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि वा पृषन्ती यस्याः सेयं स्थूलपृषती। तां नावैयाकरणः स्वरतोऽध्यवस्यति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः। अथान्तोदात्तत्वं ततस्तत्पुरुषः।"**[२३] इति।

वस्तुतः –

**"स वाग्वज्रो यजमानं हिनस्ति**
**यथेन्द्रशत्रुः स्वरतोऽपराधात्॥"**[२४] इति।

सस्वरमेव वेदं पठेत्। अन्यथा पाठकर्तुः एव हानिः। एवं यज्ञसमये 'स्थूला चासौ पृषती च स्थूलपृषती वा स्थूलानि पृषन्ती यस्याः सेयं स्थूलपृषती इति सन्देहनिरसनाय व्याकरणज्ञानमावश्यकमेव।

अत्र मीमांसकाः विपक्षे स्वमतं प्रतिपादयन्ति – पदवाक्यादीनाम् अर्थनिर्णये न हि पर्याप्तं व्याकरणं, का कथा सन्देहनिरसनस्य ? वृद्धव्यवहारेणैव पदार्थविषयकसन्देहस्य तिरोधानो जायते न तु व्याकरणेन। उक्तं च –

**"असन्देहश्च वेदार्थे यदप्युक्तं प्रयोजनम्।**
**तदप्यसद् यतो नास्मात् पदवाक्यार्थनिर्णयौ॥"** इति।

वैयाकरणाः खण्डनमतं प्रतिपादयन्ति – यद्यपि वृद्धव्यवहारेण पदार्थविषयकसन्देहस्य विनाशो जायते तथापि तत्र व्याकरणज्ञानमावश्यकम्। व्याकरणपाठस्य प्रयोजनं भट्टपादस्य भाषायां –

**"तत्प्रसिद्धविरुद्धं स्यादचन्द्रशशिवाक्यवत्"** इति।

अतो ह्युच्यते –

**"यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत्छकृत्॥"** इति॥

अन्तिमे एतदेव प्रतिपादयितुं शक्यते यत् – मुनिद्वयोक्तेषु बहुप्रयोजनेषु केवलं वेदरक्षायामेव व्याकरणाध्ययनप्रयोजनं भवति पर्याप्तम्। वस्तुतः विना वेदरक्षां विलुप्तं भवति धर्मादिकर्म। वेदरक्षा तु व्याकरणज्ञानातिरिक्तं न जायते कदाचित् – इति मन्यमानेनैव पाणिनिना न सूचितं व्याकरणप्रयोजनम्। यथा क्षुधासमये भोजनम्; निद्रासमये च शयनं न हि उपदेशसापेक्षम्। तथैव धर्मरक्षार्थं व्याकरणस्य प्रयोजनं स्वतःसिद्धत्वात् नोल्लेखार्हम्। उक्तं च केनचित् कविना –

**"वरं हि जातास्तिमयो गभीरे**
**जलाशये पङ्किनि नित्यमूकाः।**
**न मानवा व्याकरणप्रयोग-**
**प्रबुद्धसंस्कारविहिनवाचः॥"** इति शिवम्॥

**तथ्यसूत्राणि—**

१. प्रतिज्ञासूत्रीय, १२ श्लोकः।

२. प्रतिज्ञासूत्रीय, १७ श्लोक।

३. तन्त्रवर्तिक, काशीसंस्करणम।

४. न्यायमञ्जरी, काशीसंस्करणम्, ३९१ पृष्ठायाम्।

५. न्यायमञ्जरी, प्रमाणप्रकरणम्, काशीसंस्करणम्।

६. महाभाष्ये पस्पशाह्निक।

७. कुमारिलभट्टस्य वार्तिकतन्त्रम्।

८. महाभाष्ये पस्पशाह्निके।

९. महाभाष्ये निर्णयसागरसंस्करणे १९ पृष्ठायाम्।

१०. काशीसंस्करणे तन्त्रवार्तिके २०४ पृष्ठायाम्।

११. काशीसंस्करणे तन्त्रवार्तिके २०५ पृष्ठायाम्।

१२. वाक्यपदीये ब्रह्मकाण्डे १/१४

१३. महाभाष्ये पस्पशाह्निक।

१४. काशीसंस्करणे तन्त्रवार्तिके २०५ पृष्ठायाम्।

१५. ऋग्वेदभाष्यभूमिकायाः उपोद्घातप्रकरणे।

१६. महाभाष्ये पस्पशाह्निके।

१७. कैयटीयमहाभाष्यप्रदिपटीकायाम्।

१८. काशीसंस्करणे तन्त्रवार्तिके २०७ पृष्ठायाम्।

१९. सोमेश्वरभट्टस्य न्यायसुधा।

२०. महाभाष्ये पस्पशाह्निके।

२१. ब्रः मेधाचैतन्यसम्पादिते महाभाष्ये पस्पशाह्निके १२४ पृष्ठायाम्।

२२. महाभाष्ये पस्पशाह्निके।

२३. महाभाष्ये पस्पशाह्निके।

२४. महाभाष्ये पस्पशाह्निके

**सन्दर्भग्रन्थसूचिः—**

१. हालदारः, गुरुपदः। *व्याकरणदर्शनेर इतिहास (वङ्गभाषायाम्),* कोलकाता : संस्कृतवुक्-डिपो, २००६, जानुयारी।

२. पतञ्जलिः। *महाभाष्य-पस्पशाह्निकः,* सम्पा. ब्रह्मचारी मेधाचैतन्यः, कोलकाता : दण्डिस्वामी दामोदर आश्रमः, १४१७ वङ्गाब्दे।

३. विष्णुपदः, भट्टाचर्यः। *वाक्यपदीयः ब्रह्मकाण्डः,* कोलकाता, पश्चिमबङ्ग-राज्य-पुस्तकपरिषद्, १८८५।

# शाब्दिकनिकाये जातिस्वरूपम्

श्रीमन्तभद्रः

## १. उपोद्धातः

विश्वस्य विश्वभाषासु संस्कृतं सर्वा अपि भाषा अतिशय्य मुकुटायते इति नाविदितचरं विदुषाम्। अस्य वैशिष्ट्यस्य हेतुषु व्याकरणमेव प्रमुखत्वं भजते। येनाद्यापीयं भाषा अपभ्रंशतामप्राप्य विराजमाना सती सर्वान् सम्मोहयति। तत्र बहुभिर्महर्षिभिर्व्याकरणतन्त्रं प्रावाचि, परन्तु लौकिकवैदिकोभयनियामकं शिवप्रसादाधिगतवैशिष्ट्यं पाणिनीयं व्याकरणं सर्वाण्यपि व्याकरणान्यधिशेते इति निर्विवादसिद्धम्। भगवान् पाणिनिः क्षीरोदधिमिव निखिलशब्दशास्त्रं समुन्मथ्य नवनीतमिव सूत्रं विरच्य अष्टाध्यायात्मिकामष्टाध्यायीं विरचयामास। ततः उक्तानुक्तदुरुक्तार्थान् विवेचयता महर्षिणा कात्यायनेन वार्तिकानि प्रणीतानि। ततः सूत्राणि वार्तिकानि च पर्यालोचयता फणिमणिना पतञ्जलिना सरलया गिरा प्रसन्नगम्भीरया शैल्या महाभाष्यं व्यरचि। पाणिनिनोप्तस्य व्याकरणबीजस्य कात्यायनेन च महीरुहतां प्रापितस्य पुष्पसम्भृतत्वं फलवत्त्वं च भाष्यकृता समपादि इति वक्तुं शक्यते। अनन्तनागावतारेण पतञ्जलिना महाभाष्ये सूत्राणां व्याख्यानं विस्तरेणाकारि। तादृशे महाभाष्ये 'जातेरस्त्रीविषयादयोपधात्' (अष्टा.- ४.१.६३) इति ङीष्विधायकसूत्रव्याख्यानावसरे 'जातेरित्युच्यते, का जातिर्नाम'[१] इत्याशङ्क्य जातिलक्षणप्रतिपादककारिकाद्वयमुदलेखि। तयोः कारिकयोर्व्याख्यानद्वारा शाब्दिकनये जातिस्वरूपमस्मिन् निबन्धे प्रतिपादयिष्यते। तत्रादौ व्याकरणेतरशास्त्रेषु जातिस्वरूपं विविच्य दोषान् प्रदर्श्य शाब्दिकानुसारं जातिलक्षणप्रतिपादनकाले समुपस्थितं विदुषां वैमत्यं परिहृत्य शाब्दिकसम्मतजातिस्वरूपं निरूपयिष्यते इति प्रतिपादनक्रमः।

## २. व्याकरणेतरशास्त्रेषु जातिः

जातिवाचको नियतस्त्रीलिङ्गभिन्नो यकारोपधभिन्नः स्त्रियां ङीषं लभते इति 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रस्यास्य सामान्यार्थः। स्त्री विषयो नियमेनार्थो यस्य स इति विग्रहे बहुब्रीहिणा स्त्रीविषयो नित्यस्त्रीलिङ्गः, तद्भिन्नः अस्त्रीविषयः इति प्रकृतसूत्रे 'अस्त्रीविषयात्' इति पदस्य नित्यस्त्रीलिङ्गभिन्नत्वरूपार्थो विज्ञायते। प्रस्तुतसूत्रस्थजातिपदेन च जातिवाचकशब्दो गृह्यते, जात्यर्थे ङीष्विधानरूपकार्यासम्भवात्। न च जातिपदेन जातिशब्दस्वरूपं गृह्यत इति वाच्यं, तथा सति जातिशब्दस्य नियतस्त्रीलिङ्गत्वेन 'अस्त्रीविषयात्' इति सूत्रस्थविशेषणवैयर्थ्यापत्तिः स्यात्। एतत्सर्वं सङ्गृह्याह दीक्षितपादः— 'जातिवाचि यन्न च स्त्रियां नियतमयोपधं ततः स्त्रियां ङीष्स्यात्'[२] इति। वाक्यार्थज्ञानं प्रति पदार्थज्ञानं कारणमिति न्यायाद् वाक्यस्यार्थबोधार्थं वाक्यघटकप्रत्येकपदार्थावबोध आवश्यकः इत्यतः का नाम जातिरिति पृच्छा जायते। न च लोके तन्त्रे च प्रसिद्धत्वात् पृच्छानुपपत्तिरिति वाच्यम्, लक्षणविप्रतिपत्तित्वाद्युज्यते प्रश्नः। तथाहि कैयटः प्राह— 'लक्षणविप्रतिपत्त्या प्रश्नः'[३] इति। यतोहि शास्त्रान्तरेषु जातेः स्वरूपबोधकानि लक्षणानि भिन्नानि दरीदृश्यन्ते, तेषु किमपि लक्षणं ग्राह्यमथवा भिन्नमेवेत्यतो जायते लक्षणविप्रतिपत्तिः। तत्रादौ व्याकरणेतरशास्त्रेषु जातिस्वरूपं तावत्पर्यालोचयामः।

**२.१. वेदान्तनये जातिः—** 'भिन्नेष्वभिन्नाभिधानप्रत्ययनिमित्तं जातिः' इति वेदान्तिमतसिद्धं जातिलक्षणम्। लक्षणमिदं साक्षात्क्वचिन्नोपलभ्यते चेदपि वेदान्तमतसंग्रहात्मकंमिदं लक्षणमिति बोद्ध्यम्। भिन्नेषु स्वाश्रयेषु अभिन्नयोः समानाकारयोरभिधानप्रत्यययोः अभिधीयतेऽनेनेत्यभिधानं शब्दः, प्रत्ययः प्रतीतिर्ज्ञानम्, अभिधानञ्च प्रत्ययश्चेति अभिधानप्रत्ययौ तयोर्निमित्तं हेतुः जातिरिति तदर्थः। ततश्च भिन्नेष्वभिन्नाभिधाननिमित्तं, भिन्नेष्वभिन्नप्रत्ययनिमित्तञ्च जातिरिति फलितम्। यथा भिन्नेषु घटेषु 'अयं घटः', 'अयं घटः' इति अभिन्नाभिधानस्य अभिन्नप्रत्ययस्य च यन्निमित्तं भवति तदेव जातिः तच्च प्रकृते घटत्वम्, एवमेव पटादिषु पटत्वादिकम्।

**२.२. न्यायनये जातिः—** 'नित्यमेकमनेकानुगतं सामान्यम्'[४] इति



वाक्यपदीये ब्रह्मकाण्डे १/१४

नैयायिकमतम्। अर्थात् नित्यत्वे सति एकत्वे सति अनेकसमवेतत्वमित्यर्थः। नित्यत्वोक्त्या च अनेककपालवृत्तित्वेऽपि घटस्य जातित्वापत्तिर्वारिता, घटस्यानित्यत्वात्। अनेकेति पदोपादानाभावे आकाशत्वस्यापि जातित्वापत्तिः, तदुपादाने तु अनेकसमवेतत्वाभावान्न दोषः। अनेकवृत्तित्वमित्युच्यमाने तु नित्यत्वेन एकत्वेन अनेकवृत्तित्वेन चात्यन्ताभावेऽतिव्याप्तिः स्यात्, तद्वारणाय अनेकसमवेतत्वमित्युपात्तम्। यथा— घटत्वमिति। तच्च नित्यमेकं नानाघटे समवायसम्बन्धेन विद्यमानमिति कृत्वा घटत्वं जातिरिति सिद्धम्।**२.३. धर्मशास्त्रे जातिः—** 'सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः'[५] (१.९०) इति धर्मशास्त्रकृतां मतम्। अर्थात् जननेन प्राप्यते या सा जातिरिति समायाति। ब्राह्मणत्वादि तदुदाहरणं, जननेन लभ्यत्वात्।

**३. शब्दशास्त्रे जातिः**

पूर्वोक्तलक्षणानां ग्रहणं शब्दशास्त्रे न सम्भवति। अव्याप्त्यादिदोषत्रयशून्यत्वे सति असाधारणधर्मवत्त्वस्यैव लक्षणत्वात्। वेदान्तिमतसिद्धलक्षणग्रहणे तु शुक्लघटे 'अयं शुक्लः', 'अयं शुक्लः' इति समानाकाराभिधानस्य निमित्तं यच्छुक्लत्वं तस्यापि जातित्वात्तद्वाचिशुक्लशब्दादपि 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रेण ङीषापत्तिरिति कृत्वा 'शुक्ला शाटी' इति प्रयोगो नोपपद्येत इत्यतिव्याप्तिः। किञ्च कलापी इत्यादीनां च जातित्वानापत्तिरित्यव्याप्तिः। तथैव नैयायिकोक्तजातिलक्षणस्वीकारेऽपि शुक्लादिगुणस्य नित्यत्वैकत्वपक्षे शुक्लादीनामपि जातित्वापत्तिः, ततश्च 'शुक्ला शाटी' इत्यादौ शुक्लपदात् ङीषापत्तिः। किञ्च कठी, औपगवी इत्यादीनां जातित्वासिद्धिरिति कृत्वाव्याप्तिः। धर्मशास्त्रकृत्प्रतिपादितलक्षणस्वीकारे ब्राह्मणत्वादीनां जातित्वसिद्धेऽपि युवत्वादीनां जन्मत एवालाभाद् युवत्वादीनां जातित्वसिद्धिर्न स्यादित्यव्याप्तिः। ततश्च 'युवतितरा' इत्यादौ 'जातेश्च' (अष्टा.- ६.३.४१) इत्यनेन पुंवत्त्वप्रतिषेधो न स्यात्। अतोऽस्मिन् शब्दशास्त्रे विलक्षणमेव जातिलक्षणं परिभाषितमस्ति। फणिमणिना पतञ्जलिना स्वविरचितमहाभाष्ये शाब्दिकसम्मतं जातिस्वरूपबोधककारिकाद्वयमुल्लिखितम्।

**३.१.प्रथमकारिका—** तयोः प्रथमा कारिका तावत्—

'आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक्।

सकृदाख्यातनिर्ग्राह्या गोत्रञ्च चरणैः सह॥'[६] इति।

कारिकायामस्यां लक्षणत्रयं विद्यते 'आकृतिग्रहणा जातिः' इति प्रथमम्। 'लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति द्वितीयम्। 'गोत्रञ्च चरणैः सह' इति तृतीयम्। एतच्च **दीक्षितमतानुसार**मित्यवधेयम्। एतेषां विस्तरेण वर्णनमधः क्रियते -

**३.१.१. आकृतिग्रहणा जातिः -** आक्रियते व्यज्यतेऽनयेत्याकृतिः संस्थानमवयवसन्निवेशः इति यावत्। गृह्यते ज्ञायतेऽनेनेति करणे ल्युटा ग्रहणमिति व्युत्पद्यते, ततश्च तस्य ज्ञानसाधनमित्यर्थः। आकृतिर्ग्रहणं ज्ञानसाधनं यस्याः साकृतिग्रहणा अवयवसन्निवेशव्यङ्ग्या इत्यर्थः। तदवादि दीक्षितेन - 'अनुगतसंस्थानव्यङ्ग्येत्यर्थः'[७] इति। इदानीं शङ्का जायते यद् आकृतिशब्देन सामानाधिकरण्याद् ग्रहणशब्दे स्त्रीलिङ्गता युक्ता, ततश्च 'टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः' (अष्टा.- ४.१.१५) इति सूत्रेण ङीपि कृते, तदन्तेन समासे विहिते 'नद्यृतश्च' (अष्टा.- ५.४.१५३) इति सूत्रेण कपा आकृतिग्रहणीकेति भवितव्यमिति चेन्न, पूर्वं हि करणसामान्ये ल्युटा 'सामान्ये नपुंसकम्' इति नपुंसकत्वे ग्रहणशब्दो निष्पादितः, पश्चाच्च आकृतिरूपपदान्तरसम्बन्धेन ग्रहणशब्दस्य स्त्रीत्वप्रतिपत्तिः, स च बहिरङ्ग इत्यतः सामान्यलिङ्गेनैव अन्तरङ्गेण विग्रहं प्रदर्श्य समासो विधीयते। ईदृशाकारो गौरित्याकृत्युपदेशेन व्यङ्ग्या जातिर्भवतीति फलितम्। 'तटी' इति प्रस्तुतलक्षणस्योदाहरणम्। जलसमीपप्रदेश आकृतिविशेषविशिष्टस्तटः, अतस्तटत्वमाकृत्युपदेशव्यङ्ग्यत्वाज्जातिः, ततश्च तद्वाचकात् अनियतस्त्रीलिङ्गात् अयोपधात् तटशब्दात् 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रेण ङीषि 'तटी' इति सिद्ध्यति। ननु 'आकृतिग्रहणा जातिः' इति लक्षणस्वीकारे तार्किकसम्मतस्य शाब्दिकासम्मतस्य देवदत्तत्वादिकस्यापि जातित्वापत्तिः, देवदत्तत्वस्य बाल्ययौवनवार्धक्यभेदेन भिन्नानेकशरीरेषु विद्यमानत्वाद् अनुगतसंस्थान - व्यङ्ग्यत्वादिति चेन्मैवम्, समानकालिकानेकव्यक्तिवृत्त्यनुगतसंस्थानव्यङ्ग्येत्यस्यैव लक्षणार्थात्। समानकालिका या अनेकव्यक्तयस्तद्वृत्ति यदनुगतं संस्थानं

तज्जन्यज्ञानविषयीभूता जातिरित्यर्थः। देवदत्तत्वादेश्च समानकालिकानेकव्यक्तिवृत्तित्वाभावान्न जातित्वमित्यदोषः। घटादयश्च एककालावच्छेदेनानेके सन्तीति सिद्धं घटत्वादेर्जातित्वम्। अत एव कल्पभेदेनेन्द्रादेर्भेदेऽप्येककालावच्छेदेना -नेकेन्द्रादेरभावादिन्द्रत्वादिकं न जातिः। ननु दमयन्त्याः स्वयम्वरे पञ्चेन्द्रोपाख्यानादिन्द्रत्वस्य समानकालिकानेकव्यक्तिवृत्तित्वेन जातित्वं दुर्वारमिति चेन्न, समेषामिन्द्राणां संस्थानस्यैकत्वे प्रमाणाभावात्। मृदुसंस्थानव्यङ्ग्यत्वात्कुमारत्वादीनामपि अनेन लक्षणेन सिद्धं जातित्वमित्यवधेयम्।

**३.१.२. लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या** - पूर्वोक्तप्रथमलक्षणेन ब्राह्मणत्वादयो जातिविशेषा न सङ्गृहीताः, तेषां संस्थानव्यङ्ग्यत्वाभावात् तदाश्रयस्य ब्राह्मणक्षत्रियादेः संस्थानस्याभिन्नत्वात्। ब्राह्मणस्य हि यादृशोऽवयवसन्निवेशः, क्षत्रियादेरपि तादृशत्वात्। अतो ब्राह्मणत्वादयो नाकृतिग्राह्या, अपि तु साक्षात्कथनेन ज्ञेया इत्यतो 'लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति द्वितीयजातिलक्षणं शेषावतारेण भाष्यकृता पतञ्जलिनावतारितम्। इह 'लिङ्गानाम्' इति कर्मणि षष्ठी। ननु सर्वाणि लिङ्गानि न भजतीति 'न सर्वलिङ्गभाग्' इति भवितव्यं, 'सर्वभाक्' इति च न युज्यते, सर्वशब्दस्य लिङ्गापेक्षत्वेन 'सापेक्षमसमर्थवत्' इति न्यायेन असामर्थ्यात् 'भजो ण्विः' (अष्टा.- ३.२.६२) इति सूत्रेण सुप्युपपदे एव ण्विप्रत्ययस्य विधानात्पदविधित्वेनासामर्थ्ये कथं ण्विप्रत्ययः, कथम्वा उपपदसमासः, असमर्थत्वात् इति चेन्न, तादृशभाष्यप्रयोगरूपगमकत्वस्य सत्त्वात् उभयमपि सिद्धम्। सकृदेकवारम् एकस्यां व्यक्ताविति शेषो द्रष्टव्यः, आख्याता उपदिष्टा, निर्ग्राह्या निश्चयेन ग्राह्या व्यक्त्यन्तरे उपदेशं विनापि सुगमेति यावत्। एतत्सर्वं सङ्गृह्य फलितार्थमवोचद्दीक्षितः - 'असर्वलिङ्गत्वे सत्येकस्यां व्यक्तौ कथनाद्व्यक्त्यन्तरे कथनं विनापि सुग्रहा जातिः'[८] इति। 'वृषली' इति प्रकृतलक्षणस्योदाहरणम्। वृषलत्वं हि एकस्यां व्यक्तौ 'अयं वृषलः' इत्युपदेशाद् व्यक्त्यन्तरे तदपत्यसहोदरादौ तदुपदेशं विनापि सुगमम्। अतस्तद्वाचिनोऽसर्वलिङ्गाद्वृषलशब्दात् 'जातेरस्त्री' इत्यादिसूत्रेण ङीषि 'वृषली' इत्युदाहरणसिद्धिः। ननु 'सकृदाख्यातनिर्ग्राह्या' इत्येव लक्षणमस्तु, किं 'लिङ्गानाञ्च

न सर्वभाक्' इत्युपादानेनेति चेदाह - 'शुक्ला'[९] इति। एकस्मिन् शुक्लघटे 'अयं शुक्लः' इत्युपदेशाच्छुक्लघटान्तरे तदुपदेशं विनापि सुग्रहात् तस्यापि जातित्वापत्तिः स्यात्, तदुपादाने तु न दोषः, 'गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वति' इत्यमरकोशवचनाद्विशेष्यनिघ्नतया त्रिलिङ्गत्वेनासर्वलिङ्गत्वाभावात् नातिव्याप्तिः। अवयवसंस्थानव्यङ्ग्यत्वाभावान्न पूर्वेणापि जातित्वम्। लक्षणे 'सकृदाख्यातनिर्ग्राह्या' इति किमर्थमुपात्तमिति चेदुच्यते - 'देवदत्ता'[१०] इति। देवदत्तशब्दस्य संज्ञावाचकत्वेन क्लीबत्वाभावादसर्वलिङ्गत्वेऽपि न देवदत्तत्वस्य सकृदाख्यातनिर्ग्राह्यत्वमस्तीति कृत्वा जातित्वाभावान्न तद्वाचकात् ङीष्। आकृतिग्रहणेत्यस्य सङ्कोचकमिदमिति तु न मन्तव्यमपि तु अप्राप्तप्रापणार्थमिदं वचनं, तेन तटादेः सर्वलिङ्गत्वेऽपि संस्थानव्यङ्ग्यत्वाद्भवत्येव जातित्वम्। स्पष्टञ्चेदं कैयटे - 'अप्राप्तप्रापणार्थं चेदं वचनमिति तटादेः सर्वलिङ्गत्वेऽप्याकृतिग्रहणत्वाज्जातिरूपोपपत्तिः'[११] इति।

**३.१.३. गोत्रञ्च चरणैः सह -** पूर्वोक्तलक्षणाभ्यामौपगवी कठी इत्यादीनामसङ्ग्रहो जातित्वासिद्धिरिति यावत्। अनुगतसंस्थानव्यङ्ग्यत्वाभावान्न प्रथमलक्षणेन सिद्धिः, सर्वलिङ्गत्वाच्च द्वितीयलक्षणेनाप्यसिद्धिरित्यतस्तृतीयलक्षण -मुपादत्तानन्त-नागावतारः पतञ्जलिः - 'गोत्रञ्च चरणैः सह' इति। गोत्रपदेन 'अपत्यं पौत्रप्रभृति गोत्रम्' (अष्टा.- ४.१.१६२) इति सूत्रपरिभाषितं गोत्रं गृह्यत आहोस्वित् लौकिकगोत्रमपत्यमात्रमित्यत्र विवदन्ते विद्वांसः।

**३.१.३.१. दीक्षितमतम् -** 'अपत्यप्रत्ययान्तः शाखाध्येतृवाची च शब्दो जातिकार्यं लभत'[१२] इति 'गोत्रञ्च चरणैः सह' इति तृतीयलक्षणस्यार्थः प्रोक्तो दीक्षितपादेन वैयाकरणसिद्धान्तकौमुद्याम्। एतेन इदमायाति यत् गोत्रपदेन अपत्याधिकारादन्यत्र लौकिकमपत्यमात्रं गृह्यते न तु पारिभाषिकमिति दीक्षितहृदयम्। अत्र च मानं भवति 'अनुपसर्जनात्' (अष्टा.- ४.१.१४) इति सूत्रस्थं भाष्यं - 'जातिशब्देभ्यस्त्वतिप्रसङ्गो भवति। अवन्ती।'[१३] इति। अनेन भाष्यग्रन्थेनेदं ज्ञायते यद् 'अवन्ती' इत्यत्र जातिप्रयुक्तो ङीष् विद्यते इति। अवन्तेरपत्यं स्त्रीत्यर्थे 'वृद्धेत्कोसलाजादाञ्ञ्यङ्' (अष्टा.- ४.१.१७१) इति सूत्रेण ञ्यङि, तस्य 'स्त्रियामवन्तिकुन्तिकुरुभ्यश्च' (अष्टा.- ४.१.१७६) इति सूत्रेण लुकि अवन्तिशब्दात्

'जातेरस्त्री...' इति सूत्रेण ङीषि 'अवन्ती' इत्यस्य सिद्धिः। यदि च परिभाषितगोत्रस्य ग्रहणं स्यात्तर्हि अनन्तरापत्यप्रत्ययान्तस्य प्रस्तुतसूत्रेण ङीषभावात् भाष्यासङ्गतिः स्पष्टैव। अतः अपत्यमात्रस्यैव ग्रहणमिति स्थितम्।

**३.१.३.२. नागेशमतम् -** विद्वन्मूर्धन्या नागेशास्तु गोत्रपदेन 'अपत्यं पौत्रप्रभृति गोत्रम्' इति लक्षणलक्षितगोत्रस्यैव ग्रहणमिति मन्वते। तदुक्तं स्वविरचितलघुशब्देन्दुशेखरे - 'शास्त्रीयमत्र गोत्रम्'[१४] इति। अत्र च मानम् -

१) 'एको गोत्रे' (अष्टा.- ४.१.९३) इति सूत्रस्थं भाष्यम्। तत्रत्यभाष्यग्रन्थस्तावत् -

"एवं तर्हि एवं वक्ष्यामि - 'गोत्राद्यूनि प्रत्ययो भवति, ततः स्त्रियां लुक्'॥ एवमप्यौपगवी माणविका। अनुपसर्जनलक्षणः ईकारो न प्राप्नोति॥ मा भूदेवम् - 'अण्योऽनुपसर्जन'मिति। 'अणन्तादनुपसर्जना'दित्येवं भविष्यति॥.....इह तर्हि - औपगवी माणविका भार्यास्य औपगवीभार्यः जातिलक्षणः पुंवद्भावप्रतिषेधो न प्राप्नोति॥ माभूदेवं - 'वृद्धिनिमित्तस्ये'त्येवं भविष्यति॥ यस्तर्हि न वृद्धिनिमित्तः - ग्लुचुकायनी माणविका भार्यास्य ग्लुचुकायनीभार्यः।"[१५] इति।

'एको गोत्रे' इति सूत्रे भाष्ये 'गोत्राद्यून्यस्त्रियाम्' इति सूत्रस्य गोत्राद्यूनि प्रत्ययो भवति, ततः स्त्रियां लुक् इत्यर्थः प्राकल्पि। ततः औपगवी इत्यत्र अनुपसर्जनलक्षणो ङीन्न प्राप्नोति इति दोषः प्रादर्शि। तथाहि - उपगोरपत्यमित्यर्थे 'तस्यापत्यम्' (अष्टा.- ४.१.९२) इति सूत्रेणाणि 'औपगवः' इति जाते, औपगवस्यापत्यं स्त्री इत्यर्थे 'अत इञ्' (अष्टा.- ४.१.९५) इति सूत्रेण यूनि इञि प्रत्यये, तस्य 'गोत्राद्यून्यस्त्रियाम्' इत्यनेन लुकि कृतेऽनुपसर्जनाधिकाराद्गोत्रप्रत्ययस्य चाणोऽर्थद्वारेणोपसर्जनत्वादनुपसर्जनलक्षणो ङीन्न प्राप्नोति। तथाहि - उपगुसम्बन्ध्यपत्यसम्बन्ध्यपत्यमिति युवप्रत्ययान्तस्यार्थस्तद्धटकोपगुसम्बन्ध्यपत्यस्यैव गोत्रप्रत्ययान्तस्याण्णन्तस्या - र्थत्वेन विशेषणीभूतत्वादुपसर्जनीभूतत्वे उपपन्ने 'अनुपसर्जनात्' इत्यधिकारे पठितेन 'टिड्ढाणञ्' इत्यादिसूत्रेण ङीन्न प्राप्नोतीति दोषः। तद्दोषपरिहाराय च प्रौढपूर्वपक्षिणा 'यः शिष्यते स लुप्यमानार्थाभिधायी'ति न्यायेन प्रत्यये लुप्ते प्रकृतिरेव प्रत्ययार्थमाहेति अण्णन्तस्यानुपसर्जनत्वमिति कृत्वा सिद्धो ङीबिति समाहितम्।

ततश्च तत्समाधानमुररीकृत्यैव 'औपगवीभार्यः' इत्यत्र 'जातेश्च' इत्यनेन जातिलक्षणस्य पुंवद्भावप्रतिषेधस्याप्राप्तिरिति दोषः आशङ्कि। नैष दोषः, 'वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे' (अष्टा.- ६.३.३९) इति सूत्रेणैव पुंवद्भावप्रतिषेधः स्यादिति समाधायि। एवन्तर्हि 'ग्लुचुकायनीभार्यः' इत्यत्र ङीष्पुंवत्त्वप्रतिषेधयोरसिद्धिरूपो दोषः इति पुनः शङ्कितम्। तथाहि - ग्लुचुकस्यापत्यमित्यर्थे 'प्राचामवृद्धात्फिन् बहुलम्' (अष्टा.- ४.१.१६०) इति सूत्रेण फिनि आयन्नादेशे ग्लुचुकायनिरिति जाते 'तस्यापत्यम्' इत्यनेन तदन्तादणि, अणश्च 'गोत्राद्यून्यस्त्रियाम्' इति लुकि कृते जातित्वाभावाद् 'इतो मनुष्यजातेः' (अष्टा.- ४.१.६५) इति सूत्रेण ङीष्न प्राप्नोति. जातित्वाभावाद् 'जातेश्च' इति पुंवत्त्वप्रतिषेधोऽपि न प्राप्नोति। यदि चोच्यते यत् ग्लुचुकायनीत्यत्र 'सर्वतोऽक्तिन्नर्थादित्येके' (गणसूत्रं- ५१) इति गणसूत्रेण ङीष् भविष्यति तर्हि ग्लुचुकायनीभार्यः इतीह पुंवत्त्वप्रतिषेधासिद्धिरूपो दोषो बोद्ध्यः इति पूर्वोल्लिखितभाष्यतात्पर्यम्। यदि च अपत्यमात्रस्य जातित्वं स्यात्तर्हि पूर्वोक्तो भाष्यग्रन्थो व्याकुप्येत। यतोहि लौकिकापत्यमात्रस्य जातित्वेन युवप्रत्ययान्तस्य औपगवशब्दस्यापि जातिवाचित्वात् अनुपसर्जनलक्षणङीबपेक्षया 'जातेरस्त्रीविषयादयोपधात्' इत्यनेन जातिलक्षणस्य ङीषः एव परत्वाद्वक्तु युक्तम्, किञ्च 'जातेश्च' इत्यनेन पुंवत्त्वप्रतिषेधश्च प्राप्नोतीति कृत्वा 'पुंवत्त्वप्रतिषेधो न प्राप्नोति' इति भाष्यासङ्गतिश्च स्पष्टा। तथैव पूर्वोपदर्शितरीत्या ग्लुचुकायनीभार्यः इत्यत्रापि ङीष्पुंवद्भावप्रतिषेधयोः सिद्धिरेव स्यादिति कृत्वा 'यस्तर्हि न वृद्धिनिमित्तः - ग्लुचुकायनी माणविका भार्यास्य ग्लुचुकायनीभार्यः' इति भाष्यासङ्गतिः। परिभाषितगोत्रस्वीकारे तु युवप्रत्ययान्तानां च युवसंज्ञया गोत्रसंज्ञाया बाधात् न जातिवाचित्वमित्यदोषः।

२) किञ्च शास्त्रीयगोत्रस्य ग्रहणादेव 'ब्राह्मोऽजातौ' (अष्टा.- ६.४.१७१) इति सूत्रस्य अपत्ये जातौ नेत्यर्थः सङ्गच्छते। अन्यथा अपत्यमात्रस्य जातित्वाव्यभिचारात् तत्र जातौ इति विशेषणं व्यर्थं स्यात् 'सम्भवव्यभिचाराभ्यां स्याद्विशेषणमर्थवद्' इति नियमस्य सत्वात् 'घटो घटः' इतिवत् 'अपत्ये जातौ' इति प्रयोगानुपपत्तिः स्फुटैव।

३) किञ्च 'ब्राह्मो नारदः' इत्यपि शास्त्रीयगोत्रपक्षे एव सङ्गच्छते। ब्रह्मणोऽनन्तरापत्यमित्यर्थे अणि 'ब्राह्मोऽजातौ' इत्यनेन अनन्तरापत्यप्रत्ययान्तस्य जातित्वाभावात् अजातौ इति प्रतिषेधाभावात् टिलोपे निपातिते ब्राह्मः इति रूपसिद्धिः, अपत्यमात्रस्य गोत्रत्वे तु जातित्वसद्भावात् अजातौ इति प्रतिषेधात् टिलोपो न स्यादिति दोषः।

अतः 'अपत्यं पौत्रप्रभृति गोत्रम्' इति लक्षणलक्षितस्यैव गोत्रपदेन ग्रहणम्।

**३.१.३.३. समीक्षणम् -** वस्तुतस्तु दीक्षितमतमेव समीचीनं प्रतिभाति अर्थात् गोत्रपदेन लौकिकापत्यमात्रस्यैव ग्रहणम्। तत्र हेतवस्तावत् -

१) 'गोत्रे कुञ्जादिभ्यश्च्फञ्' (अष्टा.- ४.१.९८) इति गोत्राधिकारान्ते 'अपत्यं पौत्रप्रभृति गोत्रम्' इति गोत्रसंज्ञाप्रणयनस्वारस्याद् गोत्रपदेन लौकिकापत्यमात्रस्यैव ग्रहणमिति विज्ञायते।

२) 'यूनि लुक्' इति सूत्रे भाष्ये 'लौकिकं परं गोत्रग्रहणम्'[१६] अपत्याधिकारात्परं लौकिकं गोत्रमित्यर्थकवचन-स्वारस्याद् गोत्रपदेन लौकिकापत्यमात्रस्यैव ग्रहणमिति कल्प्यते।

३) 'अनुपसर्जनात्' इति पूर्वप्रदर्शितसूत्रस्थभाष्यस्वारस्याच्च अपत्यमात्रस्यैव ग्रहणमिति वक्तुं युक्तम्।

न च 'एको गोत्रे' इति सूत्रस्थभाष्यविरोधः इति वाच्यम्, तस्यैकदेश्युक्तित्वात्। असिद्धान्तभूतन्यासोपक्रमे प्रवृत्तत्वात्सिद्धं तस्यैकदेश्युक्तित्वम्। अथवा तद्भाष्यप्रामाण्यात् युवापत्यव्यतिरिक्तस्यैव ग्रहणमिति कल्पयामः, अनन्तरापत्यस्य तु ग्रहणं भवत्येव। न च तथा सति 'ब्राह्मोऽजातौ' इत्यस्य अपत्ये जातौ नेत्यर्थासङ्गतिः स्याज्जातित्वाव्यभिचारादिति वाच्यम्, किञ्च अनन्तरापत्यस्यापि जातित्वात् अजातौ इति प्रतिषेधात् 'ब्राह्मो नारदः' इति प्रयोगासङ्गतिरिति वाच्यम्, जातावित्यस्य समुदायोपाधितयापत्यप्रत्ययान्तेन ब्राह्मणत्वरूपजातावगम्यायामित्यर्थस्य च शास्त्रीयगोत्रवादिमतेऽप्यवश्यं वक्तव्यस्य सत्त्वेनादोषात्। किञ्च शूद्ररूपे ब्रह्मणो गोत्रापत्ये जातित्वेन 'ब्राह्मणः'

इत्यापत्तेर्दुर्वारत्वात्, तत्राजातौ इति प्रतिषेधात् टिलोपाप्राप्तेः। किन्तु अपत्यमात्रवादिमते तु शूद्रे वाच्ये ब्राह्मणत्वं समुदायेन नावबुध्यते इति प्रतिषेधाभावेन तत्रापि टिलोपे 'ब्राह्मः' इतीष्टरूपसिद्धः।

एवञ्च गोत्रपदेनापत्यमात्रस्य ग्रहणमिति फलितम्। ततश्च अपत्यप्रत्ययान्तशब्दो जतिकार्यं लभते इत्यर्थः सम्पन्नः। अपत्यप्रत्ययान्तस्य गोत्रस्योदाहरणं तावत् - 'औपगवी' इति। उपगोरपत्यं स्त्रीत्यर्थे 'तस्यापत्यम्' इत्यनेन सूत्रेणाणि,आदिवृद्धौ ओर्गुणे अवादेशे औपगवेति स्थिते अण्णन्तत्वात् 'टिड्ढाणञ्' इत्यादिसूत्रेण ङीपि प्रसक्ते परत्वात् औपगवशब्दस्य जातिवाचित्वेन 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रेण ङीषि 'औपगवी' इति रूपम्। रूपतुल्यत्वेऽपि स्वरे भेदः। ङीपि कृते तु 'अनुदात्तौ सुप्पितौ' (अष्टा.- ३.१.४) इत्यनेनानुदात्तत्वं स्यात्, ङीषि तु 'आद्युदात्तश्च' (अष्टा.- ३.१.३) इति सूत्रेण प्रत्ययस्याद्युदात्तत्वं सम्पाद्यते इति विशेषः। एतेन अपत्याधिकारे 'औपगवी' इति प्रयोगमुपादाय 'टिड्ढाणञ्' इति ङीबिति वदन्तोऽपास्ताः।

चरणशब्दः शाखाध्येतृपरः। शाखायाः अध्येता इति शाखाध्येता इति षष्ठीतत्पुरुषसमासः। केचित्तु शाखा च अध्येता च इति द्वन्द्वमिच्छन्ति। चरणशब्दः कठादिषु शाखाभेदेषु तदध्यायिपुरुषेषु चेति प्रकृते उभयोरपि ग्रहणमिति कौस्तुभे 'अनुवादे चरणानाम्' (अष्टा.- २.४.३) इति सूत्रव्याख्यानावसरे स्पष्टम्। तन्न, शाखायामस्त्रीविषत्वाभावात्। शाखाध्येतृवाचिशब्दो जातिकार्यं प्राप्नोतीत्यर्थः सिद्धः। तस्योदाहरणं तावत् - 'कठी' इति। कठेन प्रोक्तमधीयानेत्यर्थः। तस्य सिद्धिप्रकारस्तावत् - वैशम्पायनान्तेवासित्वात् 'कलापिवैशम्पायनान्तेवासिभ्यश्च' (अष्टा.- ४.३.१०४) इति सूत्रेण कठशब्दात् णिनिप्रत्यये तस्य च 'कठचरकाल्लुक्' (अष्टा.- ४.३.१०७) इति सूत्रेण लुकि 'छन्दोब्राह्मणानि च तद्विषयाणि' (अष्टा.- ४.२.६६) इति छन्दांसि ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि अध्येतृवेदितृप्रत्ययं विना न प्रयोज्यानीत्युक्तेः णिनिप्रत्ययान्तात् कठशब्दात् 'तदधीते तद्वेद' (अष्टा.- ४.२.५८) इति सूत्रेणाणि, तस्य च 'प्रोक्ताल्लुक्' (अष्टा.- ४.२.६३) इति सूत्रेण लुकि कठशब्दस्य कठप्रोक्तशाखाध्येतृवाचकत्वेन जातिवाचकतया 'जातेरस्त्रीविषयादयोपधात्' इति सूत्रेण स्त्रियां ङीषि 'यस्येति च' (अष्टा.-

६.४.१४८) इत्यल्लोपे 'कठी' इति रूपं निष्पद्यते। 'कलापी' 'बह्वृची' इत्यादीन्युदाहरणान्तराण्यप्यूह्यानि। ननु स्त्रीणां वेदाध्ययनं निषिद्धम्, 'स्त्रीशूद्रौ नाधीयाताम्' इति श्रूतेरिति चेदुच्यते यत् 'पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥' इति यमस्मृत्या विज्ञायते यत्पुराकल्पे तत्सत्त्वेऽपि नेदानीमिति न क्षतिः। अथवा मा नामाध्यगीष्ट तद्वंश्यत्वात्ताच्छब्द्यं भविष्यति, यथानधीयानेऽपि माणवके। एतेन 'बह्वृचीत्यस्य शाखेत्यर्थः' इति वदतां रत्नकाराणां मतमपास्तम्।

**३.२. द्वितीयकारिका -** आकृतिग्रहणा जातिरिति नित्यानित्यसाधारणमिदं लक्षणम्। नित्यं ब्राह्मणत्वादि, अनित्यं युवत्वादि। 'जातेरस्त्री' इत्यादिसूत्रे भाष्ये 'अपर आह' इत्यादिना जातिलक्षणप्रतिपादिका द्वितीयकारिका समुपन्यस्ता। सा कारिका तावत्—

'प्रादुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः।

असर्वलिङ्गां बह्वर्थां तां जातिं कवयो विदुः॥'[१७] इति।

सत्त्वस्य द्रव्यस्य प्रादुर्भावविनाशाभ्यां या आविर्भावतिरोभावौ प्राप्नोति यावद्द्रव्यभाविनीति यावत्, किञ्च गुणेन सह तस्याः सहावस्थानं भवति। यथा द्रव्यं गुणरहितं न भवति तथैव न जातिरहितमपि। किञ्च असर्वलिङ्गा बह्वर्था सर्वव्यक्तिव्यापिनी भवति। तदुदाहरणञ्च गोत्वं, ब्राह्मणत्वमित्यादि। यावद्द्रव्यभाविनीति विवरणेनात्मत्वस्य जातित्वमुपपादितम्। अस्मिन् मते च नित्यमात्रवृत्तिर्यावद्द्रव्यभावित्वरूपा जातिः स्वीक्रियते इति कारणात् युवत्वादेर्न जातित्वम्। ननु एवं सति 'युवतितरा' इत्यत्र 'जातेश्च' इत्यनेन पुंवत्त्वप्रतिषेधो न स्यादिति चेदाह श्रीमन्नागेशो लघुशब्देन्दुशेखरे - 'भिन्नऋषिकर्तृकलक्षणद्वयप्रामाण्येन कुमारादिशब्दे जातिकार्यविकल्पः, अत एव 'युवजानि'रित्यत्र पुंवत्त्वं, 'युवतितरे'त्यत्र तदभावश्च'[१८] इति। अतः पूर्वकारिकाप्रतिपादितजातिलक्षणेन जातित्वस्य सिद्धे सिद्धः पुंवत्त्वनिषेधः। तदुक्तं भाष्ये - 'कः पुनरेतयोर्जातिलक्षणयोर्विशेषः? यथापूर्वं जातिलक्षणं तथा कुमारीभार्य्य इति भवितव्यम्। यथोत्तरं तथा कुमारभार्य्य इति भवितव्यम्'[१९] इति।

## ४. नागेशमतिः

सर्वतन्त्रस्वतन्त्रा नागेशास्तु 'आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति एकमेव लक्षणं, न तु 'आकृतिग्रहणा जातिः' इति, 'लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति लक्षणद्वयम्। तदुदितं नागेशेन - 'परे तु आकृतिग्रहणेत्येव लक्षणम्'[२०] इति। आकृतिपदमिहोपदेशस्योपलक्षणम्। उपलक्षणत्वञ्च स्वबोधकत्वे सति स्वेतरबोधकत्वम्। अतः आकृत्युपदेशद्वारा साक्षाद्वोपदेशेन ग्राह्या जातिरित्यर्थः फलति। तत्र 'ईदृशाकारो गौः' इत्याकृत्युपदेशग्राह्या भवति गोत्वादिजातिः, 'अयं ब्राह्मणः' इति साक्षादुपदेशगम्या ब्राह्मणत्वादिजातिः। पूर्वपक्षीहाक्षिपति यत् एकलक्षणस्वीकारे शुक्लादिगुणानामपि जातित्वं निर्बाधं स्यात्, एकत्र 'अयं शुक्लः' इत्युपदेशे सर्वत्र ग्राह्यत्वादिति, तत्समाधत्ते विद्वद्वरो नागेशः - 'आकृतिग्रहणं जातिग्राहकोपदेशस्याप्युपलक्षणम्, 'लिङ्गानाञ्च न सर्वभा'गिति तत्स्वरूपानुवादकं, तेन शुक्लादिगुणानामेकत्वेऽपि जातित्वाभावो बोधितः'[२१] इति। जातिग्राहकोपदेशश्च 'ईदृशाकारो गौः' इति, 'अयं ब्राह्मणः' इति च। 'अयं शुक्लः' इति गुणग्राहकोपदेशो न तु जातिग्राहकोपदेश इति कृत्वा न दोषः। 'अपि' इति निश्चये वर्तते। किञ्च 'लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति वचनमाकृतिग्रहणायाः स्वरूपानुवादकं न तु लक्षणान्तरम्, तेन शुक्लादिगुणानामेकत्वपक्षेऽपि न जातित्वम्। असर्वलिङ्गत्वादेव 'विशेषणानां चाजातेः' (अष्टा.- १.२.५२) इति सूत्रे भाष्ये जातेराविष्टलिङ्गत्वमवादि। आविष्टलिङ्गत्वञ्च नियतलिङ्गत्वमिति कैयटः। नियतलिङ्गत्वञ्चेह लिङ्गत्रयविशिष्टभिन्नत्वम्। तथा च यावन्त उक्तलक्षणकजातिवाचकास्ते न लिङ्गत्रयविशिष्टाः। 'तटं त्रिषु' इति कोशप्रामाण्यात् 'तच्च प्रायिकम्' इति केचिद्वदन्ति, तेन तटादेः त्रिलिङ्गत्वेऽपि न क्षतिरिति चेन्न। 'भाष्यप्रामाण्याज्जातेरेकशब्दवाच्याया न त्रिलिङ्गता, 'तटं त्रिषु' इत्यादिकोशकृतां प्रमादः'[२२] इति समाधानमूचुः शेखरकाराः। 'सकृदाख्यातनिर्ग्राह्या' इत्यनेनैकत्वमनेकानुगतत्वञ्च बोधितम्। सकृत् एकवारं क्वचिद्व्यक्तौ साक्षादाकृतिद्वारा वोपदिष्टा व्यक्त्यन्तरे ग्रहीतुं शक्या इति तदर्थः। गोत्वब्राह्मणयोरेकलक्षणसङ्ग्रहादेव 'प्रादुर्भावविनाशाभ्याम्' इत्यादिकारिकया लक्षणान्तरं प्रतिपादितम्। यावद्द्रव्यभाविनी या सा जातिरिति लक्षणेन लभ्यते,

ततश्च गोत्वब्राह्मणत्वयोर्भवति सङ्ग्रहः। किञ्च लक्षणेऽस्मिन 'असर्वलिङ्गा' इति न लक्षणान्तरमपि तु तत्स्वरूपकथनमेव, एतेन 'असर्वलिङ्गामिति। पूर्ववल्लक्षणान्तरम्'[२३] इति वदता पदमञ्जरीकाराणां मतमपास्तम्। न्यगादि च नागेशेन - "'असर्वलिङ्गा'मित्येतन्मदुक्तार्थकमेव, न तु लक्षणान्तरम्, अनुपयोगात्' [२४] इति। आकृतिग्रहणेत्येकम्, प्रादुर्भावविनाशाभ्यामित्यपरम्। अत एव 'कः पुनरेतयोर्जातिलक्षणयोर्विशेषः? यथा पूर्वलक्षणं तथा कुमारीभार्य इति भवितव्यं, यथोत्तरं तथा कुमारभार्य' इति भाष्ये पूर्वलक्षणमित्येकवचनमेव प्रायुनक्। "आकडारसूत्रशेषे - 'आकृतिग्रहणा जातिः' इत्येवोक्तं भाष्ये"[२५] इत्यपि प्रमाणान्तरत्वेन नागेशेनोपन्यस्तम्। एवञ्च 'आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति समष्ट्या एकमेव लक्षणमिति नागेशमतं फलितम्।

## ५. उपसंहृतिः

'आकृतिग्रहणा जातिर्लिङ्गानाञ्च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या' इति समष्ट्या एकमेव लक्षणमित्यस्मिन् मत एव रमन्ते बहवो विद्वांसः। किन्तु गोत्रपदेन अपत्यमात्रस्य ग्रहणमेव युक्तं न तु शास्त्रीयमिति पूर्वप्रतिपादितयुक्त्या वक्तुं शक्यम्। किञ्च 'नित्यमेकमनेकानुगतं सामान्यम्' इति नैयायिकोक्तं जातिलक्षणमपि भाष्यसम्मतमिति 'भिन्नेष्वभिन्नं छिन्नेष्वछिन्नम्'[२६] इति पस्पशाह्निकस्थभाष्यप्रामाण्येन विज्ञायते। एवं समासेन यथाप्रतिभानमितरशास्त्रस्थितजातिलक्षणानि पर्यालोच्य विद्वद्विवादनिरसनपुरस्सरं शाब्दिकसम्मतजातिस्वरूपं निरूपितमिति शम्।

## तथ्यसूत्राणि—

१) पतञ्जलिः, *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), सम्पा.- श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली,२००६, पृष्ठम्- ८६।

२) भट्टोजिदीक्षितः, *वैयाकरणसिद्धान्तकौमुदी* (मूलमात्रम्), सम्पा.- श्रीगोपालदत्तपाण्डेयः, चौखम्बा विद्याभवन, वाराणसी, २०११, पृष्ठम्- ५७।

३) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- ८६।

४) अन्नम्भट्टः, *तर्कसंग्रहः* (प्राचीननवटीकासहितः), सम्पा.- श्रीसत्कारिशर्मा, चौखम्भा-संस्कृत-संस्थान, वाराणसी, २०११, पृष्ठम्-७५।

५) याज्ञवल्क्यः, *याज्ञवल्क्यस्मृतिः*, सम्पा.- उमेशचन्द्रपाण्डेयः, चौखम्भा-संस्कृत-संस्थान, वाराणसी, पृष्ठम्- ३९।

६) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- ८६।

७) *वैयाकरणसिद्धान्तकौमुदी,* पृष्ठम्- ५७।

८) *वैयाकरणसिद्धान्तकौमुदी,* पृष्ठम्- ५८।

९) *वैयाकरणसिद्धान्तकौमुदी,* पृष्ठम्- ५८।

१०) *वैयाकरणसिद्धान्तकौमुदी,* पृष्ठम्- ५८।

११) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- ८७।

१२) *वैयाकरणसिद्धान्तकौमुदी,* पृष्ठम्- ५८।

१३) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- ४९।

१४) नागेशः, *लघुशब्देन्दुशेखरः* (शेखरदीपिकोपेतः), चौखम्भा-प्रकाशन, वाराणसी,२००७, पृष्ठम्- ४०८।

१५) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- १३९-१४०।

१६) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- १२५।

१७) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- ८७।

१८) *लघुशब्देन्दुशेखरः*, पृष्ठम्- ४०८।

१९) *व्याकरणमहाभाष्यम्*(पञ्चमखण्डः), पृष्ठम्- ८८।

२०) *लघुशब्देन्दुशेखरः*, पृष्ठम्- ४१०।

२१) *लघुशब्देन्दुशेखरः*, पृष्ठम्- ४१०।

२२) *लघुशब्देन्दुशेखरः*, पृष्ठम्- ४११।

२३) वामनजयादित्यौ, (न्यासपदमञ्जरीसहिता)*काशिका* (चतुर्थखण्डः), सम्पादकौ-

जयशङ्करलालत्रिपाठी, सुधाकरमालवीयश्च, तारा बुक एजेन्सी,१९८४, पृष्ठम्- ३७०।

२४) *लघुशब्देन्दुशेखरः*, पृष्ठम्- ४११।

२५) *लघुशब्देन्दुशेखरः*, पृष्ठम्- ४११।

२६) *व्याकरणमहाभाष्यम्*(प्रथमखण्डः), पृष्ठम्- १०।

# श्रीमद्भागवतमहापुराणे परमाणुवादः

## प्रलयब्यानार्जी

परमाणवो भवन्ति कस्यापि स्थूलविषयस्य द्रव्यस्य वा सूक्ष्मतमांशः । परमाणुपदार्थस्य कस्यापि पदार्थस्य वा सूक्ष्मतमांशाभिधायकस्य वादः श्रीमद्भागवतमहापुराणे असकृदुपलभ्यते नाम । श्रीमद्भागवतमहापुराणे तृतीयस्कन्धस्य एकादशेऽध्याये परिलक्ष्यते परमाणुवादस्य काचित् धारणा । तत्राणुचिन्ता मैत्रेयमुनेरुक्तिषु दरीदृश्यते । सतः कार्यस्य कार्यद्रव्यस्य वा विशेषाणामांशानां मध्ये यः कार्यभावमप्राप्तः समष्टिरूपताञ्चाप्राप्तः समुदायावस्थाञ्चाप्राप्तः वा सर्वदावस्थितः स परमाणुरिति । तदुद्गीयते –

"चरमः सद्विशेषाणामनेकोऽसंयुतः सदा ।

परमाणुः स विज्ञेयो नृणामैक्यभ्रमो यतः ॥"[१] इति ।

स एव परमाणुर्नित्यः, वस्तूनां चरमावयवश्च । अत एव सदा कार्यसमष्टिरूपताया अपगमेऽप्यस्ति स परमाणुरिति । तथाहि अन्त्यः यदपेक्षया पुनरंशो न सम्भवतीत्येवंविधो यः स परमाणुर्विज्ञेयः । परमाणूनामस्तित्वे किम्प्रमाणमिति पृच्छायामुच्यते – 'लोकानां येभ्य परमाणुभ्य एव समुदितेभ्यः अवयवि-बुद्धिर्जायते' इति ।[२] (The great sage Maitriya said : The smallest particle of material substance, which has not yet combined with any other similar particles, is called paramanu [a sub-atomic of matter]. Paramanus always exist both in the dormant and manifest states of material existence. It is the combination of more than one paramanu [sub-atomic particle] which gives rise to

the illusory concept of a [material] unit.)

यस्य कार्यद्रव्यस्य चरमः सूक्ष्मांशः तस्य कार्यमात्रस्यैव प्रलयादिपरिणामान्तरमप्राप्तस्य पृथिव्यादेः यत् ऐक्यं स इदानीन्तन-तदानीन्तनादिविशेषविवक्षया अविषयीकृतः घटपटादिभेदविवक्षया च अविषयीकृतः परममहत्पदवाच्यो भवतीत्येव मुनेराशयः ।[३] (The entire manifest material existence, taken as a non-specific whole, and before returning to an  unman fest [dormant] state, is defined as the largest [material] size.)

अतः कालस्य विभागप्रतिपादनार्थमाह –

“एवं कालोऽप्यनुमितः सौक्ष्म्ये स्थौल्ये च सत्तम ।
संस्थानभुक्त्या भगवानव्यक्तो व्यक्तभुग्विभुः ॥”[४]

अर्थात् सृष्टिदक्षः भगवच्छक्तिविशेषः अयं कालः अनुमितो भवति । श्लोकोक्तचकारेण मध्यमावस्था गृह्यते । कालस्य स्थूक्ष्मावस्था स्थूलावस्था मध्यमावस्था चोपलभ्यन्ते । यद्यपि अयं कालः अव्यक्तः स्वतः दुरनुभवो वा तथापि परमाण्वादीनां भुक्त्या व्याप्तिवशेन सूक्ष्मरूपेण स्थूलरूपेण च ज्ञातो भवति प्रपञ्चव्यापकत्वात् ।[५] (We can understand the short and long dimensions of [material] time, as a potency of  the Supreme all-pervading transcendental Lord, Who, in the form of the Sun, passes across the small and large dimensions of [material] things.)

यः कालः प्रपञ्चस्य परमाणुवत्सूक्ष्मतमावस्थां व्याप्नोति स कालः परमसूक्ष्म एव भवतीति । सृष्ट्यादिसंहारपर्यन्तसर्वावस्थां यावत् यः कालः व्याप्नोति स परमो महान् । टीकाकारस्य मतानुसारं यावता परमाणुदेशं सूर्यः अतिक्रामति तावान् कालः परमाणुरिति । यावता द्वादशराश्यात्मकं भुवनकोषं सर्वमतिक्रामति स कालः संवत्सरात्मकः परममहान् इति ।[६] (The  amount of time it takes the sun to pass across the smallest particle of matter is called paramanu which is smallest measure of time, while

the period it takes to cross the total expanse of material creation is called the longest measure of time.)

अतः मध्यमकालावस्थां वक्षति । तत्र परमाणुद्वयसंयोगे सति अणुः जायते द्व्यणुकमुत्पद्यते वा अणुभ्यो मिलितेभ्यस्त्रसरेणुरुपजायते, त्रिभिद्व्यणुकैः त्र्यणुकम् वा । जालसूर्यमरीचिस्थं सूक्ष्मतमं यत् सावयवं दृश्यते तत् त्र्यणुकमिति । ते त्रसरेणवः उड्डयनशीलाः । तदुच्यते –

“अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः ।

जालार्करश्म्यवगतः खमेवानुतन्नगात् ॥”[७]

(A combination of two paramanus constitutes an anu [atom]; and three anus [atoms] makes one ttrasarenu. Trasarenus are visible [to the naked eye] when seen floating upward in the air while viewed through rays of sunlight which enter a room through a latticed window.)

यः कालः त्रसरेणुत्रयवत् मध्यमावस्थां व्याप्नोति त्रुटिरिति नाम्ना आख्याता, शतं त्रुटयः वेधः स्युः । त्रिभिर्वेधैः लवो भवति ।[८] (Three Trasarenus is called a truti [ 8/13,500 part of a second], which is a measure of time it takes [the sun] to travel across three Trasarenus. A combination of one hundred trutis is called a vedha [8/135 part of a second], and three vedas together is known as a lava [8/45 part of a second].)

त्रिभिर्लवैः परिमितः कालः निमेषः, निमेषत्रयपरिमितः कालः क्षणः इति । पञ्चक्षणैः एका काष्ठा ज्ञेया । पञ्चदशकाष्ठापरिमितः कालः लघु इति नाम्ना कथितो भवति ।[९] (A combination of three laves is called a nimesha or the twinkling of an eye [8/15 part of a second], while three such nimeshas equals a ksana [8/5 part of a second]. A combination of five ksanas is known as a kastha [8 seconds], and fifteen is

equal to a laghu [2 minutes].)

पञ्चदशलघुपरिमितः कालः दण्डनाम्नाभिधीयते । दण्डद्वयपरिमितः कालः एव मुहुर्त इति । षड्दण्डपरिमितः सप्तदण्डपरिमितो वा कालः प्रहर इति नाम्ना ख्यातो भवति । स च प्रहरः मानवानां दिनस्य रात्रेश्च प्रत्येकस्यैव चतुर्भागैकभागात्मको भवतीति नियमः ।[१०] (A conglomerate of 15 laghus is called a nadika [30 minutes]. Two nadikas equal a muhurta [hour], and six or seven nadikas equal a prahara [approximately 3 hours to 3 and a half hours, depending on long or short days], which is a fourth of a day by human calculation.)

अतः नाडिकाया परिमाणं निगद्यते – चतुरङ्गुलपरिमितैः पञ्च गुञ्जा माषैः, स्वर्णनिर्मितामाषैः कृतच्छिद्रं द्वादशार्द्धपलैः षट्पलपरिमितैस्ताम्रैः रचितमुन्मानपात्रं यावता कालेन प्रस्थपरिमितेन जलेन पूर्णं भवति तावान् कालः नाडिका इति ।[११] (A nadika can be measured by taking a copper pot weighing six palas that can contain about 14 ounces of water and punching a small hole in the bottom using a 10-12’’ long golden needle that weighs four mashas; when the pot is placed in water it takes a nadika of time [about 30 minutes] to fill up [and sink].)

प्रहरचतुष्टयेन मर्त्यलोकवासिनामेकदिवसः प्रहरचतुष्टयेन एका रात्रिश्च भवति । प्रकारेणानेन पञ्चदशसंख्यकरात्रिन्दिनात्मकः कालः एकः पक्षः । स च द्विविधः शुक्लः कृष्णश्च ।[१२] (Oh Vidura. Who respect all beings, [the Sage Maitreya continued], for humans, day and consist of four yamas [6hour periods], while 15 such days & nights make up the bright or dark fortnight, by rotation.)

पक्षयोः मिलनात्मकः कालः मासः । मर्त्यलोकवासिनामेकमासपरिमितकालः पितृलोकप्राप्तानामेकाहोरात्रं भवतीति नियमः । लौकिकमासद्वयेन ऋतुः, षण्मासा अयनं, तच्च द्विविधं दक्षिणायनमुत्तरयणञ्चेति ।[१३] (Two of these fortnight [the bright and the

dark] equals a masah [one month consisting of 30 days length], and this period is taken as one day and one night of the forefathers [pitris in heaven]. Two of these months equal a ritu or season, while six such monthe is called an ayana [one full movement of the Sun from North to South or South to North].)

मर्त्यलोकवासिनामयनद्वयं देवलोकप्राप्तानामहोरात्रौ भवतः । देवलोकानामेकाहोरात्रो मानवानां द्वादशमासाः वत्सरो व संवत्सरशतं मनुष्याणां परमायुः निर्द्धारितम् । अर्थात् संवत्सरशतं नृणां जीवनकाल इति । तदाम्नायते –

"अयने चाहनी प्राहुर्वत्सरो द्वादश स्मृतः ।

संवत्सरशतं नृणां परमायुर्निरूपितम् ॥"[१४]

(By the calculation of the demigods in heaven these two ayanas [12 months by human calculation] make up their celestial day and night which is one year for humans. And the full life span for humans is 100 years.)

सौरजगति स्थितानां परमाणुतः परममहत्पर्यन्तानां सर्वेषां वस्तूनां सूर्यक्रियया सह सम्बन्ध उपलभ्यते । तत्र सम्बन्धतारतम्यात्कालतारतम्यं परिलक्ष्यते । सूर्यस्तस्य क्रियया परमाणुपरिमितं यादृशप्रदेशमतिक्रामति तादृशक्रियाविशिष्टकालः परमाणुरूपसूक्ष्मतमः खण्डकालः । भगवतः अतितेजःपुञ्जविशिष्टा या शक्तिः सा सूर्यस्वरूपा एव । सूर्यस्वरूपेण भगवान् क्रियायुक्तो दृश्यते । भगवान् सूर्यः कालस्वरूपः, स च चन्द्रादीनां ग्रहाणाम्, अश्विन्यादीनामृक्षाणामपरेषां नक्षत्राणां चक्रे मण्डले वा तिष्ठति ।[१५] कालस्वरूपः सूर्यः सूक्ष्मतमकालादारभ्य वर्षैकपर्यन्तेन कालेन द्वादशराश्यात्मकं समग्रं भुवनकोषं परिक्रामतीति ।[१६] सूक्ष्मतमांशस्य व्याख्यायामुत्तरकालवर्तिभिः दार्शनिकैः तथा पदार्थतत्त्वविद्भिश्च तस्य परमाणोः तत्त्वोद्घाटणाय स्थापनाय च तस्य सिद्धान्तस्य हायनान्युत्सृष्टानीति शिवम् ।

**तथ्यसूत्राणि—**

१. श्रीमद्भागवते – ३.११.१

२. तत एकादेशे कालः परमाण्वादिलक्षणैः । युगमन्वन्तरादिभ्यः कल्पमानादि वर्ण्यते । तदेवं सामान्यतः कालस्योपलक्षणभूतं गुणव्यतिकारं दशविधं निरूप्य इदानीं तस्यैव विशेषं निरूपयितुं तत्परिच्छेद्यं वस्तु लक्षयति द्वाभ्याम् । सतः कार्यस्य विशेषाणामंशानां यश्चरमोऽन्तः यस्यांशो नास्ति । अनेकः कार्यावस्थामप्राप्तः । असंयुतसमुदायावस्थाञ्चाप्राप्तः । अत एव सदा कार्यसमुदायावस्थयोरपगमेऽप्यस्ति स परमाणुर्विज्ञेयः । किं तत्र प्रमाणम् ? अत आह – यतो येभ्यः समुदितेभ्यः नृणां व्यवहर्तॄणामैक्यभ्रमः अवयविबुद्धिः । तथा च पञ्चमे अवयविनिराकरणे वक्ष्यति – येषां समूहेन कृतो विशेष इति । कार्यानुपपत्या कल्प्यते इति भावः । श्रीमद्भागवते, श्रीधरटीकायाम् – ३.११.१

३. सत एव पदार्थस्य स्वरूपावस्थितस्य यत् । कैवल्यं परममहानविशेषो निरन्तरः ।। श्रीमद्भागवते – ३.११.२

सूक्ष्ममुक्त्वा स्थूलमाह सत एवेति । यस्य चरमोंशः परमाणुस्तस्यैव सतः कार्यमात्रस्य स्वरूपावस्थितस्य परिणामान्तरप्राप्तस्य यत् कैवल्यमैक्यं स परममहान् । पुंस्त्वन्तु परमाणुप्रतियोगित्वात् । ननु नानाविशेषान् परस्परं भिन्नत्वं सर्वः पदार्थः कथमैक्यं तस्य ? तत्राह अविशेषो विशेषविवक्षारहितः, निरन्तरो भेदविवक्षारहितश्च सर्वोपरि प्रपञ्च परमहानित्यर्थः ।। - श्रीमद्भागवते, श्रीधरटीकायाम् – ३.११.२

४. श्रीमद्भागवते – ३.११.३

५. यथा सूक्ष्मः स्थूलश्चायं पदार्थः, एवं कालोऽप्यनुमितः । चकारान्मध्यमावस्था गृह्यते संस्थानं परमाण्वाद्यवस्था तस्य भुक्तिर्व्याप्तिस्तया भगवानिति हरेः शक्तिः, स्वतोऽव्यक्तः व्यक्तं भुङ्क्ते व्यप्नोति परिच्छिन्नतीति तथा । विभुः उत्पत्त्यादिषु दक्षः । - श्रीमद्भागवते, श्रीधरटीकायाम् – ३.११.३

६. स कालः परमाणुर्वै यो भुङ्क्ते परमाणुताम् । सत्येऽविशेषभुग् यस्तु स कालः परमो महान् ।। - श्रीमद्भागवते – ३.११.४

... अयमर्थः – ग्रहर्क्षताराचक्रस्थ इत्यादिनां यत् सूर्यपर्यटनं वक्ष्यते, तत्र सूर्यो यावता परमाणुदेशमतिक्रामति तावान् कालः परमाणुः । यावता च द्वादशराश्यात्मकं सर्व भुवनकोषमतिक्रामति स परममहान् संवत्सरात्मकः कालः । - श्रीमद्भागवते, श्रीधरटीकायाम् – ३.११.४

७. श्रीमद्भागवते – ३.११.५

८. त्रसरेणुत्रिकं भुङ्क्तेऽयः कालः सा त्रुटिः स्मृता । शतभागस्तु वेधः स्यात् तैस्त्रिभिस्तु लवः स्मृतः ।। - श्रीमद्भागवते – ३.११.६

९. निमेषस्त्रिलवो ज्ञेय आम्नातास्ते त्रयः क्षणः । क्षणान् पञ्च विदुः काष्ठां लघुता दश पञ्च च ॥ श्रीमद्भागवते – ३.११.७

१०. लघूनि वै समाम्नाता दश पञ्च च नाडिकाः । ते द्वे मुहुर्तः प्रहरः षड्षामः सप्त वा नृणाम् ॥ - श्रीमद्भागवते- ३.११.८

११. द्वादशार्धपलोम्नानं चतुर्भिश्चतुरङ्गुलैः । स्वर्णमाषैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतम् ॥ - श्रीमद्भागवते- ३.११.९

१२. यामाश्चत्वारश्चत्वारो मर्त्यानामहनी उभे । पक्षः पञ्चदशाहानि शुक्लः कृष्णश्च मानद ॥ - श्रीमद्भागवते- ३.११.१०

१३. तयोः समुच्चयो मासः पितॄणां तदहर्निशम् । द्वौ तावृतुः षडयनं दक्षिणञ्चोत्तरं दिवि ॥ - श्रीमद्भागवते- ३.११.११

१४. श्रीमद्भागवते- ३.११.१२

१५. ग्रहर्क्षताराचक्रस्थः परमाण्वादिना जगत् । संवत्सरावसानेन पर्येत्यनिमिषो विभुः ॥ - श्रीमद्भागवते- ३.११.१३

१५. अनेन क्रमेणासौ सूर्यो नित्यमायुः क्षरतीत्याहा ग्रहाश्चन्द्रायः, ऋक्षाण्यश्विन्यादिनि, तारा अन्यानि नक्षत्राणि, तदुपलक्षितं यत् कालचक्रं तत्र स्थितः अनिमिषः कालात्मा विभुरीश्वरः सूर्यः जगत् द्वादशराश्यात्मकः भुवनकोषं पर्येति पर्यटति । - श्रीमद्भागवते, श्रीधरटीकायाम् - ३.११.१३

## परिशिलिता ग्रन्थाः—

१. कृष्णद्वैपायन. श्रीमद्भागवतम्. सम्पा. कृष्णचन्द्र. कोलकाता : महेश लाइब्रेरी, १९९६

२. कृष्णद्वैपायन. श्रीमद्भागवतम्. कोलकाता : वसुमती साहित्य मन्दिर, nd.

३. कृष्णद्वैपायन. श्रीमद्भागवतमहापुराण. गोरक्षपुर : गीता प्रेस, २०१०.

४. प्रत्यगात्मानन्द सरस्वती. वेद ओ विज्ञान. कोलकाता : संस्कृत कलेज, १९६७.

५. Seal, Brajendranath. The Positive Science of the Ancient Hin dus. Delhi : Motilal Banarasidass, 1985.

# शाकुन्तले 'आलेख्याश्चर्ययोश्चित्रम्' – एका समीक्षा

भक्तिलतादासः

ॐ नमस्ते चिते विश्वरूपात्मकाय॥

मानवकृता शिल्परचनापि शाश्वतसौन्दर्यस्य अन्तर्भूता। वयं भारतीयास्तु सौन्दर्यस्य उपासका:। शिल्पकर्म तु अत्र 'आराधना'। 'सर्वं खल्विदं ब्रह्म' इत्येवमेव अस्माकं संस्कृति:। श्रीभगवानुवाच –

"यद्यदविभूत्मत् सत्त्वं श्रीमदूर्जितमेष वा।

तत्तदेवायगच्छत्वं मम तेजोऽशसम्भवम्॥" (गीता१०/४१)

सर्वप्रथमे ब्राह्मणसाहित्ये 'शिल्पम्' इति शब्द: दृश्यते, ऐतरेये, कौषितकिब्राह्मणे च। अत: जि. सि. पाण्डेमहोदायीन साधूक्तम् – "The earliest Indian conception of art is, thus, that of creating forms with due measure which reveal and conceal the vision of perennial truth."[1]

आरिस्टटलप्रभृतिभि: पाश्चात्यदार्शनिकै: सह एतद्विषये भारतीयविपश्चितां सादृश्यमस्ति। अध्यात्मतत्त्वस्य पीठस्थाने भारतवर्षे परवर्तिकाले (ब्राह्मणसाहित्य्स्य युगे) 'शिल्पम्' इति शब्द: मूर्तत्वं लभते। वैदिकेयुगे अर्थसंकोचने अस्य शब्दस्य अर्थ: भिन्नत्वं लभते। शिल्पजगत् विशालम्। ऐतरेयब्राह्मणे अस्य शब्दस्य अर्थ: कृत: - "In the later vedic literature we get the word *śilpa, sāyaṅa* explain śilpa to mean a marvelous word. A famous passage in the Aitareya Brāhmaṅa (30$^{th}$ cap) says human arts are in imitation of the divine arts –

Devaśilpāni eteṣāṁ vai śilpānāmanukrtiha śilpam ad-

higamyate hastī kaṁ —so vā so hiraṇyam aśvatarīrathaḥ śilpam iti."[2]| अर्थात् कारुकला (craft)। अपरे तु कौषीतकिब्राह्मणे 'शिल्पम्' इत्यस्य शब्दस्य अर्थं कुर्वन्ति – "Three śilpas as dancing, singing and playing of musical instruments."[3]

अमरकोषे 'शिल्पम्' कलाशब्दवाचि।– 'शिल्पं कर्म कलादिकम्' (द्वितीयकाण्डम्/शुद्रवर्गः/९९) । 'कला' कामसूत्रे चतुःषष्टिप्रकारैः। अमरे 'कला' अपि शिल्पशब्दवाच्या (तृतीयकाण्डम्/नानार्थवर्गः/६०६) । तत्रैव 'शिल्पि'प्रसङ्गे यद्यपि कारुकला बोधव्या (द्वितीयकाण्डम्/शुद्रवर्गः/१३), परन्तु 'शिल्पम्' व्यापकार्थे प्रयुक्तम् (वर्त्तमाने)। प्राथमिकस्तरे शिल्पम् द्विविधम् – चारु कारु च । तत्कालीनयुगे 'कारु' सर्वसाधारणानां शिल्परूपेण वर्तते। नित्यव्यवहार्यवस्तूनां सौन्दर्यविधानार्थं मूलतः स्त्रीणां श्रुद्राणाश्च अवदानं समयातिवाहनं वा दृश्यते (मनु ३.६४, १०.१००) । अपरपक्षे चारुकला न तु नित्यव्यवहार्या । मानवानां बौद्धिकविकाशार्थं मानसिकतृप्तिविधानार्थं चाथवा प्रशान्तौ अवसादे वा चारु शिल्पिनाम् विनोदनमासीत्। वर्तमानकाले भागद्वयमिदं यथाक्रमेण 'Fine Arts' `craft arts' चेति अभिधीयते।

कामसूत्रे चतुःषष्टिकलानां मध्ये चतुर्थस्थाने तु आलेख्यमस्ति। आलेख्यमर्थात् चित्रशिल्पम्[४], अमरकोषे- 'आलेख्याश्चर्ययोश्चित्रम्' (तृतीयकाण्डम्/नानार्थवर्गः/५४३)। चारुशिल्पस्य एकः प्रकारभेदः चित्रशिल्पम्। स्थापत्यं भास्कर्यञ्च तत्र अपरं प्रकारद्वम्। चारुशिल्पं 'ललितकला' इति अभिधेयेनापि परिचितम् । अमरे तु 'ललितम्' इत्यस्य शब्दस्य संज्ञा – "स्त्रीणां विलासविवेकविभ्रमा ललितन्तथा" (प्रथमकाण्डम्/नाट्यवर्गः/४५०) । ललितत्त्वात् लालित्यम्। अत्र हि नारीप्रसङ्गः। परन्तु, संस्कृतसाहित्ये ललितकला न तु नारीणां केवलम्। शिल्पेऽधिकारः नारीपुरुषभेदे न तु सृष्टः। संस्कृतसाहित्ये पुरुषाः हि ललितपारङ्गमाः। धीरललितनायको नायकस्य प्रकारभेदः इति प्रमाणम्। संस्कृतकाव्ये एतस्मिन् विषये उदाहरणानि च दृश्यन्ते। निश्चिन्ताप्रचण्डनृत्यादिकलापरायणो नायको हि धीराललितः (सा. द. ३.३४) । नायिका, काऽपि स्त्री वा अङ्कनपटीयसी इति दृश्यं दुर्लभम् संस्कृतसाहित्ये।

रत्नावलीनाटिका तु व्यतिक्रमी।

अस्माकं संस्कृतसाहित्यं वैचित्र्यपूर्णम्। धीरललितनायको हि शिल्पनिपुण इति दुष्यन्तचरित्रचित्रणे व्यर्थतां पर्यवस्यति। समुद्रवद् संस्कृतसाहित्यम्। तत्र विशालशिल्पसम्बन्धीयावसरम्। शोधपत्रे तु विषयोऽयम् आलोकपातपूर्वकम् आलोच्यते इदानीम्।

कालिदासस्य दुष्यन्तो धीरोदात्तः। आत्मश्लाघाहीनक्षमावान् – अतिगम्भीरः, महासत्त्वः, निगूढगर्वः, दृढव्रतः, कार्ये च स्थिरः नायको हि धीरोदात्तः। यथा – रामयुधिष्ठिरादि (मा. द. ३.३२)। युधिष्ठिरस्य प्रकृतप्राचीनपूर्वसूरी हि दुष्यन्तः। शौर्यवीर्यतेजसां धारा इयम् प्रवाहिता युगान्तरेऽपि। अस्य धीरोदात्तस्य दुष्यन्तस्य मध्ये शिल्पिसत्ता प्रभूतरूपेण अस्ति। कालिदासस्य शाकुन्तले षष्ठाङ्के दुष्यन्तः चित्ररूपेण प्रकटितः।

पञ्चमाङ्कषष्ठाङ्कयोर्मध्ये 'प्रवेशक' इति नामधेयात्मकार्थप्रक्षेपके अङ्गुरीयकबृत्तान्ते दुष्यन्तस्य "मुहूर्तं प्रकृतिहम्भीरः अपि पर्युत्सुकनयनः" इति केवलं दृश्यते। प्रकृतपक्षे शकुन्तलाया प्रणयवृत्तान्तः गान्धर्वविवाहः अतिक्रान्ताः सुदिवसाः महीक्षिता स्मर्यन्ते। ततः षष्ठाङ्के सानुमत्याः प्रवेशः, वसन्तः च समागतः। बसन्तोत्सवस्य काऽपि प्रस्तुतिः न दृश्यते, अपितु विषादाच्छन्ना नगरी। उत्सवः निषिद्धः। अदृश्यायाः सानुमत्याः चक्षुषा अस्माभिः परिलक्ष्यते दुष्यन्तः तत्कृतं चित्रं दिदृक्षुः। अङ्कनक्रिया पूर्वं हि सम्पादिता। अधुना विरहे विनोदनार्थं काङ्खितं चित्रफलकम्। "वियोगावस्थासु प्रियजनसदक्षानुभवनं, ततश्चित्रं कर्म, स्वप्नसमये दर्शनमपि। तदङ्गस्पृष्टानाम् उपगतवतां स्पर्शनमपि, प्रतीकारः कामव्यथितमनसां कोऽपि गदितः।" इति (रमेन्द्रमोहनकर्तृकं उद्धृतम् ५८२ पृः - अभिज्ञानशकुन्तलम्, कुमारसन्तोषिनी टीका))। अत इदानीं 'ततश्चित्रं कर्म' । यद्यपि चित्रफलकदर्शने किञ्चिद् संयोजनकार्ये प्रयासी भवेन्नृपः इति दृश्यमिदं वीक्षते।

चित्रफलकम् आनीतम् अधुना दास्या । पूर्वाङ्कितचित्रस्य अङ्कनसमयः न तु स्पष्टः। षष्ठाङ्कस्याग्रसरेण चित्रमालिन्यस्य प्रसङ्गो घर्मजनित आयाति । कश्मिंश्चिदृतौ अवेगताडितसात्त्विकभावोत्पत्तिः सम्भवा । अपि तु पञ्चमाङ्कषष्ठाङ्कयोर्मध्ये व्यवधानमानुमानिकं पञ्चवत्सरं षष्ठवत्सरं वा ।

सप्तमाङ्के राजपुत्रसर्वदमनस्योपस्थितिः (कार्यकलापः अत्र तु बोधव्यः) लक्षणीया। तत्र तु स षष्ठवर्षीयः सप्तमवर्षीयो वा बालक इत्यनुमीयते।

अधुना चित्रफलकं दृष्ट्वा विदूषकस्योक्तिः –"भोः इदानीं तिस्रः तत्रभवत्यः दृश्यन्ते । सर्वाश्च दर्शनीयाः । कतमा अत्रभवती शकुन्तला ?" इति । अत एव सामूहिकप्रतिकृतिविशिष्टं चित्रफलकमिदं (Group Portrait) स्पष्टम् । अभिनवोऽयमिति मन्यते । किमर्थमभिनवत्वम् ? वर्तमाने चित्रकलायां प्रतिकृतिशब्देन साधारणत एककप्रतिकृतिर्हि बुध्यते। अमरकोषे तु प्रतिकृतिशब्देन मृत्तिकादिनिर्मितप्रतिमाविशेष एव बुध्यते। मृत्तिकया भास्कर्यशिल्पे आलोकपातो यद्यपि भवेत्[५], तथाप्यत्र शिल्पकर्मणो विविधदिशः प्रकाशयन्ते । अर्थात्शिल्पो मृत्तिकया पत्रे वस्त्रेऽपि सृज्यते । शिल्पकौशलन्तु भिन्नं भिन्नम् । प्रतिकृतिः; प्रतिच्छायापदेनाप्यभिधीयते[६] । प्रत्याकृतिः नाम सादृश्यम् । जीवितजनस्यालिखितमूर्तिर्हि प्रतिकृतिः । भारतवर्षे मूघलशासनकाले हि प्रतिकृतिचित्रमुद्भूतमिति विशेषज्ञानामभिमतम् । किन्तु संस्कृतसाहित्ये प्रतिकृतिविषये प्रभूतप्रसङ्गसमागमवशात्प्रोक्तमतं खण्डितम् । आधुनिककाले चित्रशिल्पे मडेल (Model) इति नामधेयेन यद्बुध्यते (यदेकान्तरूपेण पाश्चात्यकौशलस्याङ्गीभूतमंशम्) तत्तु प्राचीनभारते दुष्प्राप्यम्। अर्थात् तस्मिन् समये कल्पनाशक्त्या शिल्पी तस्य भावावेगं परिस्फुरति। अतो दक्षतात्रावश्यमेव प्रयोजनीया । प्रतिकृतिरूपायनकाले मुखावयवादिविषये पुङ्खानुपुङ्खावधानम्, अनुपस्थितस्य पुरुषस्याङ्गप्रत्यङ्गस्य विषयेऽभ्रान्तस्मृतिर्हि उत्कर्षविधाने उपकारका। उलेख्यम्, वर्तमाने प्रतिकृतिशब्देन मूलतः मुखावयवचित्रणं हि बुध्यते। परन्तु दुष्यन्तस्य चित्रमिदं सीमारहितं स्वतन्त्रञ्च । स्वल्पकालातिवाहनेऽपि शकुन्तलायाः अङ्गप्रत्यङ्गानि राज्ञः स्मृतिनिबन्धानि शकुन्तलां प्रति दुष्यन्तस्य प्रगाढप्रेमाभिव्यक्तिः, चित्रे तु शैल्पिकदक्षता च अत्र परिस्फुटत। तथा हि सानुमती जगाद – "अहो, एषा राजर्षेर्निपुणता। जाने सखी अग्रतः मे वर्तते इति।"

सखीत्रयं तु चित्रफलके दृश्यमानम्। परन्तु केन्द्रविन्दुः (Point of view) शकुन्तला एव इति विषये स्वयं सन्देहोत्थापकस्य विदूषकस्योक्तिः – "तर्कयामि अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत्परिश्रान्ता इवालिखिता सा शकुन्तला। इतरे सखौ इति।"

प्रसङ्गतः, चित्रशास्त्रे 'परिप्रेक्षितम्' (Perspective) इति परिभाषाया अवश्यमेव प्रयोजनमस्ति । चित्रे शकुन्तलायाः तस्याः सखीनाञ्चावस्थानं कीदृशम् ? इति अस्पृष्टम् । सानुमत्या उक्तौ 'अग्रतः' इति पदं गुरुत्वपूर्णम् । 'अग्रतः' इति पदेन (साक्षात्) 'शकुन्तला एव' इति भावः प्रकाशितः । अपरे तु चित्रगतव्याकरणानुसारं चित्रे शकुन्तला सखीभ्यां सम्मुखस्थावश्यात्किञ्चिद्बृहद्दृश्यमाना इति भावना स्वाभाविकी एव । परन्तु एतस्मिन् विषये स्पष्टं तथ्यं नास्ति । आवेगेन सह पर्यवेक्षणसूक्ष्मता हि शिल्पे उत्कर्षताया मूलधारा । चित्रार्पितां शकुन्तलां दृष्ट्वा सानुमत्या उक्तिः – "सदृशमेतत्पश्चात्तापगुरोः स्नेहस्यानवलेपस्य च ।" विदूषकोऽपि अवदत् – "साधु वयस्य, मधुरावस्थानदर्शनीयो भावानुप्रवेशः" इति । परन्तु चित्रोऽकर्षत्वं कथं सम्भवेत् ? 'षडङ्गम्' हि अत्र मूलम् । कामसूत्रस्य टीकाकारो जयमङ्गलाकारो यशोधरो विषयेऽस्मिन् आलोचितवान् । शिल्पशास्त्रे 'षडङ्गम्' हि प्राथमिकनियमनीतिः । इमानि हि – १) रूपभेदः, २) प्रमाणम्, ३) भावः, ४) लावण्यम्, ५) सादृश्यम्, ६) वर्णिकाभङ्गम् । दृश्यमानजगत्सम्बन्धीयं यथायथज्ञानं हि रूपभेदम् । दुष्यन्तमुखे कवेरुक्तिः –

"कृतं न कर्णार्पितबन्धनं सखे
शिरीषमागण्डविलम्बिकेसरम् ।
न वा शरच्चन्द्रमरीचिकोमलं
प्रकृतपक्षे रचितं स्तनान्तरे ॥" इति ।

प्रकृतपक्षे वास्तवतया शिल्पानुभवमिश्रेण हि चित्रस्योत्कर्षता । 'प्रमाणं' हि परिप्रेक्षितम् । दूरत्वदृक्पातयोर्तारतम्ये एकं वस्तु विभिन्नकौणिकपरिमापं लभते । चित्रस्य विषयवस्तुना सह भावस्य सामञ्जस्यमेकान्तप्रयोजनम् । अत्र तु न व्यतिक्रमम् । विदूषकस्योक्तिः – "अवसेकस्निग्धतरुणपल्लवस्य चूतपादपस्य पार्श्वे ईषत् परिश्रान्ता एव अलिखिता सा शकुन्तला ।" परन्तु विदूषकस्यासामञ्जस्यपूर्णा कल्पना ("यथाहं पश्यामि पूरितव्यमनेन चित्रफलकं लम्बकुर्चानां तापशानां कदम्बैः") न तु वास्तवायिता भवति, राज्ञः समञ्जसगुणत्वाद् । शकुन्तलया सह समग्रचित्रफलके लावण्यं विद्यमानम्, चित्रवृत्तान्ते मनोनिवेशेन सर्वेषां सकाशे इदं

स्पष्टम् । चित्रशास्त्रानुसारेण स्वल्पया रेखया स्वल्पेन च वर्णेन भावप्रकाशः हि 'सादृश्यम्' । राज्ञः मतानुसारेण संयोजनकार्यं विना चित्रमसम्पूर्णम् । परन्तु सखित्रयस्याल्पवृक्षस्य चाङ्कनकार्ये हि विदूषकः सानुमती च निष्पलकौ । चित्रार्पिता शकुन्तलाधुना प्राणवतीव प्रतिपन्ना । प्रथमदर्शने हि चित्ताभिरामावस्थया सीमाबद्धा दर्शकाः । परन्तु प्रकृतशिल्पी शिल्पविश्लेषकश्च हि चित्रस्य त्रुटिनियामकौ । अत्रापि दुष्यन्तस्योक्तिः – "यद्यत्साधु न चित्रे स्यात्क्रियते तत्तदवस्था ।" अत एव वर्तिकाया आवश्यकतात्र (वर्णिकाभङ्गम्) । वर्तिकां विना चित्रस्य वास्तवायनमसम्भवम् । अतो राज्ञा न्यगादि – "वर्तिकां स्तवदानय" इति ।

वस्तुतः नटस्य नैपुण्येनाङ्गिकवाचिकसात्त्विकभावैः चरित्रचित्रणं सम्भवति । चित्रकलायामपि चित्रिणः नैपुण्येन भावाः परिस्फुटन्ते । वास्तवे शकुन्तलां दृष्ट्वा दुष्यन्तस्यानुभूतिः—"किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इति । उत्तमकाव्ये काव्यसौन्दर्यस्य अधिकं औत्कर्षबर्धनार्थन्तु अलंकारस्य प्रसङ्गः । अत्रापि चित्रे महीपालेन शकुन्तलायाः सौन्दर्यबर्धनप्रयास एव काव्यरचना इति प्रतीयते ।[७] शिल्पशास्त्रेऽपि रसप्रसङ्गः । 'नवरसः' अत्र षोडशरूपाणि परिधत्ते । नृपस्यात्र शृङ्गाररसोत्पत्तिर्जायते । 'चित्ररचना'याः (composition) असम्पूर्णतां दृष्ट्वा संयोजने प्रयासी आग्रही च दुष्यन्तः । भावप्रकाशक्षेत्रे प्राच्यपाश्चात्ययोर्मध्ये विसदृशशैली तु लक्षणीया । प्राच्यशिल्पिनः विषयेऽस्मिन् अग्रे अवर्तन्तः । पुङ्खानुपुङ्खानुकरणत्वं न शिल्पत्वम् । शिल्पन्तु किमपि शर्तर्हितम् । 'Art for Art' इति पाश्चात्यस्य तत्त्वम् (l art pour l art—French slogan, early 19th cent) । पाश्चात्ये विविधाः शिल्पवर्गाः सन्ति । यद्यपि भारतीयतत्त्वेन च किञ्चित् सादृश्यं परिलक्षते तथापि भारतीयाः पूर्वमेव एतत् तत्त्वम् उपलब्धवन्तः ("आत्मसंस्कृतिर्वारशिल्पानि । छन्दोमयं वा एतैर्यजमानो आत्मानं संस्कुरुते" - ऐ. ब्रा. षष्ट-पञ्जिका, पञ्चमाध्यायः, प्रथममन्त्रः ॥) पाश्चात्येऽङ्कितात् नारीशरीरात् प्राच्येऽङ्कितस्य नारीशरीरस्य भिन्नत्वं सर्वदा शिल्पविदां नयनयोः आपतति । शकुन्तलाचित्रणेऽत्रापि तदैतिह्यं स्थितम् । तथा हि विदूषकः जगाद—"स खलति इत मे दृष्टिः निम्नोन्नतप्रदेशेषु ।"

चित्रफलके रेखाप्रान्तसमूहः (outline) यत्र दुष्यन्तस्य वर्णिकया

प्राणवन्तः, तत्र आवेगताडितदुष्यन्तस्य अङ्गुलीस्पर्शेनापि अङ्कनपरवर्तिन्याः चित्रार्पितायाः शकुन्तलायाः चित्रमभवत् मलिनं वासनया । "मलिनत्वं स्वेदादेव चित्रपटोद्धर्षणात्" (अर्थद्योतनिका) । अनुशोचनायाः अश्रुविन्दुः चित्रे अपतत् इति सत्यकथनं दुष्यन्तस्य स्वीकारोक्तिः ('अस्त्यत्र मे भावचिह्नम्') । अतः स्पष्टं यत्, चित्राङ्कनपरवर्तिचित्रफलकं शकुन्तला इति विचिन्त्य दुष्यन्तः स्वस्य तत् शीघ्रं जग्राह । एतेन प्रतीयते – तदा चित्रस्य वर्णानि सर्वाणि तु न शुष्कीभूतानि, किञ्चिन्तु आर्द्रत्वं प्राप्नुवन्ति । फलतः वर्णोच्छ्वासप्रसङ्गः आपतति । राजा अतीव दुःखितः सन् तदा नापश्यत् (द्रष्टुम् अशक्नोत्) । अधुना विषण्णपरिवेशेऽपि दुष्यन्तः किञ्चित् स्थिरः शिल्पसमालोचकश्च इव व्यवहरति । अतः चित्रे त्रुटिदूरीकरणार्थं स बद्धपरिकरः अधुना । प्रसङ्गतः, रेखालक्षणं सङ्गीतरत्नाकरे – "शिरोनेत्रकरादीनामङ्गनां मेलने सति । कायस्थितिर्यतो नेत्रहरा रेखार प्रकीर्तिता ।"

दुष्यन्तस्य चित्रफलके चित्राङ्कनमाध्यमन्तु (Media) अस्वच्छजलवर्णपद्धतिः (Opaque/semitransparent water colour) । जलवर्णपद्धतिः (water colour painting) मूलतः प्रकारद्वये विभक्तम् – स्वच्छम् (Transparent water colour) अस्वच्छम् (Semitransparent water colour) च । अस्वच्छे तु 'गुयाश' (Gouache) इत्येका पद्धतिः । दुष्यन्तः गुयाशेन चित्रमङ्कितवान् – अस्यानुमानस्य मूलं दुष्यन्तस्य उक्तिः – 'यद्यद् साधु न चित्रे स्यात् क्रियते तत्तदन्यथा ।' तत्कालीनयुगे चित्राङ्कनस्य माध्यमन्तु जलवर्णपद्धतिः । विशेषज्ञानमैकमतमत्र – "The artists used watercolour ।"[८] स्वच्छजलवर्णपद्धत्याः परवर्तिपर्याये अङ्कनविषयकत्रुटिमार्जनार्थकी प्रचेष्टा असम्भवा । परन्तु अस्वच्छे तु संशोधनकर्म सम्भवेत् कस्मिन्नपि समये । चित्रे वर्णोच्छ्वासप्रसङ्गे तु स्पष्टम् – गाढवर्णानि हि अत्र समव्यवहृयते । इदं वैशिष्ट्ययुक्तं

वर्णं दुरूहन्तु शुष्ककार्ये। इदं च गुयाशस्य प्रधानवैशिष्ट्यम्।

कालिदासस्य समयकालः आनुमानिको गुप्तयुगः विपश्चितां मतिः। अस्मिन् समये प्राचीरचित्रे फ्रेस्कोपद्धतिः (Fresco) तु व्यवहृयते । गुयाशेन सह अत्र सादृश्यमस्ति । गुयाशे श्वेतवर्णस्य मिश्रणस्य आधिक्यन्तु दृश्यते । शकुन्त-लावण्यपरिस्फुटने श्वेतवर्णस्य तथा श्वेतवर्णमिश्रणस्य भूमिकास्ति इति अनुमेयम्। प्राचीनभारतीयचित्रशिल्पे कृष्णवर्णेन रेखाङ्कनमैतिह्यम्। अस्यां पद्धत्याम् यस्य व्यवहारस्य न्यूनता आधिक्यं वा परिलक्ष्यते।

'वर्तिकोच्छ्वासात्' इत्यत्र (षष्टाङ्कस्थ-पञ्चदशसंख्यकश्लोकस्य पदम्) – 'वर्तिका'-शब्देन यद्यपि तूलिका कयलाखण्डं (Pencil) वा बुध्यते तथापि 'तूलिका' इति पृथक्शब्दस्य प्रचलनमासीत्। कयलाखण्डं हि मूलतः वर्तिका। कयलाखण्डेन रेखाङ्कनकर्म (आरम्भसूत्रपत्ररेखा/Outline) समभवत्तस्मिन्काले। प्रसङ्गे च Rajaram Narayan Saletore–महोदयस्य वक्तव्यम् – “The outline was drawn either with a pencil called vartika, or with the delicate brush known as the tulika.”[९] किन्तु अत्र 'उच्छ्वास'शब्देन वर्तिकायाः अर्थः 'वर्णम्' इति बोधव्यम्। वर्णस्य हि उच्छ्वाससम्भावना। अपरपक्षे, 'गच्छ, वर्तिकां तावद् आनय' उक्तौ न केवलं तुलिका, अपि तु वर्णाधारोऽपि (Colour box) बुध्यते । तस्मिन् युगेऽपि जलवर्णस्य आधारो वर्तते । अन्यथा वर्णानां मिश्रणे प्रनष्टानि वर्णानि । अतः अत्रापि पारिपाट्यं कर्तव्यम् । अर्थद्योतनिकायामपि – 'वर्तिकाकरण्डकं तूलिकावर्णकादिभाण्डम्।'

विरहकातरनायकेन चित्तविनोदनार्थं नायिकायाः प्रतिकृतिचित्रणप्रचेष्टा संस्कृतकाव्ये तु बृह्वी दृश्यते । गुप्तयुगे वैष्णवशैवधर्मयोः विकाश आरभते इति इतिहासप्रमाणम् । विरहे चित्राङ्कनस्य धारायाः वीजं गुप्तयुगे अङ्कुरितं सत् परवर्तिनि काले महीरुहत्वं लभते । परन्तु परवर्तिनो अङ्कनधारा भिन्नतया प्रतीयते।

चित्राङ्कनार्थं काष्ठफलाधारं चित्रफलकम् ।[१०] काष्ठफलकन्तु विविधम् ।

तत्कालीनकाष्ठफलकं वर्तमानयुगे 'क्यान्भास' इतीव (canvas) प्रकाश्यते । परन्तु वस्त्रस्य वुननकार्यं हि तुलानिर्मितम् । अपरतः काष्ठफलकं 'हार्डवोर्ड' इतीव सूक्ष्मं स्थूलं वा भवितुमर्हति । हस्तनिर्मितं भूर्जपत्रमिव सममापीयमिदम् । काष्ठफलकस्य उपरि भूर्जपत्रं सिक्त्वा स्थापयित्वा शुष्कीकरणेन फलकप्रस्तुतिः सम्भवेत् । अपि च, काष्ठफलकं स्वयमेव चित्राङ्कनाधारः सम्भवेत् ।

अत्र एकस्मिन् विषये आलोकपातः आवश्यकः । विदूषकस्य उक्तिः – "विशेषतः अपसृताभ्यां बाहुभ्यां... ईषत्परिश्रान्ता इव अलिखिता" इति – शकुन्तला विषयका । विदूषकस्य चक्षुषा वयं सर्वे पुनरपि च पश्यामः – "किं तु तत्रभवती रक्तकुवलयपल्लवशोभिना अग्रहस्तेन मुखमपवार्य चकितचकिता इव स्थिताः ।" 'चकित'स्य मूले तु भ्रमरवृत्तान्तः । वास्तवे पौर्वापर्यभावेन कार्यं सम्भवति । एकस्मिन् समये युगपद्धटनाद्वयमसम्घटति । चित्रे तु घटना एका हि आलिखिता सम्भवेत् । अत्रैव विषयेऽस्मिन् विप्रतिपत्त्याः सुयोगमस्ति ।

चित्रे विषयान्तरं लक्षणीयम् । चित्रे भ्रमरद्वयमस्ति । राज्ञः मते अपरा तु भ्रमरी – ''एषा मधुकरी ।" भ्रमरीं परित्यज्य शकुन्तलां प्रति भ्रमरः अधुना धावमानः । अनुमेयं यत् शकुन्तलासौन्दर्यं जगद्व्यापिसौन्दर्येषु श्रेष्ठम् – "प्रत्यादेश इदानीं रूपवतीनाम्" (द्वितीयाङ्कः / विदूषकस्योक्तिः) । सौन्दर्यं प्रति आकर्षणं स्वाभाविकम् । अधुना स्पष्टं शकुन्तला तु पद्मिनी नारी । तपोवनस्य मध्वाहरणेऽधुना भ्रमरस्य रुविर्नास्ति । चित्रं सत्यमनुशूयमान सन् दुष्यन्तो भ्रमरं प्रति आदेशं निक्षिपति । मा कुरु शकुन्तलां प्रति आक्रमणकर्म, अन्यथा कमलिनीमध्ये चिरस्थितो भवेत् । प्रकृतपक्षे शकुन्तप्रेमच्छायायां चिरकालीनाश्रयस्य मानसप्रार्थना ह्यत्र प्रकाशं लभते । भ्रमरं प्रति कपटदण्डदाने नात्र प्रच्छन्नीभूतो भावोऽयम् ।

भ्रमरविताडनचेष्टाप्रक्रियायां दुष्यन्तः पुनोऽनुभवतीदं चित्रम्, न तु वास्तवम् । विदूषकेन स्मारयति नृपोऽत्र । शिल्पीरूपेण दुष्यन्तो भावजगति विचरणक्षमः । दर्शकस्य भावस्तत्र कियत्क्षणहेतुः । भावविषये काव्यशास्त्रे तु बह्वी आलोचनामस्ति । अत्र चित्रार्पिता शकुन्तला दुष्यन्तस्य रसोत्पत्तेर्विभावः । यद्वा विदूषकेण राजा वास्तवे पतितवाणः । फलस्वरूपं शकुन्तलां प्रति प्रेमावेगस्यातिशय्येन दुषन्त्यस्य सामयिकी उन्मादावस्ता सृष्टा । सानुमती

तदनुकूलमवदत् – “पूर्वापरविरोधी अपूर्व एव विरहमार्गः ।” अर्थद्योतनिकायां राघवभट्टोऽपि लिखति – “पूर्वं चित्रस्य चित्रत्वेन ज्ञानं, पुनस्तस्योन्मादवस्थायां सत्यत्वेन ज्ञानम्, पुनरपि चित्रत्वेन ज्ञानमिति पूर्वापरविरोधः । उन्मादावस्थानन्तरं मूर्च्छाद्यवस्थाया अभावादिति भावः । अत एव अपूर्व आश्चर्यकारी ।”

दुष्यन्त एको राजा आसीत् । तस्योपरि स तु धीरोदत्तः । अतो धनमित्रादिवृत्तान्तैः पुनरपि दुष्यन्ते नृपत्वमारोपणम् । तस्यासम्पूर्णचित्रफलकं ‘मेघप्रतिच्छन्द’-नाम्नि प्रासादनगरे विदूषकस्य समीपं तिष्टति । षष्ठाङ्कस्य चित्रवृत्तान्तोऽयं शकुन्तलां प्रति राज्ञोऽनाविलतीव्रानुरागस्य चरमपराकाष्ठारूपेण प्रतिपनाः, तथापि सुकौशलेनान्तराले प्रेरितः । कोऽपि वृत्तान्तोऽधिकक्षणस्तिष्ठति चेद्दर्शकानां मनस उत्साहो विनष्टो भवेत् । अतो घटनापारम्पर्येण चित्रिदुष्यन्तस्योपरि यवनिकापतनं जायते । असम्पूर्णचित्रस्यातृप्तिविस्मृतिर्भवति नृपस्य सप्तमाङ्के यत्रेश्वरसृष्ट्या जीवनशकुन्तलया सह साक्षात्क्रिया सम्भवति ।

विदूषकः शिल्परसिकः, वास्तववादी च । सानुमती दुष्यन्तस्य शिल्पनैपुण्ये विभोरा, समव्यथिनी च । दुःखजनितमानसचाञ्चल्याद् (राज्ञः) मनस्तात्त्विकविचारकी एव सानुमती । मानवा हि छलनाकारिणः, अपि तु मानवा हि शिल्पिनः सम्भवेयुः । शिल्पी सत्यवादी । अत्रापि न च व्यतिक्रमम् । शिल्पिनः ‘Saddest thought’ हि ‘Sweetest Song’ भूत्वा प्रतिपादयत्यस्माकं सकाशे । ‘आपरितोषाद्...’ इत्यनेन शिल्पिनः शिल्पस्य च विचारकार्यं सम्पन्नं भवेत् । अत्र विदूषकस्य, तिरस्करिणीविद्ययादृश्यायाः सानुमत्या वा वाणी भवतु । दुष्यन्तस्य चित्राङ्कनं प्रतिमुहुर्तमश्रुमुश्चनस्य प्रायश्चित्तस्यैकं चित्रितं गाथास्वरूपम्, यत्र तूलिकायाः प्रत्येकमाकीर्णे प्रेमविसर्जनस्याक्षेपः केवलम् ।

शेषतो वक्तव्यम् – कालिदासः शिल्पमनस्कः । कामसूत्रानुसारेण ‘काव्यप्रिया’–सम्पादनार्थं ‘क्रियाकल्प’-ज्ञानस्य प्रयोजनम्, तद्वद् दुष्यन्तस्य चित्रिरूपेणाङ्कने कालिदासस्याध्यवसाय आसीत् - इति तु अनस्वीकार्यम् । राज्ञो दुष्यन्तस्य विशालचरित्रमालाचित्रणे इदन्तु क्षुद्ररत्नं यत् पाठकस्य दर्शकस्य च मनोरञ्जकम् । अत्र हि कालिदासस्य बहुमुखिप्रतिभाया आभासः । कालिदासः

स्वयमपि कश्चन चित्रशिल्पी आसीदिति न वा विपश्चितां विमतस्यावसरमस्ति । विषयस्यास्यालोचना, प्रबन्धेऽस्मिन् धृष्ठता इति प्रतीयते इति शिवम् ।

**तथ्यसूत्राणि –**

१. G. C. Pande, 'Foundations of Indian Culture', Vol.- 1, 2nd edition, Delhi, Motilal Banarasi dass, 1990, p. 343.

२. Loc. cit.

३. Dr. Shubhra Sharma, 'LIFE IN THE UPANISHADS', New Delhi, Abhinav Publications 1985, p. 147.

४. हरिचरण बन्द्योपाध्याय, 'बङ्गीयशबदकोष', १म खण्ड, ८म मुद्रण, कलकाता, साहित्य अकादेमी, २०११, पृ. ३११ ।

५. श्रीमद्गुरुनाथ विद्यानिधि भट्टाचार्य (सम्पा.), 'अमरकोष', कलिकाता, संस्कृत पुस्तक भाण्डार, १४१७, पृ. २९० ।

६. Loc. cit.

७. 'काव्यरचना' अपि एका कला, कामसूत्रे 'काव्यप्रिया' (३ संख्यकः) द्रष्टव्यः ।

८. A. C. Sharma & N. N. Kher, 'A COMPLETE COURSE IN CERTIFICATE CIVICS & HISTORY', Vol.- 1, 8th revised, New Delhi, Pitambar Publishing Company (p) Ltd., 2009, p. 126.

९. Rajaram Narayan Saletore, ' Life In The Gupta Age', 1943, Sic.pg., (https://archive.org/details/LifeInTheGuptaAge, 15/10/14, 19 : 18pm).

१०. हरिचरण बन्द्योपाध्याय, पूर्वोक्तग्रन्थ, पृ. ८८०.

**सहायकग्रन्थावली -**

१. शिल्पेर व्याकरण. सम्पा. अरूप चन्द्र. नदीया : सुजया प्रकाशनी, १९९८ (३य

संस्करण)

२. कालिदास. अभिज्ञानशकुन्तलम्. सम्पा. ड. अनिल चन्द्र वसु. कोलकाता : संस्कृत वुक डिपो, २००७ (४र्थ संस्करण)

३. वात्स्यायण. कामसूत्रम्. सम्पा. ड. मानवेदु वन्द्योपाध्याय. कलकाता : संस्कृत पुस्तक भाण्डार, २००३ (२य परिमार्जित संस्करण)

४. चित्रकृत् (१म खण्ड). सम्पा. तरुण गुह. हुगली, १९९६ (३य संकलन)

५. साहित्य विवेक. सम्पा. विमलकुमार मुखोपाध्याय. कलकाता : दे’ज पावलिशिं हाओष्, २००३ (४र्थ संस्करण)

६. सिंह, अमर. अमरकोष. सम्पा. श्रीमद्गुरुनाथ विद्यानिधि भट्टाचार्य. कोलकाता : संस्कृत पुस्तक भाण्डार, १४१३

७. कालिदास. अभिज्ञानशकुन्तलम्. सम्पा. ड. सत्यनारायण चक्रवर्ती. कोलकाता : संस्कृत पुस्तक भाण्डार, २००८ (५म संस्करण)

८. संस्कृति शिल्प इतिहास. सम्पा. सुनीतिकुमार चट्टोपाध्याय. कलकाता : जिज्ञासा, २००३ (४र्थ प्रकाश)

९. बङ्गीय शब्दकोष(१म खण्ड). सम्पा. हरिचरण बन्द्योपाध्याय. कलकाता : साहित्य एकादेमी, २०११ (८म मुद्रण)

१०. A COMPLETE COURSE IN CERTIFICATE CIVICS & HISTORY ( Vol.- 1). Ed. A. C. Sharma & N. N. Kher. New Delhi : Pitambar Publishing Company (p) Ltd., 2009 (8th revised)

११. Foundations of Indian Culture (Vol.- 1). Ed. G. C. Pande. Delhi : Motilal Banarasidass, 1990 (2nd edition)

१२. Life In The Gupta Age. Ed. Rajaram Narayan Saletore. 1943 (https://archive.org/details/LifeInTheGuptaAge, 15/10/14, 19 : 18pm).

१३. LIFE IN THE UPANISHADS. Ed. Dr. Shubhra Sharma. New Delhi : Abhinav Publications 1985.

# लेखकपरिचितिः

१. योगसमन्वये स्वामिविवेकानन्दः. लेखको ड. शेख-साविर-आलिः, सहाध्यापकः, पश्चिमबङ्गराष्ट्रियविश्वविद्यालयः।

२. तादात्म्यस्य शक्तिसम्बन्धत्वविचारः. लेखको ड. तपनशंकर-भट्टाचार्यः, अध्यापकः, यादवपुरविश्वविद्यालयः ।

३. कर्मत्वनिरूपणे नैयायिकानां तथा वैयाकरणानामभिमतम्. लेखकः स्वरूप-सिंहः, सहाध्यापकः, विद्यासागरविश्वविद्यालयः ।

४. शाब्दिक-नैयायिक-मीमांसकदिशा लिङर्थविमर्शः. लेखकः सन्तु-सिंहः, सहाध्यापकः बाँकुडाविश्वविद्यालयः ।

५. वैयाकरणनिकाये स्फोटवादः. लेखकः सुमन्त-चौधुरी, गवेषकः, रामकृष्णमिशन्विवेकानन्दविश्वविद्यालयः ।

६. व्याकरणमुख्यप्रयोजनखण्डनखण्डनम्. लेखकः अभिजित् मण्डलः, गवेषकः, रामकृष्णमिशन्विद्यामन्दिरम् ।

७. शाब्दिकनिकाये जातिस्वरूपम्. लेखकः श्रीमन्त-भद्रः, गवेषकः, रामकृष्णमिशन्विवेकानन्दविश्वविद्यालयः ।

८. श्रीमद्भागवतमहापुराणे परमाणुवादः. लेखकः प्रलय-ब्यानार्जी, सहाध्यापकः, पाँचमुडामहाविद्यालयः ।

९. शाकुन्तले ‘आलेख्याश्चर्ययोश्चित्रम्’ – एका समीक्षा. लेखिका भक्तिलता-दासः, गवेषिका, कलिकाताविश्वविद्यालयः ।

RESEARCH JOURNAL
VIDYĀMANDIRAPATRIKĀ SĀRASVATĪ
(ISSN 2321-9072)

## GUIDELINES FOR PUBLICATION :

1. All manuscripts should be prepared clearly typewritten in Microsoft Word 2003-2007, in Arial Unicode MS, font size 12 (latest edition of MLA Handbook in all matters of form), typed in double space and one-inch margins on single-sided A4 paper.

2. Length of the research paper must be in (not more) 2500-3000 words.

3. The article/research paper without references or incomplete references will not be entertained. Paper written in Sanskrit Language must be followed by endnote.

4. The article/research paper should be accompanied with a declaration to the effect that the paper is the original works of the author(s) and that has not been submitted for publication anywhere else.

5. All research papers should be accompanied by an abstract of 150-200 words only in Sanskrit language.

6. All contribution should also include (i) Name of the author (ii) their professional affiliation (iii) postal address (iv) phone/mobile numbers & email addresses.

## REFERENCE STYLE :

References should be embedded in the text in a consistent style:

1. Author (first and last name), Title (bold if a book, "in quotes if an article, disc, etc."), Publication data (Place, Publisher, date if book; name of journal in bold, no. and date if article), p. or pp.

2. Subsequent references: Author's last name, shortened title, p. or pp.

**HOW TO SUBMIT :**

You can send your research papers etc. to us using one of the following methods:

**Web submission:** by e-mail to dasanjan530@gmail.com

**Postal submission:** To, Prof. Anjan Das, Coordinator of Sârasvatî Journal, Dept. of Sanskrit, Ramakrishna Mission Vidyamandira, Belur Math, Howrah -711202

**STRUCTURE OF PAPER :**

Paper must be structured as following :

1. Title, 2. Author(s) name with affiliation, contact no. & E-mail Id, 3. Abstract, 4. Key words, 5. Endnotes, 6. Copy right Transfer by the author(s)